यद्स्मिन्ब्रह्मचर्यं[1] वसतीति[2]' तद्धि मौद्गल्यस्यान्तेवासी शुश्राव' स आचार्यायाव्रज्याचचष्टे[3]' दुरधीयानं[4] वा अयं भवन्तमवोचद्यो ऽयमद्यातिथिर्भवति[5]' किं[6] सौम्य[7] विद्वानिति' त्रीन्वेदान्ब्रूते भो इति' तस्य सौम्य[7] यो विपष्टो[8] विजिगीषो ऽन्तेवासी तं मे ब्रूयेति' तमाजुहाव[9]' तमभ्युवाचासाविति[10]' भो इति' किं सौम्य[7] त आचार्यो ऽध्येतीति' त्रीन्वेदान्ब्रूते भो इति' यन्नु खलु सौम्यास्माभिः[11] सर्वे वेदा[12] मुखतो गृहीताः कथं त एवमाचार्यो भाषते' कथं नु शिष्टाः शिष्टेभ्य एवं भाषिरन्यं ब्रूनमहं[13] प्रश्नं[14] पृच्छामि न[15] तं विवक्ष्यति[16] न ब्रूनमध्येतीति' स ह मौद्गल्यः[17] स्वमन्तेवासिनमुवाच[18] परेहि सौम्य[19] ग्लावं मैत्रेयमुपसीदाधीहि भोः सावित्रीं गायत्रीं चतुर्विंशतियोनिं द्वादशमिथुनां' यस्या भृग्वङ्गिरसश्चक्षुर्यस्यां सर्वमिदं श्रितं तां भवान्प्रब्रवीत्विति' स चेत्सौम्य[20] दुरधीयानो भविष्यत्याचार्येविाच[21] ब्रह्मचारी ब्रह्मचारिणो[22]

---

1) So alle Hss., ed. B. Ind. hat °चर्ये; 2) वसती B; 3) Man erwartet °चचक्षे; 4) °यानां C; 5) °वतिर्व B; 6) कं B; 7) सोम्य A; 8) विपृष्ट C; 9) तस्मादुहाव A und E; 10) °साविञ्चि B; °साविवि C; 11) सोम्या° A und E; 12) देवा C; 13) हेतमहं A; 14) Fehlt in B; 15) Fehlt in E; 16) व्यवक्षति E; विवक्षति C; 17) मौद्गल्या B; 18) °वासिन उवाच E; 19) सोम्य A und B; 20) चेत्सोम्य A; 21) °त्याचर्योवाच B; hinter भविष्यति scheint इति ausgefallen zu sein; 22) °चारिणो A, C und E.

सावित्रीं प्राहेति वक्ष्यति तत्त्वं ब्रूयाद्दुरधीयानं तं वै भवान्मौद्गल्यमवोचत्स त्वा यं प्रश्नमप्राक्षीन्न[1] तं व्यवोचः' पुरा संवत्सरादार्तिमार्ष्यसीति[2]' ॥ ३१ ॥

स तत्राजगाम यत्रेतरो बभूव 'तं ह पप्रच्छ 'स ह न[3] प्रतिपेदे 'तं होवाच दुरधीयानं तं वै भवान्मौद्गल्यमवोचत्स त्वा यं प्रश्नमप्राक्षीन्न[4] तं व्यवोचः 'पुरा संवत्सरादार्तिमार्ष्यसीति[5]' स ह मैत्रेयः[6] स्वानन्तेवासिन उवाच यथार्थं भवन्तो[7] यथागृहं यथामनो विप्रसृज्यतां' दुरधीयानं वा अहं मौद्गल्यमवोचं 'स मा यं[8] प्रश्नमप्राक्षीन्न[9] तं व्यवोचं 'तमुपैष्यामि[10]' शान्तिं करिष्यामीति 'स ह मैत्रेयः[11] प्रातः समित्याणिर्मौद्गल्यमुपससादासौ[12] वा[12] अहं भो मैत्रेयः[13]' किमर्थमिति' दुरधीयानं वा अहं[14] भवन्तमवोचं[15]' त्वं[16] मा यं प्रश्नमप्राक्षीर्न[17] तं व्यवोचं 'त्वामुपैष्यामि[18]' शान्तिं करिष्यामीति'

---

1) °पराक्षीन E; 2) °मार्ष्यसीति A, C und E; 3) नः E; 4) °मपराक्षीन् E; 5) °तीति C; 6) मैत्रे B; मौद्गल्यः C und E; 7) भवतो B; 8) व B; 9) °मपराक्षीन् E; °मप्रक्षीन् C; °मप्राक्षीन्तं B; 10) So ed. B. Ind.; alle hss. तमुपेक्षामि; 11) मैत्रेयं B; 12) So corr.; °दासीवो A pr. m.; °दासा वा A sec. man. B, C und E; 13) Man erwartet hinter „मैत्रेयः" इति; 14) अ B; अयं E; 15) °मभवोचं B; °मावाचं E; 16) त्वां B; 17) So corr.; A, B und C °प्रक्षीन्; E °पराक्षीन्; 18) So B Ind.; A, C und E °पेक्षामि; B °पेश्यामि.

स ह्येवाचात्र वा उपेतं च सर्वं च कृतं पापकेन त्वा यानेन [1] चरन्तमाङ्गिरसो ऽयं [2] मम कल्याणास्तं ते ददामि [3] ' तेन याहीति ' स ह्येवाचैतदेवात्राविषं [4] चानृशंस्यं च यथा भवानाहोपायामि [5] त्वेव [6] भवन्तमिति ' तं होपेयाय ' तं होपेत्य पप्रच्छ किं स्विदाङ्गिर्भीः सवितुर्वरेण्यं भर्गो देवस्य कवयः किमाङ्गिर्धियो विचक्ष्व यदि ताः प्रवेत्य [7] ' प्रचोदयान्त्सविता [8] याभिरितीति ' तस्मा एतत्प्रोवाच वेदांश्छन्दांसि [9] सवितुर्वरेण्यं ' भर्गो देवस्य कवयो ऽन्नमाङ्गिरसः कर्माणि धियस्तंतु ते [10] प्रब्रवीमि प्रचोदयान्त्सविता [11] याभिरितीति ' तमुपसंगृह्य पप्रच्छाधीहि भोः कः सविता का सावित्री ' ॥ ३२ ॥

मन एव सविता वाक्सावित्री ' यत्र ह्येव मनस्तद्वाग्यत्र [12] वै वाक्तन्मन इत्येते द्वे योनी एकं मिथुनमग्निरेव सविता पृथिवी सावित्री ' यत्र ह्येवाग्निस्तत्पृथिवी यत्र वै पृथिवी तदग्निरित्येते द्वे योनी एकं मिथुनं ' वायुरेव सवितान्तरिक्षं सावित्री ' यत्र ह्येव वायुस्तदन्तरिक्षं यत्र

---

1) ? ? 2) व C; 3) दधामि E; 4) °त्रात्विषं A; °त्राविषं B; °वान्त्रात्विषं C; 5) °होयामि B; 6) So corr.; alle hss. त्येव; 7) प्रवेकु B; प्रवेक्ष C; 8) °यन्त्सविता A, B und E; 9) So corr.; die hss. वेदाच्छ°; 10) वे E; 11) So B. Ind.; die hss. प्रचोदयन्त्स°; 12) °मनस्तद्व्यक्तयत्र B.

वा[1] अन्तरिक्षं[1] तद्वायुरित्येते द्वे योनी एकं मिथुन-मादित्य एव सविता द्यौः सावित्री[2] 'यत्र क्वेवादित्य-स्तद्द्यौर्यत्र[3] वै द्यौस्तदादित्य इत्येते द्वे योनी एकं मि-थुनं 'चन्द्रमा एव सविता नक्षत्राणि सावित्री 'यत्र क्वेव चन्द्रमास्तन्नक्षत्राणि यत्र वै नक्षत्राणि तच्चन्द्रमा इत्येते द्वे योनी एकं[4] मिथुनमहरेव सविता रात्रिः सावित्री 'यत्र क्वेवाहस्तद्रात्रिर्यत्र[5] वै रात्रिस्तदहरित्येते द्वे योनी एकं मिथुनमुष्णामेव सविता शीतं सावित्री[6] 'यत्र क्वे-वोष्णं तच्छीतं यत्र वै शीतं तदुष्णामित्येते[7] द्वे योनी एकं मिथुनमभ्रमेव[8] सविता वर्षं सावित्री 'यत्र क्वेवाभ्रं तद्वर्षं यत्र वै वर्षं तदभ्रमित्येते द्वे योनी एकं[9] मिथुनं 'विद्युदेव सविता स्तनयित्नुः सावित्री 'यत्र क्वेव विद्यु-त्तत्स्तनयित्नुर्यत्र[10] वै स्तनयित्नुस्तद्विद्युदित्येते द्वे योनी एकं मिथुनं 'प्राण[11] एव सवितान्नं सावित्री 'यत्र क्वेव प्राणास्तदन्नं यत्र वा[5] अन्नं[12] तत्प्राण इत्येते द्वे योनी एकं मिथुनं 'वेदा एव सविता छन्दांसि सावित्री यत्र क्वेव वेदास्तच्छन्दांसि यत्र वै छन्दांसि तद्वेदा इत्येते द्वे

---

1) वान्तरिक्षं A, C und E; 2) सावित्रा B; 3) क्वेवादित्यस्तत्र द्यौ A; 4) एक E; 5) क्वेवायह° C; 6) सवित्रीं C; 7) °ष्णामिते B; 8) Von अभ्रमेव bis विद्युदेव fehlt in E; 9) एक C; 10) तत् fehlt in C; 11) प्राणा B; 12) वान्नं C; या अन्नं E.

योनी एकं मिथुनं 'यज्ञ एव सविता दक्षिणाः सावित्री[1]' यत्र क्वेव यज्ञस्तद्दक्षिणा यत्र वै दक्षिणास्तद्यज्ञ इत्येते द्वे योनी एकं मिथुनमेतद्ध स्मैतद्विद्वांसमोपाकारिमासस्तुर्ब्रह्मचारी[2] ते संस्थित इत्यथैत आसस्तुराचित[2] इव चितो[3] बभूवाथोत्थाय प्राव्राजीदित्येतद्वा[4] अहं वेद नैतासु योनिष्वित[5] एतेभ्यो वा मिथुनेभ्यः संभूतो ब्रह्मचारी मम पुरायुषः[6] प्रेयादिति' ॥ ३३ ॥

ब्रह्म क्वेदं श्रियं प्रतिष्ठामायतनमैक्षत[7]' तत्तपस्व' यदि तद्व्रते श्रियेत तत्सत्ये प्रत्यतिष्ठत्स[8] सविता सावित्र्या ब्राह्मणं सृष्ट्वा तत्सावित्रीं पर्यदधात्तत्सवितुर्व्रेण्यमिति[9] सवित्र्याः प्रथमः पादः' पृथिव्यर्च[10] समदधादृचाग्निमग्निना[11] श्रियं 'श्रिया स्त्रियं' स्त्रिया मिथुनं' मिथुनेन प्रजां 'प्रजया कर्म[12]' कमणा तपस्तपसा[13] सत्यं' सत्येन ब्रह्म' ब्रह्मणा[14] ब्राह्मणं' ब्राह्मणेन व्रतं' व्रतेन वै ब्राह्मणः संशितो[15] भवत्यशून्यो भवत्यविछिन्नो भवत्यविछिन्नो ऽस्य तन्तुरविछिन्नं[16] जीवनं[17] भवति य एवं

---

1) सवित्री A; 2) ? ? 3) चिन्तो B; 4) प्रव्राजीदि° A, C und E; प्राव्राजीदि° E; 5) योनिष्टित C und E; 6) पूरायुष: E; 7) प्रतिष्टा° E; 8) स fehlt in B; 9) पर्यदध्यात्तत्सा° B; 10) पृथीव्यर्चु E; 11) °चाग्निमग्निना E; 12) Fehlt in E; 13) तपस् fehlt in B; 14) ब्राह्मणा C; 15) शंसितो C; 16) तन्तुमवि° B; 17) जीवन E; C hat hinter „जीवन" „भवनं" eingefügt.

वेद यश्चैवं विद्वानेवमेतं सावित्र्याः[1] प्रथमं पादं व्याचष्टे' ॥ ३४ ॥

भर्गो देवस्य धीमह्गीति[2] सावित्र्या द्वितीयः पादो' ऽन्तरिक्षेण यजुः समदधाद्यजुषा वायुं' वायुनाभ्रमभ्रेण वर्षं' वर्षेणौषधिवनस्पतीनोषधिवनस्पतिभिः[3] पशून्पशुभिः कर्म[4]' कर्मणा तपस्तपसा सत्यं' सत्येन ब्रह्म' ब्रह्मणा ब्राह्मणं' ब्राह्मणेन व्रतं' व्रतेन वै ब्राह्मणः संशितो भवत्यशून्यो भवत्यविछिन्नो भवत्यविछिन्नो ऽस्य तन्तुर्-विछिन्नं जीवनं भवति य एवं वेद यश्चैवं विद्वानेवमेतं[5] सावित्र्या[6] द्वितीयं पादं व्याचष्टे' ॥ ३५ ॥

धियो यो नः प्रचोदयादिति सावित्र्यास्तृतीयः पादो' दिवा साम समदधात्साम्नादित्यमादित्येन[7] रश्मीन्रश्मि-भिर्वर्षं' वर्षेणौषधिवनस्पतीनोषधिवनस्पतिभिः पशून्य-शुभिः कर्म' कर्मणा तपस्तपसा सत्यं' सत्येन ब्रह्म' ब्र-ह्मणा ब्राह्मणं' ब्राह्मणेन व्रतं' व्रतेन वै ब्राह्मणः संशितो[8] भवत्यशून्यो भवत्यविछिन्नो भवत्यविछिन्नो ऽस्य तन्तुरविछिन्नं जीवनं भवति य एवं वेद यश्चैवं विद्वा-नेवमेतं सावित्र्यास्तृतीयं पादं व्याचष्टे' ॥ ३६ ॥

---

1) सविञ्याः A und E; 2) धिमहिति E; धीमहिति B; 3) वर्षेणौसिधि° A; 4) Fehlt in B und E; 5) विद्वानेवमव तं A; 6) सावित्र्यां B; 7) °दध्यत्सा° B; °दधात्सामामादित्य° A; 8) शंशितो C.

तेन ह वा एवंविदुषा ब्राह्मणेन ब्रह्माभिपन्नं ग्रसितं परामृष्टं ' ब्रह्मणाकाशमभिपन्नं ग्रसितं परामृष्टमाकाशेन वायुरभिपन्नो ग्रसितः[1] परामृष्टो ' वायुना ज्योतिरभिपन्नं ग्रसितं परामृष्टं ' ज्योतिषापो ऽभिपन्ना ग्रसिताः परामृष्टा ' अद्भिर्भूमिरभिपन्ना ग्रसिता परामृष्टा ' भूम्यान्नमभिपन्नं ग्रसितं परामृष्टमन्नेन प्राणो ऽभिपन्नो ग्रसितः परामृष्टः ' प्राणेन मनो ऽभिपन्नं ग्रसितं परामृष्टं ' मनसा वागभिपन्ना ग्रसिता परामृष्टा ' वाचा वेदा अभिपन्ना ग्रसिताः परामृष्टा ' वेदैर्यज्ञो ऽभिपन्नो ग्रसितः परिमृष्टस्तानि ह वा एतानि द्वादशमहाभूतान्येवंविदि[2] प्रतिष्ठितानि ' तेषां यज्ञ[3] एव परार्ध्यः[4]'

॥ ३७ ॥

तं ह स्मैतमेवंविद्वांसो मन्यन्ते विद्मैनमिति यथातथ्यमविद्वांसो[5] ' ऽयं यज्ञो वेदेषु प्रतिष्ठितो ' वेदा वाचि[6] प्रतिष्ठिता ' वाङ्मनसि[7] प्रतिष्ठिता ' मनः प्राणे[8] प्रतिष्ठितं[8] ' प्राणो[8] ऽन्ने[8] प्रतिष्ठितो ' ऽन्नं भूमौ प्रतिष्ठितं ' भूमिरप्सु प्रतिष्ठितापो ज्योतिषि[9] प्रतिष्ठिता ' ज्योतिर्वायौ[10] प्रतिष्ठितं ' वायुराकाशे[11] प्रतिष्ठित[12] ' आकाशं

---

1) ग्रसितं A und B; 2) °वंविधि A pr. man. und C; 3) यज्ञं C; 4) परार्ध्यः C; 5) यथा° A und B; याता° E; 6) वासि E; 7) वाङ्मनसि A; 8) Fehlt in E; 9) ज्योतींषि B; 10) °र्वायो B; 11) °काशो C; 12) प्रतिष्ठितम् A, B und E.

ब्रह्मणि प्रतिष्ठितं ब्रह्म ब्राह्मणे ब्रह्मविदि[1] प्रतिष्ठितं यो ह वा एवंवित्स[2] ब्रह्मवित्पुण्यां च कीर्तिं[3] लभते सुरभींश्च[4] गन्धान्त्सो ऽपहतपाप्मानन्तां[5] श्रियमश्नुते य एवं वेद यश्चैवंविद्वानेवमेतां[6] वेदानां मातरं सावित्रीं संपदमुपनिषदमुपास्त इति ब्राह्मणम् ॥ ३८ ॥

आपो गर्भं जनयन्तीरित्यपां[7] गर्भः पुरुषः स यज्ञो[8] ऽद्भिर्यज्ञः[9] प्रणीयमानः[10] प्राङ्गायते[11] तस्मादाचमनीयं पूर्वमाहारयति स यदाचामति त्रिराचामति द्विः परिमृ-ज्यात्यायुरवरुन्ध्य[12] पाप्मानं निर्णुदत्युपसाद्य यजुषोद्धृत्य[13] मन्त्रान्प्रयुज्यावसाय प्राचीः शाखाः संधाय[14] निरङ्गुष्ठे पा-णावमृतमस्यमृतोपस्तरणमस्यमृताय त्वोपस्तृणामीति पा-णावुदकमानीय[15] जीवा स्थेति सूक्तेन त्रिराचामति स यत्पूर्वमाचामति सप्त प्राणांस्तानेतेनास्मिन्नाप्याययति[16] या क्ष्मा वाक्याः शरीरान्मात्रास्तत्यथैतदग्निं[17] वायुमादित्यं चन्द्रमसमपः पशून्यांश्च प्रजास्तानेतेनास्मिन्नाप्याययत्यो-

---

1) °विधि C; 2) एवंविद्वत्सा C; 3) कीर्त्तिं C und E; कीर्त्रि B; 4) सुरभीश्च A und E; 5) So corr.; °नन्त्यां A; °नां व्य B; °नन्त C; °नन्त्यं E; 6) So B. Ind.; die hss. °तं; 7) जनयन्ति° A pr. man. und B; 8) यज्ञे B; 9) निर्यज्ञः B; 10) प्रयणीमानः B; प्रसावमानः E; 11) प्राङ्यते B; 12) परिमृंज्रन्त्या° B; 13) °बोदत्व B; °बोदूत्य C; 14) संधाया A, C und E; संभवो B; 15) सप्त प्राणावुदकमानीया B; 16) °प्यायति E; 17) °त्रास्तथेप्येतदग्नि B;

पो[1] ऽमृतं' स यद्द्वितीयमाचामति सप्तापानांस्तानेतेना-
स्मिन्नाप्याययति[2]' या क्ष्मा वाक्याः[3] शरीरान्मात्रास्त-
य्यैतत्पौर्णमासीमष्टकाममावास्यां श्रद्धां दीक्षां[4] यज्ञं
दक्षिणास्तानेतेनास्मिन्नाप्याययत्यापो[5] ऽमृतं' स यत्तृती-
यमाचामति सप्त व्यानांस्तानेतेनास्मिन्नाप्याययति' या क्ष्मा
वाक्याः शरीरान्मात्रास्तय्यैतत्पृथिवीमन्तरिक्षं दिवं[6] नक्ष-
त्राण्यृतूनार्तवान्संवत्सरांस्तानेतेनास्मिन्नाप्याययत्यापो ऽमृ-
तं' पुरुषो ब्रह्मांद्याप्रींग्निगमो[7] भवति तस्माद्धि विद्वा-
न्पुरुषमिदं पुण्डरीकमिति' प्राण एष स पुरि[8] शेते संपु-
रि[9] शेत[10] इति' पुरिशयं[11] सन्तं प्राणं पुरुष इत्याचक्षते
परोक्षेण' परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः[12]'
स यत्पूर्वमाचामति पुरस्ताद्धोमांस्तेनास्मिन्नवरुन्द्धे[13]' स[14]
यद्द्वितीयमाचामत्याज्यभागौ तेनास्मिन्नवरुन्द्धे[13]' स यत्तृ-
तीयमाचामति संस्थितहोमांस्तेनास्मिन्नवरुन्द्धे[13]' स यद्धिः
परिशुम्भति[15] तत्संमित्संबर्हिः[16]' स यत्सर्वाणि खानि
सर्वं देहमाप्याययति यच्चान्यदातारं[17] मल्लकार्यं यज्ञे स्क-

---

1) प्रन्तांस्ता° B; 2) °प्याययत्याति B; 3) ब्रह्मी: B; 4) दीक्ष्यां B;
5) °नेतेस्मानास्मिन्न° A; 6) दि C; 7) ? ? so A und C; °प्रियं निगमो B;
°प्रियं निगमो E; 8) पूरी E; 9) संपुरी B und E; 10) प्रान्त C;
11) पुरीषयं E; 12) प्रत्तद्विष: A; 13) °वरुन्धे A; 14) Von स bis
स यद्दिद्व: परि° fehlt in E; 15) °भवति B; 16) ? ?; 17) ?

न्दति सर्वं तेनास्मिन्नवरुन्द्धे ' स यदोंपूर्वान्मल्लान्प्रयुङ्क्ते आ सर्वमेधादेते क्रतव एत एवास्य सर्वेषु लोकेषु सर्वेषु देवेषु सर्वेषु वेदेषु सर्वेषु भूतेषु सर्वेषु सत्त्वेषु कामचारः कामविमोचनं भवत्यर्धे[1] च न प्रमीयते य एवं वेद ' तदप्येतदृचोक्तमापो भृग्वङ्गिरो द्रूपमापो भृग्वङ्गिरोमयं सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयमन्तरैते त्रयो वेदा भृगूनङ्गिरसो ऽनुगाः ॥ अपां पुष्पं मूर्तिराकाशं पवित्रमुत्तममित्याचम्याभ्युद्यात्मानमनुमल्लयत इन्द्र जीवेति ब्राह्मणं ' ॥ ३१ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे प्रथमः प्रपाठकः ॥

ओं ब्रह्मचारीष्णंश्चरति[2] रोदसी[3] उभे इत्याचार्यमाह[4] ' तस्मिन्देवाः संमनसो[5] भवन्तीति वायुमाह ' स य एति पूर्वस्मादुत्तरं समुद्रमित्यादित्यमाह ' दीक्षितो दीर्घश्मश्रुरेष[6] दीक्षित एष दीर्घश्मश्रुरेष[7] एवाचार्यस्थाने तिष्ठन्नाचार्य इति स्तूयते ' वैद्युतस्थाने तिष्ठन्वायुरिति

---

1) अर्धे ? ?; 2) ब्रह्माचा° A pr. m.; ब्रह्मचारीष्ठं° B; 3) रोदसि A pr. man.; 4) °चार्यामाह E; 5) मनसो E; 6) °श्रुतेरेष C; °श्मसुरेव E; °श्रूरेष B; 7) °श्रूरेष B; °श्रुरेष E.

स्तूयते[1] य्यौस्थाने[2] तिष्ठन्नादित्य इति स्तूयते ' तद्ध्येत-दृचोक्तं ब्रह्मचारीष्णन्निति[3] ब्राह्मणम् ' ॥ १ ॥

ज्ञायमानो ह वै ब्राह्मणः सप्तेन्द्रियाण्यभिज्ञायते[4] ब्रह्मवर्चसं च यशश्च स्वप्नं च क्रोधं च श्लाघां च रूपं च पुण्यमेव गन्धं सप्तमं ' तानि ह वा अस्यैतानि ब्रह्मचर्यमुपेत्योपक्रामन्ति[5] ' मृगानस्य ब्रह्मवर्चसं गच्छत्याचार्यं[6] यशो ' ज्ञगरं स्वप्नो ' वराहं क्रोधो ' ज्यः[7] श्लाघा[8] ' कुमारीं[9] रूपमोषधिवनस्पतीन्पुण्यो[10] गन्धः ' स यन्मृगाञ्जिनानि[11] वस्ते तेन तद्ब्रह्मवर्चसमवरुन्द्धे यदस्य मृगेषु भवति ' स ह स्नातो ब्रह्मवर्चसी भवति ' स यदहरहराचार्याय[12] कर्म करोति तेन तद्यशो ज्वरुन्द्धे यदस्याचार्ये भवति ' स ह स्नातो यशस्वी[13] भवति ' स यत्सुषुप्सुर्निद्रां निनयति तेन तं स्वप्नमवरुन्द्धे यो ज्स्याज्ञगरे भवति ' तं ह स्नातं स्वपन्तमाहुः[14] स्वपितु मैनं बोबुधयेति[15] ' स यत्क्रुद्धो वाचा न कंचन हिनस्ति पुरुषात्पुरुषात्या-

---

1) Fehlt in A; 2) Fehlt in E; 3) °चारीत्यमिति B; 4) So corr.; alle hss. °ज्ञायन्ते; 5) So corr.; alle hss. °मुपेतोप°; C °मुपेतोपक्रामति; 6) °चार्य C und E; 7) So corr.; alle hss. ज्य; 8) श्लाघं B; 9) कुमारी E; 10) रूपमोषधीव° B; °न्पुण्ये E; 11) °गानिनानि E; 12) यदहराचा° E; 13) यशस्व B; 14) स्वपतमाहुः E; 15) बोबुधेयेति B.

पीयानिव मन्यमानस्तेन तं क्रोधमवरुन्द्धे यो ऽस्य वराद्धे भवति 'तस्य ह[1] स्नातस्य[1] क्रोधाः[2] श्नाघीयसं विशन्ते' ऽथाद्विः श्नाघमानो न स्नायात्तेन तां[3] श्नाघामवरुन्द्धे यास्वाप्सु भवति 'स ह स्नातः[4] श्नाघीयो ऽन्येभ्यः श्नाघ्यते' ऽथैतद्ब्रह्मचारिणो रूपं यत्कुमार्यास्तां[5] नग्नां[6] नोदीक्षेतेति[7] वेति वा मुखं विपरिधापयेत्तेन[8] तद्रूपमवरुन्द्धे यदस्य कुमार्यां[9] भवति 'तं ह स्नातं कुमारीमिव निरीक्षन्ते[10]' ऽथैतद्ब्रह्मचारिणः पुण्यो गन्धो य ओषधिवनस्पतीनां तासां पुण्यं गन्धं प्रच्छिद्य नोपजिघ्रेत्तेन तं पुण्यं गन्धमवरुन्द्धे यो ऽस्यौषधिवनस्पतिषु[11] भवति 'स ह स्नातः पुण्यगन्धिर्भवति' ॥ २ ॥

स वा एष उपयंश्चतुर्धा पैत्यग्निं[12] पादेनाचार्यं पादेन[13] ग्रामं पादेन मृत्युं[14] पादेन 'स यदरण्यः समिध[15] आहृत्य[15] सायंप्रातरग्निं[16] परिचरेत्तेन तं पादमवरुन्द्धे यो[17]

---

1) Fehlt in B; 2) क्रोधात् C; क्रोधान् E; Der Plural ist nicht deutlich; vielleicht क्रोध : श्नाघीयसं विशति zu lesen; 3) So corr.; die hss. तं; B त; 4) स्नातं E; 5) यत् fehlt in C; 6) नग्नान् B; 7) So corr.; A, B und C haben: नोदीक्षेदेति; E नोदीक्ष्येदेति; 8) वि fehlt in E; 9) कुमर्यां B; 10) °क्षते E; 11) °तीषु B; 12) उपयांश्च° A, B und C; 13) पादे पादेन B; 14) मृत्यु E; 15) समिधाहृत्य B; समिधा आहृत्य C; 16) प्रातरग्नि E; 17) Von यो bis यो ऽस्याचार्ये fehlt in C.

ऽस्याग्नौ भवति ' स यदहरहराचार्याय कर्म करोति तेन तं पादमवरुन्द्धे यो ऽस्याचार्ये भवति ' स यदहरहर्ग्रामं प्रविश्य[1] भिक्षामिव[2] परीप्सति न मैथुनं तेन तं पादमवरुन्द्धे यो ऽस्य[3] ग्रामे[4] भवति[5] ' स यत्क्रुद्धो वाचा न कंचन हिनस्ति पुरुषात्पुरुषात्पापीयानिव[6] मन्यमानस्तेन तं पादमवरुन्द्धे यो ऽस्य मृत्यौ भवति ' ॥ ३ ॥

पञ्च ह वा एते ब्रह्मचारिण्यग्नयो धीयन्ते ' द्वौ पृथग्घस्तयोर्मुखे हृदय उपस्थ एव पञ्चमः ' स यद्दक्षिणेन पाणिना स्त्रियं न स्पृशति तेनाहरहर्ऽयाज्ञिनां लोकमवरुन्द्धे ' यत्सव्येन तेन प्रव्राज्ञिनां ' यन्मुखेन तेनाग्निप्रस्कन्दिनां ' यद्धृदयेन[7] तेन शूराणां ' यदुपस्थेन तेन गृहमेधिनां ' तैश्चेत्स्त्रियं पराहरत्यनग्निरिव[8] शिष्यते ' स यदहरहराचार्याय कुले ऽनुतिष्ठते सो ऽनुष्ठाय ब्रूयाद्धर्म गुप्तो[9] मा गोपायेति ' धर्मो हैनं गुप्तो गोपायति[10] ' तस्य ह प्रज्ञा[11] श्वः श्वः श्रेयसी श्रेयसीह भवति ' धाय्येव[12] प्रतिधीयते ' स्वर्गे लोके पितृन्निदधाति[13] ' तात्तवं न वसीत '

---

1) प्रविश्यति C; 2) भिक्षामिव A pr. man. und B; 3) स्यं B; 4) यामे B; 5) भवन्ति E; 6) पुरुषात् steht nur einmal in C; 7) यद्धृदयेन B und C; 8) पराहरति ??: man erwartet doch ein Verbum mit der Bedeutung „berühren"; 9) °ऽर्मगुप्तगुप्तो A, C und E; 10) Diese Stelle ist nicht richtig überliefert; 11) प्रज्ञां A pr. m. प्रज्ञा: B und E; 12) ?, धाय्येव B, C und E; 13) °दध्यति B.

यस्तात्तवं वस्ते क्षत्रं वर्धते न ब्रह्म[1]' तस्मात्तात्तवं न वसीत[2] ब्रह्म वर्धतां मा[3] क्षत्रमिति 'नोपर्यासीत' यदुपर्यास्ते प्राणमेव तदात्मनो ऽधरं कुरुते यद्धातो वदत्यंध[4] एवासीताधः शयीताधस्तिष्ठेदधो व्रजेदेवं ह स्म वै तत्पूर्वे ब्राह्मणा ब्रह्मचर्यं चरन्ति 'तं ह स्म तत्पुत्रं भ्रातरं वोपतापिनमाहुरुपनयेतैनमित्या समिद्भारात्स्वरिष्यन्तो ऽन्नमद्यादेयाह जघनमाहुः स्नापयेतैनमित्या समिद्भारान्न क्वेतानि व्रतानि भवन्ति 'तं चेच्छ्यानमाचार्यो ऽभिवदेत्स प्रतिसंक्षाय[5] प्रतिशृणुयात्तं चेच्छ्यानमुत्थाय तं चेदुत्थितमभिप्रक्रम्य तं चेदभिप्रक्रान्तमभिपलायमानमेवं ह स्म वै तत्पूर्वे ब्राह्मणा[6] ब्रह्मचर्यं चरन्ति 'तेषां ह स्म वैषा पुण्या कीर्तिर्गच्छत्या ह वा अयं सो ऽद्य[7] गमिष्यतीति' ॥ ४ ॥

जनमेजयो ह वै पारीक्षितो मृगयां चरिष्यन्हंसाभ्यामसिष्यन्नुपावतस्थ[8] इति 'तावूचतुर्जनमेजयं पारीक्षितमभ्याजगाम[9]' स होवाच 'नमो वां भगवती को नु

---

1) ब्रह्मं B; 2) वसीदू E; 3) म B; 4) वदत्यद्य E; 5) प्रतिसहाय A; प्रतिहाय E; 6) ब्राह्मणां E; 7) ऽध्य E; सो ऽद्य ist nicht deutlich; 8) °न्हंसाभ्यामसिक्षन्नु° A pr. man. und B; °न्हंसाभ्यामशिष्यन्नु° E; 9) Man erwartet einen Dual.; इति fehlt; diese ganze Stelle ist sehr verdorben.

भगवन्तावितिं ' तावूचतुर्दक्षिणाग्निश्चाहवनीयश्चेति ' स होवाच नमो वां भगवन्तौ तदाकीयतामितीहोपारामम्-त्यपि[1] किल देवा न रमन्ते न[2] हि[2] देवा[2] न[2] रमन्त[2]' ऽपि चैकोपारामाद्देवा[3] आरामसुपसंक्रामन्तीति[4]' स होवाच नमो वां भगवन्तौ किं पुण्यमितिं ब्रह्मचर्यमितिं किं लौक्यमितिं ब्रह्मचर्यमेवेतिं तत्को वेद इतिं दन्ता-वलो धौम्रो[5]' ऽथ खलु दन्तावलो धौम्रो[6] यावति तावति काले पारीक्षितं जनमेजयमभ्याजगामं तस्मा उत्थाय[7] स्वयमेव विष्टरं निदधौ[8]' तमुपसंगृह्य पप्र-च्छाधीहि भो किं पुण्यमितिं ब्रह्मचर्यमितिं किं लौक्य-मितिं ब्रह्मचर्यमेवेतिं तस्मा एतत्प्रोवाचाष्टाचत्वारिंश-द्वर्षं सर्वं वेदब्रह्मचर्यं तच्चतुर्धा वेदेषु व्युह्य द्वादशवर्षं[9] ब्रह्मचर्यं द्वादशवर्षाण्यवरार्धमंपि स्नायंश्चरेत्यथाशक्त्यपरं[10]' तस्मा उक्तस्यृषभौ[11] सक्तुं ददावंप्यपकीर्तितमाचार्यो ब्र-ह्मचारीत्येक आङ्गराकाशमधिदैवतमंथाध्यात्मं ब्राह्मणो व्रतवांश्चरणवान्ब्रह्मचारी' ॥ ५ ॥

---

1) आकीयताम् ? ; °तामितिहोपा° A pr. m.; 2) Fehlt in E; 3) चैकोपरादूदेवा A; 4) °क्रामतीति E; 5) धौम्रौ C und E; hinter धौम्रो erwartet man इति; 6) धौम्रौ E; 7) उच्छ्राय B; 8) निदाधै B; 9) °वर्ष E; 10) °शक्त्यापरं C; 11) Corrupt; vielleicht तस्मा उ ह स ऋषभौ.

ब्रह्म ह वै प्रजा मृत्यवे संप्रायच्छद्ब्रह्मचारिणमेव [1] न संप्रददौ 'स होवाचाश्यामस्मिन्निति [2] 'किमिति' यां रात्रीं समिधमनाहृत्य [3] वसेत्तामायुषो [4] ऽवरुन्धीयेति' तस्माद्ब्रह्मचार्यहरहः समिध आहृत्य [5] सायंप्रातरग्निं परिचरेन्नोपर्युपसादयेदथ प्रतिष्ठापयेच्चेदुपर्युपसादयेऽन्नीमूतवर्षी तदहः पर्जन्यो भवति 'ते [6] देवा अब्रुवन्ब्राह्मणो वा अयं ब्रह्मचर्यं चरिष्यति 'ब्रूतास्मै [7] भिक्षा इति गृहपतिर्ब्रूत ब्रह्मचारी गृहपत्या इति 'किमस्या [8] वृञ्जीतादद्यात्या [9] इतीष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति [10] 'तस्माद्ब्रह्मचारिणे [11] ऽहरहर्भिक्षां [12] दद्याद्गृहिणी [13] मा मायमिष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति [14] 'सप्तमीं [15] नातिनयेत्सप्तमीमतिनयन्न [16] ब्रह्मचारी भवति 'समिद्धेत्ते सप्तरात्रमचरितवान्ब्रह्मचारी पुनरुपनेयो भवति' ॥ ६ ॥

नोपरिशायी स्यान्न गायनो न नर्तनो [17] न सरणो न निष्ठीव्यदुपरिशायी भवत्यभीक्ष्णं [18] निवासा ज्ञायते [19]'

---

1) So corr.; die hss. संप्रयच्छ°; °रिणामेव E; °रिणामेवं A; 2) So corr.; die hss. होवाचास्या°; 3) °मानाहृत्य C; 4) °युषा E; 5) आहृत्य E; 6) Fehlt in E; 7) ब्रूतासौ C; 8) किं मत्स्या C; 9) °तादद्यात्य E; 10) इतीष्टापूर्ते° B; 11) °चारिणो E; 12) °क्षीं E; 13) So ed. B. Ind. die hss. °दृहणी; 14) So corr.; die hss. मेयमि° ed. B. Ind. var. l. मोयमि°; 15) सप्तमी C; 16) °तिनयन A; °तिनयं नं B; °तिनयनं E; 17) नर्तनौ E; 18) भवत्याभीक्ष्णं B; 19) ज्ञायते E.

यद्कायनो भवत्यभीद्घणाश[1] आक्रन्दान्धावत्ते 'यन्नर्तनो भवत्यभीद्घणाशः[2] प्रेतान्निर्द्धरत्ते 'यत्सरणो भवत्यभीद्घणाशः[3] प्रजाः संविशत्ते 'यन्निष्ठीवति मध्य[4] एव तदात्मनो[5] निष्ठीवति 'स चेन्निष्ठीविद्दिवो नु मां यद्त्रापि मधोरद्कं[6] यद्त्रापि रसस्य म इत्यात्मानमनुमल्लयते 'यद्त्रापि मधोरद्कं निरष्ठविषमस्मृतमग्निश्च[7] तत्सविता च पुनर्मे ज्ञठरे[8] धत्तां[9] ॥ यद्त्रापि रसस्य मे परापपातास्मृतं तद्दोपद्धयामद्दे तन्म आप्यायतां पुनरिति 'न श्मशानमातिष्ठित्स चेद्भितिष्ठेदुद्कं द्धस्ते कृत्वा यदीदमृतुकाम्येत्यभिमल्य[10] ज्ञपन्त्संप्रोद्य परिक्रामेत्समवायोपरिव्रजेद्यदीदमृतुकाम्याघं[11] रिप्रमुपेयिम[12] । अन्धः[12] श्लोण इव द्धीयतां मा नो ऽन्वागादघं यत इत्यंथ द्धैतद्देवानां परिषूतं यद्ब्रह्मचारी 'तद्प्येतदृचोक्तं देवानामेतत्परिषूतमनभ्याद्रूढं[13] चरति रोचमानं तस्मिन्सर्वे पशवस्तत्र[14] यज्ञास्तस्मिन्नन्नं सद्द देवताभिरिति ब्राह्मणम्' ॥ ७ ॥

प्राणापानौ ज्ञनयन्निति शङ्कस्य मुखे[15] मद्दर्षेर्वसि-

---

1) °भीत्नूश B und E; 2) भवति भीत्तश: B; °भीत्नूद्दन: E; 3) °भीत्नु: श: B; °भीत्नूश E; 4) मध्ये C und E; 5) तदात्मानो E; 6) मधोरद्कं E; 7) °ग्नीश्च B; 8) ज्ञरे E; 9) धात्तां E; 10) यदीदं मृ° A; यदीदमृत्यु° C; 11) °त्समयामोपरि° A sec. m.; समयाय ??; °मृत्युकाम्याघं C; 12) °यिमान्धः A, B und E; 13) °भ्याद्रूढं B; 14) उपश्राव° B; 15) So corr.; alle hss. मूले.

ष्ठस्य[1] पुत्र एतां वाचं ससृजे शीतोष्णाविक्षोत्सौ प्रादुर्भवेयातामिति[2]' तथा तच्छश्वदनुवर्तते' ऽथ[3] खलु त्रिपाणमध्ये वसिष्ठशिला[4] नाम प्रथम आश्रमो' द्वितीयः कृष्णाशिलास्तस्मिन्वसिष्ठः समतपद्विश्वामित्रऽजमदग्नी[5] जामदग्ने तपतो[6]' गौतमभरद्वाजौ[7] सिंधौ[8] प्रभवे[9] तपतो' गुंगुर्गुंगुवासे[10] तपत्यृषिर्ऋषिद्रोणे[11] ऽभ्यतपदगस्त्यो ऽगस्त्यतीर्थे तपति' दिव्यत्रिर्हि[12] तपति[13]' स्वयंभूः कश्यपः कश्यपतुङ्गे[14] ऽभ्यतपदुलवृकर्नुतरक्षुः[15] श्वा वराहचिल्वठिबब्रुकाः सर्पदंष्ट्रनः[16] संकनुकृणवानाः[17] कश्यपतुङ्गदर्शनात्सरणावाढात्सिद्धिर्भवति' ब्राह्मं वर्षसहस्रमृषिवने[18] ब्रह्मचार्येकपादेनातिष्ठति[19]' द्वितीयं वर्षसहस्रं मूर्धन्येवामृतस्य[20] धारामाधारयद्ब्राह्मणेष्टाचत्वारिंशद्वर्षसहस्राणि[21] सलिलस्य पृष्ठे शिवो ऽभ्यतपत्तस्मात्तप्ता-त्तपसो भूय एवाभ्यतपत्तदप्येता ऋचो ऽभिवदन्ति प्राणापानौ जनयन्निति ब्राह्मणम्' ॥ ८ ॥

---

1) महर्षिर्व° A und B; महर्षेर्वशि° E; 2) °र्भविवेया° B; °भवेत्याघातामिति E; 3) य B; 4) वशि° C; 5) °ऋजामदग्नी B; 6) तापतो B; 7) गोतम° B, C und E; 8) सिंहो A, C und E; 9) So ed. B. Ind.; die hss. प्रभे; 10) गुर्गुगुवासे B; गुर्गुगुर्वासे E; 11) °षिर्द्रोणे A, C und E; 12) दिव्यत्रिरह A, B und E; 13) भवति C; 14) कशप° C; 15) Sic.! 16) ??; 17) कृवाना: B; 18) वार्ष° A; 19) °तिष्ठ B, C und E; 20) °वमृतस्य C; 21) धीरामाधारया ब्राह्मा° E; धारामाराधयन्ब्रा° C; धारामधारयद्ब्रह्मण्य° A.

एकपाद्द्विपद[1] इति ' वायुरेकपात्तस्याकाशं पाद श्चन्द्रमा द्विपात्तस्य[2] पूर्वपक्षापरपक्षौ पादावादित्यस्त्रिपात्तस्येमे लोकाः पादा ' अग्निः षट्पादस्तस्य पृथिव्यन्तरिक्षं[3] द्यौराप ओषधिवनस्पतय इमानि भूतानि पादास्तेषां सर्वेषां वेदा[4] गतिरात्मा प्रतिष्ठिताश्चतस्रो ब्रह्मणः शाखा ' अधो अङ्कः षडिति मूर्तिराकाशश्चेत्यृचा मूर्तिर्याजुषी गतिः ' साममयं[5] तेजो ' भृग्वङ्गिरसा मायैतद्ब्रह्मैव यज्ञश्चतुष्पाद्द्विःसंस्थित इति ' तस्य भृग्वङ्गिरसः[6] संस्थे[7] ' अथो आङ्करेकसंस्थित इति ' यद्धोतर्चा मण्डलैः करोति पृथिवीं[8] तेनाप्याययत्यैतस्यां[9] द्यग्निश्चरति ' तदप्येतदृचोक्तमग्निवासाः पृथिव्यसितज्जूरिति '[10] यदध्वर्युर्यजुषा करोत्यन्तरिक्षं तेनाप्याययति ' तस्मिन्वायुर्न निविशते[11] कतमच्च[12] नाङ्करिति ' तदप्येतदृचोक्तमन्तरिक्षे पथिभिर्द्धीयमाणो[13] न नि विशते[14] कतमच्च[15] नाङ्कः । अपां योनिः प्रथमजा ऋतस्य क्व[16] स्विज्जातः[17] कुत आ बभूवेति ' यदुद्गाता साम्ना करोति दिवं तेनाप्याययति ' तत्र द्यादित्यः शुक्रश्चरति ' तदप्येत-

---

1) एकापा° A; 2) द्विपा° B; 3) °रिक्ष C; 4) वेद् C;
5) °मय E; 6) भृग्वङ्गिर् A; 7) स्थे B; 8) पृथिवी B; 9) तेनास्याय° E;
10) °तनूरिति E; °सिनुतरिति C; 11) निविशान्ते B; 12) कतमच्चा B;
13) Sic.! B. Ind. var. l. °र्हीयमाणो; 14) विशेते B; 15) कतमच्चा B;
16) यु B; 17) सिद्गात: C.

दृचोक्तमुच्चा[1] पतन्तमरुणं सुपर्णमिति[2] 'यद्ब्रह्मचर्या काण्डैः करोत्यपस्तेनाप्यायय्यति' चन्द्रमा व्यप्सु चरति' तदप्येतदृचोक्तं चन्द्रमा अप्स्वन्तरिति[3]' तासामोषधिवनस्पतयः काण्डानि' ततो मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैर्यज्ञो[4] वर्तते' ऽद्भिः कर्णाणि प्रवर्तन्ते' ऽद्भिः[5] सोमो ऽभिषूयते[6]' तद्यद्ब्रह्माणं[7] कर्णाणि कर्मण्यामन्त्रयत्यपस्तेनानुज्ञानात्येषो[8] व्यस्य भागस्तद्यथा भोद्यमाणो[9] ऽप एव प्रथममाचामयेदप उपरिष्टादेवं यज्ञो ऽद्भिरेव प्रवर्तते' ऽप्सु संस्थाप्यते[10]' तस्माद्ब्रह्मा[11] पुरस्ताद्धोमसंस्थितव्होमैर्यज्ञो[11] वर्तते' ऽन्तरा हि पुरस्ताद्धोमसंस्थितव्होमैर्यज्ञं[12] परिगृह्णात्यन्तरा हि भृग्वङ्गिरसो वेदानाडुह्य[13] भृग्वङ्गिरसः सोमपानं मन्यन्ते' सोमात्मको व्ययं वेद' तदप्येतदृचोक्तं सोमं मन्यते पपिवानिति' तद्यथेमां[14] पृथिवीमुदीर्णां द्योतिषा धूमायमानां[15] वर्षं शमयत्येवं ब्रह्मा भृग्वङ्गिरोभिर्व्याहृतिभिर्यज्ञस्य विरिष्टं[16] शमयत्यग्निरादित्याय[17]

---

1) °मुच्च A pr. m. 2) संपर्णमिति E; 3) So corr.; die hss. अप्सन्तरिति; 4) °हरसं गन्धैर्यज्ञो E; 5) Fehlt in C; 6) विषूयते B; विषुयते C; 7) °ह्मणां E; 8) °त्रयन्त्य° B und E; 9) भोक्तमाणो A, B und C; 10) °प्याते B; 11) ब्रह्मो oder यज्ञो ist Interpolation; 12) पुरस्ताठोमं सं° B; °र्यज्ञे A und E; 13) वेदानोदूह्य A, B und E; 14) धतद्यथेमां B; तद्प्येमां E; 15) °यमनां C; 16) विष्टं C; विष्टेरिस्यं E; 17) °ग्निरादित्या C und E.

शमयत्येते[1] ऽङ्गिरस ' एत इदं सर्वं समाप्नुवन्ति ' वायुरापश्चन्द्रमा इत्येते भृगव ' एत इदं सर्वं समाप्याययत्येवैकमेव[2] संस्थं भवतीति ब्राह्मणम् ' ॥ १ ॥

विचारी ह वै काबन्धिः कबन्धस्याथर्वणस्य[3] पुत्रो मेधावी[4] मीमांसको[5] ऽनूचान आस[6] ' स ह स्वेनातिमानेन मानुषं वित्तं नेयाय ' तं मातोवाच ' त एवैतदन्नमवोचंस्त[7] इम[8] एषु कुरुपञ्चालेष्वङ्गमगधेषु[9] काशिकौशलेषु[10] शाल्वमत्स्येषु[11] सवशोशीनरेषूदीच्येष्वन्नमदन्तीत्यथ[12] वयं तवैवातिमानेनानाध्याः[13] स्मो ' वत्स वाहनमन्विच्छेति ' स[14] मान्धातुर्यौवनाश्वस्य[14] सार्वभौमस्य राज्ञः सोमं प्रसूतमाजगाम ' स सदो ऽनुप्रविश्यर्त्विजश्च यजमानं चामन्त्रयामास[15] ' तथाः प्राच्यो नद्यो वहन्ति[16] याश्च दक्षिणाच्यो[17] याश्च[18] प्रतीच्यो[19] याश्चोदीच्यस्ताः सर्वाः पृथङ्नामधेया[20] इत्याचक्षते[21] तासां समुद्रमभिपद्यमा-

1) Von ग्राम° bis इदं fehlt in B; B fügt इत्येव ein; 2) समास्याप्या° E; 3) कवन्धः स्या° A; 4) मेध्यवी B; 5) मिमांसको E; 6) आ A; 7) °वोचस्त A und B; 8) इमम् B und E; 9) कुरुपाञ्चा° E; 10) काशकौ° A; काशको° C und E; 11) शाल्वमत्सेषु C; शात्वमत्सेषु E; 12) So corr.; शवस उशीत° A; शवस उशीन° B; सवस्व उशीन C; सुवस उशीन° E; 13) So corr.; °नेनाध्यास्मो A und E; नेनानाद्यास्मो B und C; 14) संतांध्यतुर्यौवनाश्च B; 15) °मस C; 16) वहति B; 17) °पाचो B; °पाश्च्यो C; 18) याचा B; 19) पतीच्यो B; प्रतीश्च्यो C; 20) °धेयोऽ A und C; °धेयाऽ B; °धेरी E; 21) धीतिगचक्षते E.

नानां क्रियते नामधेयं समुद्र इत्याचक्षते ' एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्यानाः[1] सपुराणाः सस्वराः ससंस्काराः[2] सनिरुक्ताः सानुशासनाः[3] सानुमार्जनाः[4] सवाकोवाक्यास्तेषां[5] यज्ञमभिपद्यमानानां[6] क्रियते नामधेयं[7] यज्ञ इत्येवाचक्षते ' ॥ १० ॥

भूमेर्ह वा एतद्विच्छिन्नं[8] देवयजनं[9] यद्प्राक्प्रवणं[10] यदनुदक्प्रवणं यत्कृत्रिमं[11] यत्समविषममिदं[12] ह त्वेव देवयजनं यत्समं[13] समूल्मविदग्धं[13] प्रतिष्ठितं[13] प्रागुदक्प्रवणं[13] समं समास्तीर्णमिव[14] भवति यत्र ब्राह्मणस्य ब्राह्मणतां विद्याद्ब्रह्मा ब्रह्मत्वं करोतीति ' वोचे[15] ह्नन्दस्तन्न[15] विन्दामो[16] येनोत्तरमेमह्रीति ' तान्ह पप्रच्छ[17] किं विद्वान्होता होत्रं[18] करोति किं विद्वानध्वर्युराध्वर्यवं करोति किं विद्वानुद्गातौद्गात्रं करोति किं विद्वान्ब्रह्मा[19] ब्रह्मत्वं करोतीति ' वोचे[20] ह्नन्दस्तन्न[20] विन्दामो येनो-

---

1) सान्व्याख्याना: A; सन्वाख्याना: C; 2) संसंस्कारा: B; संस्कारा: C und E; 3) सानुसशासनर्: E; 4) सानुमार्जेता: E; 5) सवाकावाक्यस्तेषां E; 6) यज्ञमति° C; 7) माम° E; 8) °छिन्न E; 9) °यज्ञन E; 10) यत्प्रा° A und B; 11) यत्कर्तृमं E; 12) यत्समं वि° B; 13) E hat यद्प्राक्प्रवणं यदनुदक्य; 14) °णामिव A; 15) ? ?; वोचे: ह्नदस्तन्न B; वोचे: ह्नन्दस्तं न C; वोधे ह्नन्दस्तन्न E; 16) विदामो A; 17) प्रपच्च E; 18) होत्रं B und E; 19) ब्रह्म A; fehlt in B; 20) Vid. 15.

त्तरमेमक्षीति 'ते ब्रूमो वागेव क्षोता क्षौत्रं करोति' वाचो हि स्तोमाश्च वषट्काराश्चाभिसंपद्यन्ते 'ते ब्रूमो[1] वागेव क्षोता वाग्ब्रह्म[2] वाग्देव[3] इति 'प्राणापानाभ्यामेवाध्वर्युराध्वर्यवं करोति 'प्राणप्रणीतानि[4] क्ष भूतानि प्राणप्रणीताः[5] प्रणीतास्ते[5] ब्रूमः प्राणापानावेवाध्वर्युः[6] प्राणापानौ[7] ब्रह्म प्राणापानौ देव इति 'चक्षुषैवोद्गातौद्गात्रं[8] करोति 'चक्षुषा क्षीमानि भूतानि पश्यत्यंधो चक्षुरेवोद्गाता चक्षुर्ब्रह्म[9] चक्षुर्देव[10] इति[11] 'मनसैव ब्रह्मा[12] ब्रह्मत्वं करोति[13] 'मनसा हि तिर्यङ्क[14] दिश[15] ऊर्ध्वं च यच्च किं[16] च मनसैव करोति[17] तद्ब्रह्म[18] 'ते ब्रूमो[19] मन एव ब्रह्मा मनो ब्रह्म मनो देव इति' ॥ ११ ॥

तद्यथा क्ष वा इदं यजमानश्च याजयितारश्च दिवं ब्रूयुः पृथिवीति पृथिवीं[20] वा[21] द्यौरिति ब्रूयुस्तद्न्यो[22] नानुजानात्येतामेवं[23] नानुजानाति यदेतद्ब्रूयादथ नु कथ-

---

1) ब्रुमो B; 2) वागब्रह्म E; 3) वागदेव E; 4) प्राणाप्र° E; 5) Corrupt; प्रणीतस्ते A pr. m.; 6) प्राणापा° E; 7) प्राणापानौ E; 8) चक्षुषैवो° B; चक्षुषैवौ° C; 9) चक्षु ब्रह्म C; 10) चक्षु देव B und C; 11) हीत B; 12) ब्राह्मा E; 13) करोतीति A; 14) तियङ्क C; तिर्यक E; 15) दिग्ना E; 16) कि E; 17) करो E; 18) तद्ब्राह्म E; 19) ब्रुमो E; 20) पृथिवो A pr. m; 21) So corr.; die hss. haben वाग्; 22) ब्रुयु° B und E; 23) न्यानुज्ञाताक्षेत्येतामेव E.

मिति ' क्रोतेत्येव क्रोतारं ब्रूयाद्वागिति वाचं ब्रह्मेति ब्रह्म देव इति देवमध्वर्युरित्येवाध्वर्यु[1] ब्रूयात्प्राणापा-नाविति[2] प्राणापानौ ब्रह्मेति ब्रह्म देव इति देवमुद्गा-तेत्येवोद्गातारं[3] ब्रूयाच्चक्षुरिति चक्षुर्ब्रह्मेति ब्रह्म देव इति देवं ब्रह्मेत्येव ब्रह्माणं ब्रूयान्मन इति मनो ब्र-ह्मेति ब्रह्म देव इति देवम् ' ॥ १२ ॥

नानाप्रवचनानि ह वा एतानि भूतानि भवन्ति ' ये चैवासोमपं याजयन्ति ये च सुरापं[4] ये[5] च ब्राह्मणं विच्छिन्नं[6] सोमयाजिनं तं प्रातः समित्पाणय उपोदेयुरु-पायामो[7] भवन्तमिति ' किमर्थमिति ' यानेव[8] नो[9] भवां-स्तान्ब्रूयः[10] प्रश्नानपृच्छत्तानेव[11] नो भवान्व्याचक्षीतिति[12] ' तथेति[13] ' तेभ्य एतान्प्रश्नान्व्याचचष्टे[14] ' तथेन[15] ह वा इदं विद्यमानं चाविद्यमानं[16] चाभिनिदधाति[17] तद्ब्रह्म ' तद्यो वेद स ब्राह्मणो ऽधीयानो ऽधीत्याचक्षत[18] इति ब्राह्मणम् ' ॥ १३ ॥

---

1) इत्येवाध्वर्युम् fehlt in B; 2) ब्रुवा° B; 3) देवा उद्गातारं B; 4) सुरापां B; 5) चे ये C; 6) व्युछिन्नं B; व्यछिन्नं C und E; 7) उपो-देयुरुपायामो C; 8) यानेवम E; 9) B fügt व ein; 10) भवांस्ता क्रूः B und C; भवंस्तान्क्रूः E; 11) So corr.; die hss. °पृच्छयानेव; 12) So corr.; A, C und E °येति; B °यति; 13) तेथैति B; 14) एतान्प्रश्ना व्याच° B; व्याचचष्टे ! ! (sic.) vid. p. २३ z. 2; 15) तथे न C; 16) Zwei-mal in B; 17) °निदद्ध्यति B; 18) ऽधीत्य corrupt.

अथातो देवयजनान्यात्मा देवयजनं । श्रद्धा देवयजन-
मृत्विजो देवयजनं । भौमं[1] देवयजनं । तद्धा एतदात्मा देव-
यजनं यदुपव्यायच्छमानो वानुपव्यायच्छमानो वा[2] शरी-
रमधिवसत्येष[3] यज्ञ । एष[4] यजत[4] । एतं[4] यजन्त[4] । एत-
द्देवयजनमेतच्छ्रद्धा[5] देवयजनं । यदेव कदाचिदाद्ध्याच्छ्रद्धा
त्वेवैनं नातीयात्तद्देवयजनमेतदृत्विजो[6] देवयजनं । यत्र[7]
क्वचिद्ब्राह्मणो विद्यावान्मन्त्रेण[8] करोति तद्देवयजनमे-
तद्भौमं देवयजनं । यत्रापस्तिष्ठन्ति यत्र स्यन्दन्ति प्र तद्ध-
रुत्युद्धरन्ति[9] तद्देवयजनं । यत्समं[10] समूलमविदग्धं[11]
प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति यस्य[12]
श्वभ्र ऊर्मी[13] वृक्षः पर्वतो नदी पन्था वा पुरस्तात्स्यान्न
देवयजनमात्रं पुरस्तात्पर्यवशिष्येन्नोत्तरतो[14] ऽग्नेः पर्यु-
पसीदेरन्निति[15] ब्राह्मणम् । ॥ १४ ॥

अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमाश्नात्सा[16]
गर्भमधत्त[17] । तत आदित्या अजायन्त[18] । य एष ओदनः

---

1) भौम C; 2) Fehlt in B; 3) °वसतो ष B; 4) Fehlt in E; 5) °च्छ्रठो E; 6) मालोयात्तद्दे° E; 7) Von यत्र bis यत्रापस्ति° fehlt in B; 8) So B. Ind.; die hss. विद्याविन्म°; 9) तद्धरत्यु° A sec. man.; °द्धरति B; 10) तत्यत्समं A; 11) °विदाधं E; 12) यस्यन्दं B; 13) कुर्मो B; उर्मो C und E; 14) °त्तरता B und E; 15) पर्यपसी° B; 16) So corr.; die hss. °मप्यात्सा; 17) °धत्तं E; 18) अजायन्त A pr. m.; अजायन्तं E.

पच्यत आरम्भणमेवैतत्क्रियत आक्रमणमेव 'प्रादेशमात्रीः समिधो भवन्त्येतावान्क्यात्मा प्रजापतिना संमितो 'ऽग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छतैषास्य[1] घृत्या[2] तनूर्यद्घृतं[3] 'यद्घृतेन[4] समिधो ऽनक्ति ताभ्यामेवैनं तत्तनूभ्यां समर्धयति[5] 'यन्निर्मार्गस्याद्धात्यवगूर्त्या[6] वै वीर्यं क्रियते 'यन्निर्मार्गस्याद्धात्यवगूर्त्या[6] एव 'संवत्सरो[7] वै प्रजनन-मग्निः[8] प्रजननमेतत्प्रजननं 'यत्संवत्सर ऋचाग्नौ समिध-माद्धाति प्रजननादेवैनं तत्प्रजनयिता[9] प्रजनयत्यंभक्तर्तु-[10] र्वै पुरुषो 'न ह्रि तद्वेद यमृतुमभिजायते[11] 'यन्नक्षत्रं[12] तदाप्नोति 'य एष ओदनः पच्यते योनिरेवैषा क्रियते 'यत्समिध आधीयन्ते रेतस्तद्धीयते[13] 'संवत्सरे[14] वै रेतो ह्रितं प्रजायते 'यः[15] संवत्सरे पर्येति[16] ऽग्निमाधत्ते प्रजा-तमेवैनमाधत्ते[17] 'द्वादशसु रात्रीषु पुरा संवत्सरस्यार्धेया-स्ता[18] ह्रि संवत्सरस्य प्रतिमाथो[19] तिसृष्वथो[20] द्वयोरथो

---

1) So corr.; die hss. °षास्य; 2) So corr.; धृया A und C; धृत्या B; धत्या E; 3) °द्रुघत E; 4) यद्धून B; यद्धृतेन C; 5) °यतिं E; 6) So corr.; die hss. °वकृत्या; 7) संवत्सरा E; 8) प्रजानमग्निः E; 9) °नविसेत B; 10) So corr.; °त्यवत्तर्तु B und C; °त्यवत्तुन A; °त्यावर्त्तु E; 11) So corr.; यद्तु° A, B und E; यद्तु° C; 12) यं नस्तं त्तत्रं B; 13) So corr.; die hss. °स्तद्धीयते; 14) So corr.; die hss. संवत्मरो; 15) So corr.; die hss. यो; 16) पयेति E; 17) So corr.; प्रजापतिरेवै° A pr. m. C und E; प्रजतिरेवै° A sec. m. und B; 18) So corr.; die hss. °धेयात्रा; 19) So corr.; die hss. प्रतिमा अथो; 20) तिषृष्य B; तिषृयो E.

पूर्वेद्युराधेयास्त[1] एवाग्निमादधानेनादित्या वा इत उत्त-
मा[2] अमुं[2] लोकमायंस्ते[2] पथिरक्षयस्त[3] इयक्षमाणं
प्रतिनुदन्त[4] ' उच्छेषणभाजा वा आदित्या ' [यदुच्छिष्टं] '
यदुच्छिष्टेन समिधो ऽनक्ति तेभ्य एव प्रावोचत्तेभ्य[5] एव
प्रोच्य स्वर्गं लोकं याति[6] ' ॥ १५ ॥

प्रजापतिरथर्वा देवः स तपस्तप्त्वैतं[7] चातुःप्राश्यं[8]
ब्रह्मौदनं निरमिमीत[9] चतुर्लोकं[10] चतुर्दैवं चतुर्वेदं
चतुर्होत्रमिति ' चत्वारो वा इमे लोकाः पृथिव्यन्तरिक्षं
द्यौरापः इति ' चत्वारो वा इमे देवा अग्निर्वायुरादित्यश्च-
न्द्रमाश्चत्वारो वा इमे वेदा ऋग्वेदो[11] यजुर्वेदः सामवेदो
ब्रह्मवेद इति ' चतस्रो वा इमा[12] होत्रा होत्रमाध्वर्यव-
मौद्गात्रं ब्रह्मत्वमिति ' तदप्येतदृचोक्तं चत्वारि शृङ्गा त्रयो
अस्य पादा द्वे शीर्षे सप्त[13] हस्तासो अस्य[14]। त्रिधा बद्धो
वृषभो रोरवीति महो देवो मर्त्यां[15] आविवेशेति '
चत्वारि शृङ्गेति वेदा वा एत उक्तास्त्रयो अस्य[16] पादा

---

1) So corr.; die hss. °धेयात्ते; B पुंपूर्वेषु°; 2) So corr.; die hss. उत्तरमेष मे ऽमुष्मिं लोक; 3) So corr.; die hss. °रक्षन्त इयन्त; 4) प्रति-नुदन् E; 5) So corr.; A, B und C प्रोवाच°, प्रोवाचं° E; 6) So corr.; die hss. यन्ति; 7) तपस्तप्तैतं E; 8) चतुः° E; 9) So corr.; die hss. निरमिमत; 10) Fehlt in E; 11) ऋग्वेदा E; 12) इमे A, C und E; 13) तप्ता E; 14) Fehlt in B; 15) मर्त्या E; 16) स्य A.

इति सवनान्येव 'द्वे शीर्षे इति ब्रह्मौदनप्रवर्ग्याविव' सप्त क्रस्तासो अस्येति क्रन्दांस्येव 'त्रिधा बद्ध इति मल्लः कल्पो ब्राह्मणं 'वृषभो रोरवीत्येष ह वै[1] वृषभ एष तद्रोरवीति यज्ञेषु शस्त्राणि शंसत्यृग्भिर्यजुर्भिः[2] सामभिर्ब्रह्मभिरिति 'महो देवो मर्त्यां आविवेशेत्येष[3] ह वै महान्देवो यज्ञ 'एष मर्त्यां आविवेश 'यो विद्यात्सप्त प्रवत इति प्राणानाह 'सप्त विद्यात्परावत इत्ययानानाह' शिरो यज्ञस्य यो विद्यादित्येतद्वै यज्ञस्य शिरो यन्मल्लवान्ब्रह्मौदनो 'यो ह वा एतममल्लवन्तं[4] ब्रह्मौदनमुपेयादपशिरसा[5] ह[5] वा[5] अस्य[5] यज्ञमुपेतो[5] भवति[5]' तस्मान्मल्लवन्तमेव ब्रह्मौदनमुपेयान्नामल्लवन्तमिति ब्राह्मनम्' ॥ १६ ॥

किमुपज्ञ[6] आत्रेयो[7] भवतीत्यादित्यं हि तमो जग्राह' तदत्रिरपनुनोद 'तदत्रिरन्वपश्यत्तदप्येतदृचोक्तं स्तुताय्यम-त्रिर्दिवमुन्निनाय[8]' दिवि त्वात्रिरधारयत्सूर्या[9] मासाय कर्तव इति 'तं[10] होवाच वरं वृणीष्वेति 'स होवाच

---

1) वा E; 2) शंसन्त्यृ° A, C und E; 3) °श्रेत्येव E; 4) एतमन्त्र A pr. man.; 5) So die hss.; vielleicht zu lesen: °दपशिरा ह वा अस्य यज्ञ उपेतो भवति; 6) So corr.; die hss. किमुपयज्ञ; 7) अत्रेयो A; आत्रयो B; 8) स्तुताय्यं° A, C und E; 9) त्वात्रिरधाय° E; 10) त E.

दक्षिणीया मे प्रजा[1] स्यादिति ' तस्मादात्रेयाय प्रथमं द-
क्षिणा[2] यज्ञे दीयन्त[3] इति ब्राह्मणम् ' ॥ १७ ॥

प्रजापतिर्वेदानुवाचाग्नीनाद्धीयेति ' तान्वागभ्युवाचा-
श्वो[4] वै संभाराणामिति ' तं[5] घोरात्क्रूरात्सलिलात्सरस[6]
उदानिन्युस्तान्वागभ्युवाचाश्वः[7] शम्येतेति[8] ' तथेति ' तमृ-
ग्वेद एत्योवाचाक्रमश्वं शमेयमिति ' तस्मा अभिसृप्ताय[9]
मरुद्गयं[10] ससृजे ' स एतां प्राचीं दिशं भेजे ' स होवाचा-
शान्तो न्वयमश्व इति ' तं यजुर्वेद एत्योवाचाक्रमश्वं शमे-
यमिति ' तस्मा अभिसृप्ताय[11] मरुद्गयं ससृजे ' स एतां प्रती-
चीं दिशं भेजे ' स होवाचाशान्तो न्वयमश्व[12] इति ' तं
सामवेद एत्योवाचाक्रमश्वं शमेयमिति ' केन नु त्वं शम-
यिष्यसीति ' रथंतरं नाम मे सामाघोरं चाक्रूरं च ' तेनाश्व[13]
अभिष्टूयेतेति[13] ' तस्मा अप्यभिसृप्ताय[14] तदेव मरुद्गयं
ससृजे ' स एतामुदीचीं दिशं भेजे ' स होवाचाशान्तो न्व-
यमश्व[15] इति ' तान्वागभ्युवाच शंयुमाथर्वणं[16] गच्छतेति[17] '

---

1) प्राज्ञा E; 2) So corr.; प्रथमद्° A, C und E; प्रथद्° B; 3) द्रियन्त A; 4) °वाचाश्वौ B; 5) त A pr. man.; तो E; 6) °घोराक्रू° B und C; 7) °भ्युवाचा E; 8) संमेतिते B; शंमेते C; 9) So corr.; die hss. अवि°; 10) महाद्गयं C; महद्गूयं E; 11) Vid. 9; 12) न्वा-यमश्व E; 13) So corr.; A तेनाश्वमभिष्टूयति; तेनामभिष्टूयते B; तेनाश्वमभि-ष्टूयेति C; तेनाश्वमभिष्टयते E; 14) So corr.; die hss. अप्यविसृ°; अथविसृ° C; 15) °मश्वम् E; 16) शंयूमाथर्वणो E; 17) So corr.; die hss. °थेति.

ते शंयुमाथर्वणमासीनं प्राप्योचुर्नमस्ते ग्रस्तु भगवन्नश्वः [1] शम्येतेति [2] ' तथेति [3] ' स खलु कबन्धस्याथर्वणस्य पुत्र-मामन्त्रयामास विचारिन्निति [4] 'भगो इति ह्यस्मै [5] प्रति-श्रुतं प्रतिशुश्रावाश्वः [6] शम्येतेति [7] ' तथेति [8] ' स खलु शान्त्युदकं चकाराथर्वणीभिश्चाङ्गिरसीभिश्च [9] चातनैर्मातृ-नामभिर्वास्तोष्पत्यैरिति [10] शमयति [11] ' तस्य [12] ह [13] स्नात-स्याश्वस्याभ्युन्नितस्य सर्वेभ्यो रोमसमरेभ्यो ऽङ्गारा [14] आशी-र्यन्त ' सो ऽश्वस्तुष्टो नमस्कारं चकार ' नमः शंयुमाथर्व-णाय [15] यो मा यज्ञियमचीक्लृपदिति [16] ' भविष्यन्ति ह वा अतो ऽन्ये ब्राह्मणा लघुसंभारतमास्तं [17] आदित्यस्य पद [18] आधास्यत्यनडुहो [19] वत्सस्याजस्य अवणस्य [20] ब्रह्मचारिणो वैतद्वा [21] आदित्यस्य पदं यद्भूमिस्तंस्यैव [22] पद आहितं भविष्यतीति [23] ' सो ऽग्नौ प्रणीयमाणे ऽश्वे ऽन्वारब्धं [24]

---

1) °श्वं A und E; 2) नांमेतेति B; शंमेतेति C; 3) तथैतेति E; 4) विचारं निति A und E; 5) ह स्मै A pr. man.; 6) °वाश्वं A; 7) शांमेतेति B; शंमेतेति C; 8) तथैति E; 9) च fehlt in A; 10) चतनै° C; 11) corrupt; vielleicht शमयतेति; 12) तस्यै E; 13) Fehlt in E; 14) गारा B und E; 15) शंयुम आथर्वणाय C; man erwartet शम्यव आथर्वणाय; 16) यज्ञियमन्विकॢ° B; यज्ञमवीहूपदिति E; 17) लघुसंचार° C; 18) पदम् A, B und C; 19) अधास्यत्य° E; 20) ? Man erwartet den Namen eines Tieres; 21) So B. Ind.; die hss. वा एतद्वा; 22) So B. Ind.; A und B °स्तयैव, C und E °स्तयैव; 23) °व्यसीति E; 24) So B. Ind.; °रब्धे A und E; °रब्ध C; °रध्वं B.

ब्रह्मा यजमानं वाचयति यद्क्रन्दः प्रथमं जायमान[1] इति पञ्च 'तं[2] ब्राह्मणा[3] उपवक्ति तं ब्रह्मोपाकुरुत 'एष ह वै विद्वान्त्सर्वविद्ब्रह्मा यद्बृग्वङ्गिरोविदिति ब्राह्मणम्' ॥ १८ ॥

देवाश्च ह वा असुराश्चास्पर्धन्त[4] 'ते[5] देवा इन्द्रमब्रुवन्निमं नस्तावद्यज्ञं[6] गोपाय यावदसुरैः संयतामहा इति 'स वै नस्तेन[7] ह्रूपेण गोपाय येन नो ह्रूपेण भूयिष्ठं ह्रादयसि येन शद्धयसि[8] गोप्तुमिति 'स ऋग्वेदो भूत्वा पुरस्तात्परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व[9] नैतेन[2] नो[2] ह्रूपेण[2] भूयिष्ठं[2] ह्रादयसि[2] नैतेन शद्धयसि[10] गोप्तुमिति 'स यजुर्वेदो भूत्वा पश्चात्परीत्योपातिष्ठत्तं[11] देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व नैतेन नो ह्रूपेण भूयिष्ठं ह्रादयसि नैतेन शद्धयसि[12] गोप्तुमिति 'स सामवेदो भूत्वोत्तरतः परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यदेव[13] तद्रूपं कुरुष्व[14] नैतेन[14] नो ह्रूपेण भूयिष्ठं ह्रादयसि[15] नैतेन[15] शद्धयसि[12] गोप्तुमिति 'स इन्द्र उष्णीषी[16] ब्रह्म-

---

1) ज्ञायमाना C; 2) Fehlt in E; 3) So ed. B. Ind.; ब्रह्मणा A, C und E; ब्रह्मणा B; 4) °र्धते E; 5) त E; 6) नस्ताव° B; 7) नह्येन B; 8) So B. Ind.; A, B und C शिक्षसि, E शिक्षिसि; 9) कुरुस्वो E; 10) So ed. B. Ind.; A, B; E शिक्षसि, C शक्षसि; 11) पश्चात्परीत्यापा° B; 12) Vid. 8; 13) अब्रुवन् देव A; अब्रुन्नेतं B; अब्रुवन्नन्यतदेव E; 14) कुरुष्वैतेन E; 15) ह्रादयस्यैतेन B; 16) उष्णी E.

वेदो भूत्वा दक्षिणातः परीत्योपातिष्ठत्तं देवा अब्रुवन्ने-
तत्तद्रूपं[1] कुरुष्वैतेन नो द्रूपेण भूयिष्ठं ह्रादयस्येतेन[2]
शक्ष्यसि[3] गोप्तुमिति' तथ्यदिन्द्र[4] उष्णीषी ब्रह्मवेदो भूत्वा
दक्षिणातः परीत्योपातिष्ठत्तद्ब्रह्माभवत्तंब्रह्मणो ब्रह्मत्वं'
तद्वा एतदथर्वणो द्रूपं यदुष्णीषी ब्रह्मा' तं दक्षिणतो
विश्वे देवा उपासीदंस्तं[5] यद्दक्षिणतो विश्वे देवा उपा-
सीदंस्तत्सदस्यो[6] ऽभवत्तत्सदस्यस्य[7] सदस्यत्वं' बलेर्ह वा
एतद्बलमुपजायते[8] यत्सदस्य' ग्रामयतो[9] वै[9] व्रजस्य[9]
बकुलतरं[9] व्रजं[9] विदन्ति[9]' घोरा वा एषा दिग्दक्षिणा
शान्ता इतरास्तथ्यानि स्तुतानि ब्रह्मानुमल्लयते मनसैव
तानि सदस्यो जनदित्येतां व्याहृतिं[10] जपत्यात्मानं[11]
जनयति[12] नजित्यात्मानमपित्वे[13] दधाति' तं देवा अब्रु-
वन्वरं वृणीष्वेति' वृणा इति' स वरमवृणीतास्यामेव[14]
मां क्षेत्रायामिन्द्रभूतं पुनस्त स्तुवतः[15] शंसन्तस्तिस्थेयु-

---

1) अब्रुते° B; 2) ह्रादयदस्यैतेन°; ह्रादाय° C; 3) Vid. p. ५३ Note 8. 4) स इन्द्र B; 5) उपासीरंस्तं A; उपासीरस्तं E; 6) उपासीरंस्त° A; उपासीरस्त° E; °दस्ये B; 7) °दस्य A, C und E; 8) °मुपाजायते E; 9) ? ? corrupt; व्रजं fehlt in E; statt विदन्ति hat C विन्दन्ति; E विदन्वन्ति; 10) व्याहूति C; 11) So corr. जपं चेत्या° A und C; जपं वेत्या° B und E; Caland zu Vait. 18, 17 schlägt vor hier zu lesen व्याहृतिमनुजपति; 12) जयति A; 13) Sic; vielleicht zu lesen: जनयित्वात्मान°; 14) वरम fehlt in E; 15) स्तुवतः B.

रिति ' तं तस्यामिव क्रोत्रायामिन्द्रभूतं पुनक्त स्तुवक्तः [1] शंसक्तो ऽतिष्ठंस्तं यक्तस्यामिव क्रोत्रायामिन्द्रभूतं पुनक्त स्तुवक्तः शंसक्तो ऽतिष्ठंस्तब्राह्मणाच्छंस्यभवत्तंब्राह्मणाच्छंसिनो ब्राह्मणाच्छंसित्वं [2] ' सैषैन्द्री [3] क्रोत्रा यब्राह्मणाच्छंसीया ' द्वितीयं वरं [4] वृणीष्वेति ' वृणा इति ' स वरमवृणीतास्यामिव मां क्रोत्रायां वायुभूतं पुनक्त [5] स्तुवक्तः शंसक्तस्तिस्थेयुरिति [6] ' तं तस्यामिव क्रोत्रायां वायुभूतं पुनक्त स्तुवक्तः शंसक्तो [7] ऽतिष्ठंस्तं यक्तस्यामिव [8] क्रोत्रायां [9] वायुभूतं [10] पुनक्त [11] स्तुवक्तः शंसक्तो [12] ऽतिष्ठंस्तत्योताभवत्तंत्योतुः पोतृत्वं [13] ' सैषा [14] वायव्या क्रोत्रा [15] यत्योत्रीया ' तृतीयं वरं [16] वृणीष्वेति ' वृणा इति ' स वरमवृणीतास्यामिव मां क्रोत्रायामग्निभूतमिन्धानाः [17] पुनक्त स्तुवक्तः शंसक्तस्तिष्ठेयुरिति ' तं तस्यामिव क्रोत्रायामग्निभूतमिन्धानाः [17] पुनक्त स्तुवक्तः शंसक्तो [18] ऽतिस्थंस्तं यक्तस्यामिव क्रोत्रायामग्निभूतमिन्धानाः पुनक्त स्तुवक्तः शंसक्तो ऽतिस्थंस्तदाग्नीध्रो [19] ऽभवत्तंदाग्नीध्रस्याग्नीध्रत्वं [20] '

---

1) स्तुवतः B; 2) सित्व E; 3) सैवौद्री E; 4) Fehlt in C; 5) पुनत E; 6) शंसतस्ति° B; 7) शंसतो B; शंसंता E; 8) यतस्यमिव E; 9) होत्राय E; 10) वायुंभूतं A; 11) पुनत E; 12) शंसन्तस् A, B und E; 13) पौतृत्वं E; 14) सेषा B; 15) होत्राय E; 16) Fehlt in B und C; 17) °मिधानाः E; 18) शंसतो B und E; 19) °ग्नीधो B; 20) °धस्याग्नीध्र E.

सैषाग्नेयी क्षोत्रा यदाग्नीध्रीयेति[1] ब्राह्मणम्' ॥ १९ ॥

ब्राह्मणो ह वा इममग्निं वैश्वानरं बभार[2] 'सो[3] ऽयमग्निर्वैश्वानरो[4] ब्राह्मणेन म्रियमाण[5] इमांल्लोकान्न-नयते' ऽथायमीक्षते ऽग्निर्ज्ञातवेदा[6] ब्राह्मणद्वितीयो ह वा अयमिदमग्निर्वैश्वानरो ऽग्वलति[7]' हताहं[8] यन्मयि तेज[9] इन्द्रियं वीर्यं[10] तद्दर्शयाम्युत[11] वै मा[12] बिभृयादिति[13]' स आत्मानमाप्याय्यैतं[14] पयो ऽधोक्तमिमं[15] ब्राह्मणं दर्श-यित्वात्मन्यङ्गुहोत्स द्वितीयमात्मानमाप्याय्यैतं[16] घृतमधो-क्तमिमं[15] ब्राह्मणं[17] दर्शयित्वात्मन्यङ्गुहोत्स तृतीयमात्मा-नमाप्याय्यैतदिदं[16] विश्वं[18] विकृतमन्नाद्यमधोक्तमिमं[19] ब्राह्मणं दर्शयित्वात्मन्यङ्गुहोत्स[20] चतुर्थमात्मानमाप्याय्यै-तेन[16] ब्राह्मणस्य ज्ञायां विराजमपश्यत्तामस्मै[21] प्राय-च्छत्सात्मा[22] अपित्वमभवत्तत[23] इममग्निं[24] वैश्वानरं[25]

---

1) यदाग्नीयेति A; यदसीध्रीयोति E; 2) बभरर C; 3) स्मे E; 4) ऽयमग्निवै° E; 5) ध्रीयमाण C; म्रियमाणं E; 6) ऽग्निनां त वेदा E; 7) वलति E; 8) हताहं B; 9) तेन्नं E; 10) वीर्य E; 11) तद्दर्श-याम्युत्त E; तदूदर्शयां स्युत B; 12) सां E; 13) विभ्रयादिति B; 14) So corr.; °माप्याययेत्नं A und E; °माप्याययेत B; °माप्याययेतं C; 15) ? vielleicht verdorben! 16) Vid. 14; 17) ब्रह्मणं E; 18) विश्व B; 19) विक्तमन्वनाक्षायम° B; अधोक्तम् corrupt; 20) °त्मान्यङ्गुहोत्स B; ङ्गुहोत्स fehlt in E; 21) विराजमपश्य° A; 22) und 23) verdorben; 22) °त्स आत्मा A und B; 23) °मभवकृत C; 24) इममग्नि E; 25) विश्वानरं B.

परास्युर्ब्राह्मणो[1] ऽग्निं ज्ञातवेदसमधत्त ' सो ऽयमब्रवीद्ग्ने ज्ञातवेदो ऽभिनिधेहि[2] मेहीति ' तस्य द्वैतं नामाधत्ता-घोरं[3] चाक्रूरं च ' सो ऽश्वो[4] भवत्तस्माद्श्वो[5] वहेन रथं[6] न भवति[7] पृस्थेन सादिनं[8] ' स देवानागच्छत्स देवेभ्यो ऽन्वातिष्ठत्तस्माद्दिवा अबिभयुस्तं ब्रह्मणे प्रायच्छ-त्तमेतयर्चाशमयत्[9] ॥ २० ॥

अग्निं[10] वाकुर्वैश्वानरं सदनान्प्रदक्न्वगाः[11]। स नो देवत्राधिब्रूहि[12] मा रिषामा वयं तवेति ' तमेताभिः पञ्च-भिर्ऋग्भिरुपाकुरुते[13] यदक्रन्दः प्रतमं जायमान[14] इति ' सो ऽशाम्यत्तस्माद्श्वः[15] पशूनां जिघत्सुतमो[16] भवति ' वैश्वानरो[17] ह्येष ' तस्मादग्निपदमश्वं[18] ब्रह्मणे[19] ददाति[20] ' ब्रह्मणे[21] हि प्रत्तं[22] ' तस्य रसमपीडयत्स रसो ऽभवद्रसो ह वा एष ' तं वा एतं रसं सन्तं[23] रथ[24] इत्याचक्षते परोक्षेण[25] ' परोक्षप्रिया इव हि देवा भवन्ति[26] प्रत्य-

1) परास्युर् corrupt!; 2) विमिधेहि B; ऽभीनिधेहि E; 3) °त्रयोरं A und E; 4) स्त्रो A; 5) °दस्त्रो A; 6) रथे A, C und E; 7) भवन्ति B; zu erwarten ist वहति; 8) सादिन B; 9) °तयच्च सिमयितू E; 10) अग्नि B; 11) सयदनान्प्र° B; सत्रदनान्प्र° C; सदनानप्रजह्° E; 12) दवप्राधि° E; 13) पञ्चमि ऋग्मि° B; पञ्चभिर्ऋग्नि° C; 14) Von जायमान bis अश्वं fehlt in E; 15) °दश्वं B; 16) So corr.; die hss. जिघत्सुरतमो; 17) वैश्वामरो B; 18) °गिनः पदमश्वं B; 19) ब्राह्मणे B; 20) ददामि E; 21) ब्रह्मं C; 22) प्रवं A pr. m.; प्रतन् B; प्रत्तंस् C; प्रण E; 23) सतं A; 24) रस E; 25) परोक्षणे E; 26) भवती E.

न्नद्विषः' स देवानागच्छत्स देवेभ्यो ऽन्वातिष्ठत्तंस्माद्दे-
वा[1] अबिभयुस्तं ब्रह्मणे प्रायच्छत्तंमितयर्चाऽऽज्याहुत्याभ्यजु-
होदिन्द्रस्यौजो[2] मरुतामनीकमिति रथमभिहुत्य[3] तमे-
तयर्चातिष्ठद्वनस्पते वीड्वङ्गो हि भूया इति' तस्मादाग्न्या-
धेयिकं[4] रथं ब्रह्मणे ददाति' ब्रह्मणे हि प्रत्तं[5]' तस्य
तन्नाणास्तनूं[6] ज्येष्ठां[7] दक्षिणां निरमिमत[8]' तां पञ्च-
स्वपश्यद्दृचि यजुषि साम्नि शान्ते[9] ऽथ घोरे' तासां[10] द्वे
ब्रह्मणे[11] प्रायच्छद्वाचं च ज्योतिश्च' वाग्वै धेनुर्ज्योति-
र्हिरण्यं[12]' तस्मादाग्न्याधेयिकां[13] चातुःप्राश्यां धेनुं[14] ब्र-
ह्मणे ददाति' ब्रह्मणे हि प्रत्ता[15]' पशुषु शाम्यमानेषु
चन्नुर्व्हापयन्ति' चन्नुरेव तदात्मनि धत्ते[16]' यद्वै[17] चन्नुस्त-
द्धिरण्यं' तस्मादाग्न्याधेयिकं हिरण्यं ब्रह्मणे ददाति' ब्रह्मणे
हि प्रत्तं' तस्यात्मन्नधत्त[18]' तेन प्राङ्वलयंन्नाधत्त तदा-
ग्लाभवत्तंदाग्ला[19] भूत्वा सा समुद्रं प्राविशत्सा[20] समुद्र-

---

1) °त्तस्मादेवा E; 2) °र्चाऽऽज्याहुत्याभ्यः जुहो° E; 3) So corr.; die hss. °हुत्या; B रथ प्रक्रिहवा; 4) °यीकं A sec. m.; B und C; °हिकं E; 5) Vid. p. ५७ Note 22; 6) तन्नाणासूनू B; °णास्तनू C und E; 7) ज्येष्ट C; 8) निरमिमतं E; 9) शात्ये A; 10) तासो E; 11) ब्राह्मणे A pr. m. und E; 12) °र्हिरण्यां E; 13) °धेहिकां C; 14) धेनु C und E; 15) So B. Ind.; A, B und C प्रत्ताय, E प्रता; 16) धत्तं E; 17) Von यद्वै bis तेन प्राङ्वल fehlt in E; 18) So corr.; A und E तस्यात्मनि धत्त B und C तस्यात्मनं धत्त; 19) तदालाभव° B; 20) प्रवीशत्सा E.

मदक्तंस्मात्समुद्रो दुर्गिरवपि[1] 'वैश्वानरेण हि[2] दग्धः' सा पृथिवीमुदैत्सा[3] पृथिवीं व्यदक्तत्सा[4] देवानागच्छत्सा देवानक्रेडत्ते[5] देवा ब्रह्माणमुपाधावन्त्स नैवागायन्नानृत्यत्सैषाग्लैषा[6] कारुविदा नम 'तं वा एतमाग्लाकृतं सन्तमाग्लागृध इत्याचक्षते परोक्षेण 'परोक्षप्रिया[7] इव हि देवा भवन्ति प्रत्यक्षद्विषो 'य एष ब्राह्मणो गायनो नर्तनो वा भवति तमाग्लागृध इत्याचक्षते 'तस्माद्ब्राह्मणो नैव[8] गायेन्न नृत्येन्माग्लागृधः स्यात्तंस्माद्ब्राह्म्यं[9] पूर्वं हविरपरं प्राजापत्यं 'प्राजापत्याद्ब्राह्म्यमेवोत्तरमिति[10] ब्राह्मणम्' ॥ २१ ॥

अथर्वाणश्च ह वा अङ्गिरसश्च[11] भृगुचक्षुषी तद्ब्रह्माभिव्यपश्यंस्तंदज्ञानन्व्यं[12] वा इदं सर्वं यद्भृग्वङ्गिरस इति 'ते देवा ब्राह्म्यं[13] हविर्यत्सांतपने ज्ञावज्ञुहुवुरेतद्वै ब्राह्म्यं हविर्यत्सांतपने ज्ञौ हूयत 'एष ह वै सांतपनो[14] ज्ञग्निर्यद्ब्राह्मणास्तंस्योर्जयोर्जां[15] देवा अभजन्त सुमनस एव

---

1) Sic.! दुणिरवविर् C; दूर्गिरतपि E; 2) Fehlt in E; 3) So B. Ind.; °मुदैयीत्सा A und C; °मुहैत्सा B; °मुदैसा E; 4) व्यहृत्सा B; व्यहदत्सा E; 5) देवानहिउत्ते A, B und E; 6) °माग्लौषा B und C; 7) परोक्षिप्रिया E; 8) नैवं B; 9) °द्ब्राह्मं A pr. m.; 10) So corr.; die hss. haben °वोत्तममिति; 11) आङ्गिर° A pr. m. B und E; 12) तद्ब्राह्मा° A pr. m.; 13) ब्राह्मं A pr. m.; 14) संतपनो E; 15) °स्योर्ज्जयोर्जां A; °स्योर्ज्जयोर्जां E.

स्वधां[1] पितर॑ः श्रद्धया स्वर्गं लोकं ब्राह्मणास्तेन सुन्वत्यृषयो[2] ऽस्तत स्त्रियः केवल आत्मन्यवारुन्धत[3] बाह्या[4] उभयेन सुन्वन्ति[5] ' यद्वै यज्ञे ब्राह्म्यं[6] हविर्न निरुप्येतानृजवः प्राजापत्यहविषो[7] मनुष्या[8] ज्ञायेरन्नंसौ याल्लोकाञ्छृणिवति[9] पिता[10] ह्येष आहवणीयस्य[11] गार्हपत्यस्य[11] दक्षिणाग्नेर्यो ऽग्निहोत्रं जुहोतीति ' देवाः प्रिये धामनि मदन्ति[12] ' तेषामेषो ऽग्निः सांतपनः श्रेष्ठो[13] भवत्येतस्य वाचि तृप्तायामग्निस्तृप्यति ' प्राणे तृप्ते वायुस्तृप्यति ' चक्षुषि[14] तृप्त[15] आदित्यस्तृप्यति ' मनसि तृप्ते चन्द्रमास्तृप्यति ' श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति ' स्नेहेषु[16] तृप्तेष्वापस्तृप्यन्ति ' लोमसु[9] तृप्तेष्वोषधिवनस्पतयस्तृप्यन्ति[17] ' शरीरे[18] तृप्ते पृथिवी तृप्यत्येवमेषो[19] ऽग्निः सांतपनः श्रेष्ठस्तृप्तः सर्वांस्तृप्तांस्तर्पयतीति[20] ब्राह्मणम् '

॥ २२ ॥

सांतपना इदं हविरित्येष ह[21] वै[22] सांतपनो ऽग्नि-

---

1) स्वधा E; 2) सुन्वत्यृ° C; 3) आत्मन्येवा° A und C; आत्मन्यवरुधत E; 4) बाधा B; 5) सुन्वन्तिं E; 6) ब्राह्मणं C; 7) प्रजाप° B; °हाविषो C; 8) मानुष्या C; 9) Sic.! 10) पित C; 11) So ed. B. Ind.; die hss. °वश्च; 12) मदन्ते C; मदते E; 13) श्रेष्टयो E; 14) चक्षुषी A und E; 15) तृप्या E; 16) स्नहेषु E; 17) °यति B; 18) शरी B; 19) तृप्यन्त्येव° A; तृप्यत्येवम् fehlt in E; 20) सवास्तृ° A, C und E; 21) हा E; 22) Fehlt in E.

र्यद्ब्राह्मणो[1] ' यस्य गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म-
नामकरणनिष्क्रमणान्नप्राशनगोदानचूडाकरणोपनयना-
प्लवनाग्निहोत्रव्रतचर्यादीनि कृतानि भवन्ति स सांतपनो '
ऽथ यो ऽयमनग्निकः स कुम्भे लोष्टस्तव्यथा कुम्भे[2] लोष्टः
प्रक्षिप्तो[3] नैव शौचार्थाय कल्पते नैव शस्यं[4] निर्व-
र्तयत्येवमेवायं[5] ब्राह्मणो ऽनग्निकस्तस्य ब्राह्मणस्यान-
ग्निकस्य नैव दैवं दद्यान्न[6] पित्र्यं न चास्य[7] स्वाध्याया-
शिषो[8] न[9] यज्ञाशिषः[9] स्वर्गगमा[10] भवन्ति तदप्येत-
दृचोक्तमग्निं[11] दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य
यज्ञस्य सुक्रतुमिति ब्राह्मणम् ' ॥ २३ ॥

अथ ह प्रजापतिः सोमेन यज्यमाणो[12] वेदानुवाच
कं वो होतारं वृणीय[13] कमध्वर्युं[14] कमुद्गातारं कं
ब्रह्माणमिति[15] ' त[16] ऊचुर्ऋग्विदमेव[17] होतारं वृणीष्व
यजुर्विदमध्वर्युं[18] सामविदमुद्गातारमथर्वाङ्गिरोविदं[19] ब्र-
ह्माणं[20] ' तथा होस्य यज्ञश्चतुर्षु[21] लोकेषु चतुर्षु देवेषु

---

1) ऽग्निर्यं ब्रह्मणो B; °हाणो E; 2) कुम्भ A; 3) प्रतिप्तौ B; 4) प्रास्यं E; 5) निर्वर्तयन्त्ये° C; निवर्तयन्त्ये° E; 6) दद्यात् E; 7) चास्या E; 8) स्वध्या° B; 9) भवन्त्ताशिष E; 10) °गया E; 11) °मग्नि B; 12) यत्तमाणो E; 13) So corr.; die hss. वृणीयां; 14) °ध्वर्यु E; 15) ब्राह्मणामिति B; 16) तद् A und C; 17) ऊचुरृग्वे° A, B und E; 18) यजुर्वे° A, B und E; 19) सामवे° C; 20) ब्रह्माणां B; 21) यत्तः ist einmal zu viel.

चतुर्षु वेदेषु चतसृषु क्रोत्रासु[1] चतुष्पाद्यज्ञः प्रतितिष्ठति[2]' प्रतितिष्ठति[3] प्रजया पशुभिर्य एवं वेद' तस्मादग्विदमेव[4] क्रोतारं वृणीष्व स[5] हि[5] क्रौत्रं[6] वेदाग्निर्वै[7] क्रोता' पृथिवी वा ऋचामायतनमग्निर्देवता गायत्रं क्रन्दो भूरिति[8] शुक्रं[9]' तस्मात्तमेव क्रोतारं वृणीष्वेत्येतस्य लोकस्य जितय' एतस्य लोकस्य विजितय' एतस्य लोकस्य संजितय' एतस्य लोकस्यावरुद्धय' एतस्य लोकस्य विवृद्धय[10]' एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय[11]' एतस्य[12] लोकस्य व्याप्तय[13]' एतस्य लोकस्य पर्याप्तय' एतस्य[12] लोकस्य समाप्तये' ऽथ चेन्नैवंविदं[14] क्रोतारं वृणुते[15] पुरस्तादेवैषां यज्ञो रिच्यते' यजुर्विदमेवाध्वर्युं वृणीष्व[16] स क्याध्वर्यवं वेद' वायुर्वा अध्वर्युरन्तरिक्षं[17] वै यजुषामायतनं' वायुर्देवता[18] त्रैष्टुभं क्रन्दो भुव इति शुक्रं[19]' तस्मात्तमेवाध्वर्युं[20] वृणीष्वेत्येतस्य लोकस्येत्येवाथ[21] चेन्नैवंविदमध्वर्युं[20] वृणुते[22] पश्चादेवैषां यज्ञो रिच्यते'

---

1) होत्रा B; 2) So corr.; die hss. प्रतिढति; 3) प्रतीष्ठति B; प्रतिष्ठति E; 4) °निव A und C; 5) तन्ति E; 6) होत्रं E; 7) वेदग्निं वे E; 8) भूमिति B; 9) शुकं B und C; 10) व्यूढय A sec. m. und C; विगूढर्य E; 11) ?; vielleicht °स्योदाप्नुय; 12) एतस्या B; 13) व्याप्नाय B; 14) चेन्नैव विदं E; 15) वृणुति E; 16) वृणीष्य C; 17) °रिक्त E; 18) °वतां E; 19) शुक्र E; 20) °ध्वर्यु E; 21) लोकस्यमाथ B; 22) वृणुत्यते B.

सामविदमेवोद्गातारं[1] वृणीष्व ' स क्यौद्गात्रं[2] वेदादित्यो वा उद्गाता ' द्यौर्वै साम्नामायतनमादित्यो देवता ज्ञागतं छन्दः स्वरिति शुक्रं[3] ' तस्मात्तमेवोद्गातारं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमुद्गातारं वृणुत उत्तरत एवैषां यज्ञो रिच्यते ' ऽथर्वाङ्गिरोविदमेव ब्रह्माणं[4] वृणीष्व[5] ' स हि ब्रह्मत्वं वेद ' चन्द्रमा वै ब्रह्मापो[6] वै भृग्वङ्गिरसामायतनं ' चन्द्रमा[7] देवता वैद्युतश्चोष्णिक्काकुभे[8] छन्दसी[9] ओमित्यथर्वणां शुक्रं ज्ञनदित्यङ्गिरसां ' तस्मात्तमेव ब्रह्माणं वृणीष्वेत्येतस्य लोकस्य ज्ञितय ' एतस्य लोकस्य विज्ञितय[10] ' एतस्य लोकस्य संज्ञितय ' एतस्य लोकस्यावरुद्धय ' एतस्य लोकस्य[11] विवृद्धय[12] ' एतस्य लोकस्य समृद्धय ' एतस्य लोकस्योदात्तय[13] ' एतस्य लोकस्य व्याप्तय ' एतस्य लोकस्य पर्याप्तय ' एतस्य लोकस्य समाप्तये ' ऽथ चेन्नैवंविदं[14] ब्रह्माणं[15] वृणुते दक्षिणात[16] एवैषां यज्ञो रिच्यते दक्षिणात[17] एवैषां[17] यज्ञो[17] रिच्यते ॥ २४ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे द्वितीयः प्रपाठकः ॥

---

1) सामवे° C; 2) क्यौद्गात्रां E; 3) शुक्रं B; 4) ब्राह्मणा E; 5) वृणीष्वं E; 6) ब्रह्मा आपो E; 7) चन्द्रं च मा B; 8) °तश्चोस्मिकाकुंभे E; 9) इन्दसि A; 10) विज्ञित C; 11) लोकस्या C; 12) व्यृडय A sec. m., B und C; 13) ?; °दाप्तय ?; 14) चेनैवं° C; चेन्नेवंविद् E; 15) ब्रह्माणा E; 16) दक्षित C; 17) Fehlt in C und E.

ओं दक्षिणाप्रवणा भूमिर्दक्षिणात[1] आपो वहन्ति तस्माद्यज्ञास्तद्भूमेरुन्नततरमिव[2] भवति यत्र भृग्वङ्गिरसो विष्ठास्तंद्यथाप[3] इमांल्लोकानभिवहन्त्येवमेव[4] भृग्वङ्गिरसः सर्वान्देवानभिवहन्त्येवमेवैषा[5] व्याहृतिः सर्वान्वेदानभिवहत्योमिति[6] हर्चामोमिति यजुषामोमिति साम्नामोमिति सर्वस्याहाभिवादस्तं ह स्मैतदुत्तरं यज्ञे विद्वांसः कुर्वन्ति 'देवा ब्रह्माण आगच्छतागच्छतेत्येते[7] वै देवा ब्रह्माणो यद्भृग्वङ्गिरसस्तानेवैतद्भृणानास्तान्वृणाना[8] द्धवयन्तो मन्यन्ते 'नान्यो ऽभृग्वङ्गिरोविदो[9] वृतो यज्ञमागच्छेन्नंयज्ञस्य[10] तेजसा तेज आप्नोत्यूर्जयोर्जां[11] यशसा यशो' नान्यो ऽभृग्वङ्गिरोविदो[12] वृतो यज्ञमागच्छेन्नेद्यज्ञं[13] परिमुष्णीयादिति[14] 'तद्यथा पूर्वं वत्सो ऽधीत्य[15] गां[16] धयेदेवं ब्रह्मा भृग्वङ्गिरोविद्वृतो[17] यज्ञमागच्छेन्नेद्यज्ञं[13] परिमुष्णीयादिति 'तद्यथा गौर्वाश्वो वाश्वतरो वैकपाद्द्विपात्त्रिपा-

---

1) °क्षिणात A pr. m. und E; 2) तस्माद्यज्ञस्त° C ?; 3) विष्ठाः sic.!!; 4) °हत्येवमेव E; 5) °हत्येव° E; °मवैष्टा B; 6) °भिवहंसामिति E; 7) आगच्छता आगच्छतेत्येते A sec. m. und C; आगच्छतगच्छतेत्येत B; आगच्छतागच्छत्स गच्छतेत्यैतेवै E; 8) So corr.; A und B °द्भृणानांस्तान्वृणानां; C °द्भृणानांस्तान्वृणानां; E °द्भृणातास्तान्वृणानां; 9) °रोविद् A und E; 10) यज्ञमागच्छन्य° A, B und E; l. °गच्छेय° ? 11) °त्यूर्ज्जयाज्ञां B; 12) °रोविद् A und E; 13) °न्नेद्यज्ञं E; 14) परी° B; 15) Sic.!! ऽधीत्यं E; 16) गा E; 17) °विद्वृतो B und C.

दिति स्यात्क्रमभिवक्ष्येत्क्रमभ्यश्नुयादिति[1] ' तस्मादृग्विद्-मेव[2] क्षोतारं वृणीष्व[3] यजुर्विदमध्वर्युं[4] सामविदमुद्गा-तारमथर्वाङ्गिरोविदं ब्रह्माणं ' तथा क्षास्य यज्ञश्चतुर्षु लो-केषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु क्षोत्रासु चतुष्पा-द्यज्ञः प्रतितिष्ठति[5] ' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद[6] यश्चैवमृत्विजामार्त्विज्यं वेद यश्च यज्ञे यजनीयं[7] वेदेति ब्राह्मणम् ' ॥ १ ॥

प्रजापतिर्यज्ञमतनुत[8] ' स[9] ऋचैव[9] क्षौत्रमकरोद्यजुषा-ध्वर्यवं[10] साम्नौद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं[11] ' तं वा एतं[12] महावाद्यं[13] कुरुते यदृचैव क्षौत्रमकरोद्यजुषाध्वर्यवं सा-म्नौद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं[14] ' स वा एष त्रिभिर्वेदैर्य-ज्ञस्यान्यतरः पक्षः संस्क्रियते[15] ' मनसैव ब्रह्मा यज्ञस्या-न्यतरं[16] पक्षं[17] संस्करोत्यथमु वै यः पवते स यज्ञस्तस्य[18] मनश्च वाक्च वर्तनी[19] ' मनसा चैव हि वाचा च[20]

---

1) °श्नुयादिति C; °श्नुयोयादिति E; 2) °ग्विदमिव A und C; °ग्वेदमेव E; 3) वृणीष्वं E; 4) यजुर्वे° E; 5) So corr.; die hss. प्रतिष्ठति; 6) वेदं E; 7) यज्ञनेयं E; 8) °नुतं E; 9) सपुत्रचै E; 10) क्षोत्र° C und E; 11) °ब्रह्मा C; °ब्रह्म E; 12) Von एतं bis एष fehlt in E; 13) महावाद्यं; B महावाद्य! sic.! cf. Ait. Br. V 33. 1; 14) साम्नौद्गत्र° A; 15) संष्ठियते E; 16) यज्ञस्यां न्यतरं A; 17) पक्ष E; 18) यज्ञस्तस्या B; 19) So corr.; die hss. वर्तनिः; 20) Fehlt in E.

यज्ञो[1] वर्तते[1]' ऽद्[1] एव मन इयमेव वाक्स यद्व-
न्नास्ति[2] विद्यादर्धं[3] मे ऽस्य यज्ञस्यान्तरगादिति[4]' तद्यथै-
कपात्पुरुषो यन्नेकचक्रो[5] वा रथो[6] वर्तमानो भ्रेषं[7]
न्येत्येवमेवास्य यज्ञो भ्रेषं[8] न्येति' यज्ञस्य[9] भ्रेंषमनु यज-
मानो भ्रेषं न्येति[10]' यजमानस्य भ्रेषमन्वृत्विजो[11] भ्रेषं[12]
नियत्यृत्विजां[13] भ्रेषमनु दक्षिणा भ्रेषं[8] नियन्ति' दक्षि-
णानां भ्रेषमनु यजमानः पुत्रपशुभिर्भ्रेषं न्येति' पुत्रपशूनां
भ्रेषमनु यजमानः[14] स्वर्गेण लोकेन भ्रेषं[8] न्येति'
स्वर्गस्य लोकस्य भ्रेषमनु तस्यार्धस्य योगक्षेमो भ्रेषं[15]
न्येति यस्मिन्नर्धे यजत इति ब्राह्मणम्' ॥ २ ॥

तद्ध स्माह श्वेतकेतुरारुणेयो[16] ब्रह्माणं दृष्ट्वा भा-
षमाणमर्धं[17] मे[18] ऽस्य यज्ञस्यान्तरगादिति' तस्माद्ब्रह्मा
स्तुते बहिःपवमाने वाचोयम्यमुपांश्वन्तर्यामाभ्यामंथ[19] ये
पवमाना[20] ओदृचस्तेष्वंथ[21] यानि[22] स्तोत्राणि सशस्त्रा-

1) So corr. nach Ait. B. V 33. 3 die hss. यज्ञे वहत्यत; 2) Sic.; 3) विद्यादर्ध E; 4) यज्ञस्यावरग° B; 5) यज्ञने° B; 6) रथो E; 7) भ्रेष A, C und B; 8) भ्रेष B und C; 9) Von यज्ञस्य bis नियत्यृ° fehlt in B; 10) नेति A; 11) भ्रेषमुत्वत्विजो E; 12) भ्रेष E; 13) °त्विजो E; 14) Von यजमानः bis तस्यार्धस्य fehlt in E; 15) भ्रेष C; 16) स्वेतके° A; °रुणोयो B; °रुणो E; 17) °मर्ध E; 18) म E; 19) वाचोयम्यं?; Ait. B. वाचंयमः; 20) So corr.; °मान alle; 21) A und B ऊदुचुस्ते°; C ऊदवुस्ते°; E ऊदूचुस्ते°; 22) Die hss. fügen hier च ein.

एवा[1] वषट्कारात्तेषु[2] 'स यदुक्तो ऽश्वेषं न्यृच्छेदो[3] भूर्जनदिति गार्हपत्ये जुहुयाद्यदि[4] यजुष्ट[5] ओं भुवो[6] जनदिति दक्षिणाग्नौ जुहुयाद्यदि सामत ओं स्वर्जनदित्याहवनीये जुहुयाद्यनाज्ञाताद्ब्रूयतो वो भूर्भुवः[7] स्वर्जनदोमित्याहवनीय एव जुहुयात्तद्वाकोवाक्यस्यर्चां यजुषां साम्नामथर्वाङ्गिरसामथापि[8] वेदानां रसन यज्ञस्य विरिष्टं[9] संधीयते' तद्यथा लवणेनेत्युक्तं[10]' तद्यथोभयपात्युरुषो यन्नुभयचक्रो वा रथो वर्तमानो ऽश्वेषं[11] न्येत्येवमेवास्य[12] यज्ञो ऽश्वेषं[11] न्येति' यज्ञस्याश्वेषमनु यजमानो ऽश्वेषं न्येति 'यजमानस्याश्वेषमन्वृत्विजो ऽश्वेषं नियत्यृत्विजामश्वेषमनु[13] दक्षिणा अश्वेषं[14] नियत्ति' दक्षिणानामश्वेषमनु यजमानः पुत्रपशुभिरश्वेषं[15] न्येति 'पुत्रपशूनामश्वेषमनु यजमानः स्वर्गेण[16] लोकेनाश्वेषं न्येति[17]' स्वर्गस्य लोकस्याश्वेषमनु तस्यार्धस्य योगक्षेमो[18] ऽश्वेषं न्येति यस्मिन्नर्धे[19] यजत इति ब्राह्मणम्' ॥ ३ ॥

---

1) Die hss. haben चप्रत्वा°; 2) °रांतेषु E; 3) So corr.; die hss. नियद्धे°; 4) जुहुयादितिचदि E; 5) यष्ट B; यजुष्टं E; 6) भूवो B; 7) भुर्भव: B; 8) °मथामि E; 9) विष्टं रं विष्टं C; 10) लवणेनोत्युक्तं B; vid. Gop. Br. I 1. 14; 11) ऽश्वेष C; 12) एवं fehlt in C; 13) °त्विजानामश्वे° C und E; 14) श्वेषं A und B; 15) श्वेष C; 16) स्वर्गेषां B; 17) नेति E; 18) योगक्षमो E; 19) यास्मि° A.

तद्यदौदुम्बर्यौ[1] म आसिष्ट[2] हिङ्कारार्षीन्मि[3] प्रास्ता-वीन्म उद्गासीन्मे[4] सुब्रह्मण्यामाह्वासीदित्युद्गात्रे[5] दक्षि-णा नीयन्ते ' ग्रहान्मे[6] ऽग्रहीत्प्राचारीन्मे[7] ऽप्रुश्रुवन्मे[8] समनसस्कारार्षीद्यान्नीन्मे[9] ऽवषट्कारार्षीन्मि इत्यध्वर्यवे ' क्षो-तृषदन आसिष्टायान्नीन्मे[10] ऽशांसीन्मे[11] ऽवषट्कारार्षीन्मि[12] इति क्षोत्रे ' देवयजनं[13] मे ऽचीक्लृपद्ब्रह्मासादं[14] मे ऽसीसृ-पद्ब्रह्मजपान्मे[15] ऽजपीत्पुरस्ताद्धोमसंस्थितहोमान्मे ऽक्षौ-षीद्यान्नीन्मे ऽशांसीन्मे ऽवषट्कारार्षीन्मि[16] इति ब्रह्मणे[17] ' भूयिष्ठेन मा[18] ब्रह्मणाकार्षीदित्येतद्वै[19] भूयिष्ठं ब्रह्म यद्ऋग्वङ्गिरसो ' ये[20] ऽङ्गिरसः[20] स रसो ये[21] ऽथर्वाणो[21] ये ऽथर्वाणास्तद्भेषजं ' यद्भेषजं तदमृतं यदमृतं तद्ब्रह्म ' स वा एष[22] पूर्वेषामृत्विजामर्धभागस्यार्धमितरेषामर्ध[23] ब्रह्मण इति ब्राह्मणम् ' ॥ ४ ॥

---

1) So corr. A, B und C °दुम्बर्वान्; E °दुम्बर्यं; 2) आशिष्ट C und E; 3) So corr. die hss. हिंकृणोत्; 4) उदक आसीन्मे A sec. m.; 5) °त्युद्गात्रे E; 6) ग्राहान्मे B und C; 7) °चीरीन्मे B; 8) प्युश्रवन्मे E; 9) समनसस्कार्षीत्??; 9) A, B und C fügen ऽशांसीन्मे ein; 10) आ-शिष्टा° C; 11) शंसीन्मे C; शांशीन्मे E; 12) °क्कार्षन्म E; 13) °ज्ञनां E; 14) °सादन C; 15) सीदद्ब्र° C; सीस्वपद्ब्रह्मासादन्ते E; 16) ऽवषट्का-रिसीन्म C; °षान्म E; 17) ब्रह्मणो E; 18) मा? vielleicht मे; 19) ब्रह्मणान्कार्षीदित्येताद्वे B; 20) In A zweimal ये ऽङ्गिरसः; 21) Wahrscheinlich Dittografie; 22) एषं E; 23) °भागसार्ध° B und C.

देवाश्च[1] ह वा असुराश्च संग्रामं समयतन्त । तत्रैतास्तिस्रो होत्रा[2] अनिष्कं प्रतिपेदिरे । तासामिन्द्र उक्थानि[3] सामानि लुलोप । तानि होत्रे प्रायच्छदाज्यं ह वै होतुर्बभूव । प्रउगं पोतुर्वैश्वदेवं ह[4] वै[4] होतुर्बभूव[4] । निष्केवल्यं नेष्टुर्मरुत्वतीयं ह वै होतुर्बभूवाग्निमारुतमाग्नीध्रस्य । तस्मादितद्भ्यस्तनरमिव शस्यते यदाग्निमारुतं[5] । तस्मादिते[6] संशंसुका[7] इव भवन्ति यद्धोता पोता नेष्टाग्नीध्रो मुमुक्षे[8] वसीत[8] । तद्ब्रह्मयसामिवास । तासामर्धं[9] प्रतिलुलोप[10] प्रथमार्हणं च प्रथमपदं[11] चैतद्ब्राह्मणां[12] चैतत्परिशिषेदिति[13] ब्राह्मणम् । ॥ ५ ॥

उद्दालको ह वा आरुणिरुदीच्यान्वृतो[14] धावयां चकार । तस्य ह निष्क[15] उपाहितो बभूवोपवादाद्बिभ्यतो[16] यो मा[17] ब्राह्मणो ऽनूचान उपवदिष्यति[18] तस्मा एतं प्रदास्यामीति । तद्धोदीच्यान्ब्राह्मणान्भयं[19] विवेदो-

---

1) देवश्च A; 2) So corr.; die hss. होत्रका; 3) उच्छानि B und C; 4) ह वै होतुः fehlt in E; 5) यदाग्नीमरुतं E; 6) °देतं C und E; 7) शंशंसुका E; 8) मुमोह A, B und E; besser wäre: मोह एवासोत्; 9) तासामर्धे E; 10) प्रती° A; 11) प्रथमं पदं C; 11) und 12) प्रथपदैतद्ब्रह्मणां E; 13) Sic! चैतत्परिशषेदिति C; 14) आरुणिरुदि° E; 15) निस्क C; 16) °दाहिभ्यतो B; °दादिभ्राता C; 17) मां A und B; 18) °दिष्यत B; 19) °हाणा भयं E.

द्दालको ह वा अयमायाति[1] कौरुपञ्चालो[2] ब्रह्मा[3] ब्रह्मपुत्रः ' स[4] ऊर्ध्वं[4] वृतो[4] न[4] पर्यादधीत[4] ' केनेमं वीरिण प्रतिसंयतामह्वा इति ' तं यत एव[5] प्रपन्नं दध्रे तत एवमनुप्रतिपेदिरे[6] ' ते[7] ह स्वैदायनं शौनकमूचुः स्वैदायन त्वं वै नो ब्रह्मिष्ठो[8] ऽसीति ' त्वयेमं वीरिण प्रतिसंयतामह्वा इति ' तं यत एव प्रपन्नं[9] दध्रे तत एवमनुप्रतिपेदिरे[10] ' तं ह स्वैदायना[11] इत्यामन्त्रयामास ' स भो[12] गौतमस्य[13] पुत्रेति[14] होस्मा असूया[15] प्रतिश्रुतं प्रतिशुश्राव ' स वै गौतमस्य[16] पुत्र ऊर्ध्वं[17] वृतो धावेत्[18] ॥ ६ ॥

यस्तद्दर्शपूर्णमासयो[19] रूपं[20] विद्यात्कस्मादिमाः[21] प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते कस्मादासामपरमिव प्रमथ्नूण्युपकक्षाण्यन्यानि[22] लोमानि जायन्ते ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमाः[23] प्राजाः शिरस्तः[24] प्रथमं

---

1) अमवति E; 2) °पाञ्चलो B; 3) ब्राह्मा B; 4) Corrupt. 5) एवं C; 6) l. एनम° ?; 7) So corr.; तं A, C und E; त B; 8) ब्रह्मेषु E; 9) प्रपन्न B; 10) l. एनम° ?; 11) स्मैद्दा° B; 12) So corr.; die hss. हो; 13) गोतमस्य A pr. m.; B und C; 14) So corr.; पुत्रेतीति A, B und C; पुत्रोतीति E; 15) असूयात् A, C und E; 16) गोतमस्य A sec. man. B und C; 17) उर्द्ध E; 18) So corr.; A, B und C धावीत्; E धावीत; 19) असूर्द्दर्शपू° E; 20) रुपं B; 21) कस्मात् sic!; 22) °एयनामि E; 23) °स्मादिमां E; 24) Von शिरस्तः bis अदन्तिका fehlt in B und C.

पलिता भवन्ति कस्माद्धतः[1] सर्वा एव पलिता भवन्ति ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमाः प्रजा अदन्तिका जायन्ते कस्मादासामपरमिव[2] जायन्ते ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादासां सप्तवर्षाष्टवर्षाणां[3] प्रमिद्यन्ते कस्मादासां[4] पुनरेव जायन्ते[5] कस्माद्धतः सर्व एव प्रमिद्यन्ते ' यस्तद्दर्शपूर्णमासयो रूपं[6] विद्यात्कस्माद्धरे दत्ताः पूर्वे[7] जायन्ते पर उत्तरे ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्माद्धरे दत्ता अणीयांसो ह्रसीयांसः[8] प्रथीयांसो वर्षीयांस[9] उत्तरे ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमौ दंष्ट्रौ दीर्घतरौ कस्मात्समे इव[10] जंभे[11] ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमे श्रोत्रे अन्तरतः समे इव दीर्णि ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मात्पुमांसः श्मश्रुवन्तो[12] ऽश्मश्रुवः स्त्रियो ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादासां संततमिव शरीरं भवति कस्मादासामस्थीनि दृढतराणीव[13] भवन्ति ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादासां प्रथमे वयसि रेतः सिक्तं न संभवति

---

1) Fehlt in E; 2) °परिमिव B; 3) °र्षाणा B; °ष्टवर्षा° fehlt in E; 4) °दासा E; 5) जायते B; 6) रूप B; 7) Von पूर्वे bis अणीयांसः fehlt in E; 8) ह्रसीयासः B; 9) वषीयांस B und E; 10) इमेव A und C; 11) जाम्भे B; 12) प्रमश्रवतो B; 13) दृष्टतराणी C;

कस्मादासां[1] मध्यमे वयसि रेतः सिक्तं संभवति कस्मादासामुत्तमे वयसि रेतः सिक्तं न संभवति ' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिं शिश्नमुच्चश[2] एति नीची[3] पद्यते ' कस्मात्सकृद्पानम्[4] ॥ ७ ॥

अथ[5] यः[5] पुरस्ताद्दष्टावाज्यभागान्विद्यान्मध्यतः पञ्च हविर्भागाः षट्प्राजापत्या उपरिष्टाद्दष्टावाज्यभागान्विद्यादथ यो गायत्रीं[6] हरिणीं[7] ज्योतिष्पक्षां[8] सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं[9] विद्यादथ यः पङ्क्तिं[10] पञ्चपदां सप्तदशाक्षरां सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं[11] विद्यात्तस्मै ह निष्कं प्रयच्छन्नुवाचानूचानो[12] ह वै स्वैदायनासि[13] सुवर्ण[14] वै[14] सुवर्णविदे[15] ददामीति ' तदुपयम्य निश्चक्राम[16] ' तत्रापवव्राज[17] यत्रेतरो बभूव ' तं ह पप्रच्छ[18] किमेष गौतमस्य[19] पुत्र इत्येष ब्रह्मा ब्रह्मपुत्र[20] इति होवाच[21] यदेनं कश्चिदुपवदेतोत[22] मीमां-

---

1) °दासा E; 2) उच्चश sic!; 3) नीची corrupt; 4) °दपादानम् C; °दयानम् E; 5) अप्रथः E; 6) गायित्रीं C; 7) हरीणीं E; 8) ज्योतिष्यं E; ज्योतिष्पक्षा C; 9) °वहन्ती E; °वहन्तिं C; 10) पङ्क्ति A pr. m. und E; 11) °वहन्तिं C; वहन्ती E; 12) प्रयतन्° E; 13) So corr. A, C und E °यनास; B स्वेदायनांस; 14) सुवर्णत्वे C; वै fehlt in E; 15) Nur विदे in E; C fügt ह ein; 16) निश्चक्रम्य A und E; 17) So corr.; तत्रापव्राज A sec. man. und B, तत्रपव्रज C; तत्रापव्रज E und A pr. m.; 18) प्रयच्छ C; 19) गोत° A sec. m., B, C und E; 20) ब्रह्म B; 21) होवांच B; 22) °देतौत B; °देतोतं A.

सेत[1] कृ[2] वा[2] मूर्धा वा[2] अस्य[2] विपतेत्प्राणा वैनं जक्ष्युरिति[3] ' ते मिथ एव चिक्रन्देयुर्विप्रापवव्रज्ञ[4] यत्रेतरो बभूव[5] ' ते प्रातः समित्पाणय उपेदियुरुपायामो भवन्तमिति ' किमर्थमिति ' यानेव नो भवांस्तान्ध्यः प्रश्नानपृच्छतानेव[6] नो भवान्व्याचक्षीतिति[7] ' तथेति ' तेभ्य एतान्प्रश्नान्व्याचचष्टे[8] ॥ ८ ॥

यत्पुरस्ताद्विदेः प्रथमं बर्हि स्तृणाति तस्मादिमाः प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते ' यदपरमिव प्रस्तरमनुप्रस्तृणाति तस्मादासामपरमिव श्मश्रूण्युपकक्षाण्यन्यानि[9] लोमानि जायन्ते ' यत्प्राग्बर्हिषः प्रस्तरमनुप्रकरति तस्मादिमाः प्रजाः शिरस्तः प्रथमं[10] पलिता भवन्ति ' यदन्ततः सर्वमेवानुप्रकरति तस्मादन्ततः सर्व एव पलिता भवन्ति ' यत्प्रयाज्ञा[11] अपुरोऽनुवाक्यावन्तो[12] भवन्ति तस्मादिमाः प्रजा अदन्तिका जायन्ते ' यद्बवींषि[13] पुरोऽनुवाक्यावन्ति भवन्ति तस्मादासामपरमिव जायन्ते ' यदनुयाज्ञा अपुरो-

---

1) मांसेति B; 2) Corrupt; 3) So B. Ind.; die hss. ज्ञक्षु°; 4) चिक्रन्देयु: corrupt °र्विप्रापवव्रज्ञ A und B; °र्विप्रा अपवव्रज्ञ C und E; corrupt; 5) बभूव: A und E; बभूवु: B und C; 6) So corr.; A und B °पृच्छ्यानेव, C °पृच्छ्यानेव, E °पृच्छायानेव; 7) So corr.; die hss. °येति; 8) Vgl. I 2. 13; 9) श्मश्रूण्यु° B; श्मश्रूण्यपक° C; °कक्ष्याण्यानि E; 10) Von प्रथमं bis यत्प्रयाज्ञा fehlt in E; 11) यत्प्रज्ञाज्ञा C; 12) अपुरेऽनु° E; 13) यद्ब्रवींषि B.

ऽनुवाक्यावन्तो भवन्ति तस्मादासां सप्तवर्षाष्टवर्षाणां[1] प्रभिद्यन्ते ' यत्यन्नीसंयाज्ञाः पुरोऽनुवाक्यावन्तो[2] भवन्ति तस्मादासां पुनरेव जायन्ते ' यत्समिष्टयजुरपुरोऽनुवाक्या-वद्भवति[3] तस्मादन्ततः सर्व एव प्रभिद्यन्ते[4] ' यद्गायत्र्या-नूच्य[5] त्रिष्टुभा[6] यजति तस्मादधरे[7] दन्ताः[8] पूर्वे जायन्ते पर उत्तरे ' यदृचानूच्य यजुषा[9] यजति तस्मादधरे दन्ता अणीयांसो ह्रसीयांसः[10] प्रथीयांसो वसीयांस[11] उत्तरे ' यदाघारौ दीर्घतरौ प्राञ्चावाघारयति[12] तस्मादिमौ दंष्ट्रौ दीर्घतरौ ' यत्संयाज्ये सच्छन्दसी[13] तस्मात्समे इव जम्भे ' यच्चतुर्थे प्रयाजे[14] समानयति तस्मादिमे ओत्रे अन्तरतः समे इव दीर्णे ' यऽजपं जपित्वाभिहिंकृणोति तस्मात्पुमांसः श्मश्रुवन्तो[15] ऽश्मश्रुव[16] स्त्रियो ' यत्सामिधेनीः संतन्व-न्नन्वाह[17] तस्मादासां संततमिव शरीरं भवति[18] ' यत्सा-मिधेन्यः काष्ठकविषो भवन्ति तस्मादासामस्थीनि दृढतरा-णीव[19] भवन्ति ' यत्प्रयाजा आज्यकविषो भवन्ति तस्मा-

---

1) °वर्षाणा C; 2) °वाक्यवन्ति E; 3) अन्तमिट° E; 4) प्रतिभिद्यन्ति E; 5) °नूत्य B; 6) C fügt व ein; 7) °दधार् C; 8) Von दन्ताः bis अणीयांसः fehlt in B; 9) यजुष E; 10) ह्रणीयांसः B; 11) वसीयांस B; वषीषीयांस E; 12) प्रञ्चावा° C; 13) संछन्दसि A; संछन्दसो B und E; 14) प्रजायाजे B; प्रजाते C; 15) Fehlt in E; 16) ऽश्मश्रुवं B; 17) So corr. संतन्वन्नाह A, C und E; संतन्वन्ता ह B; 18) भवन्ति B; 19) दृढतणीव B.

दासां प्रथमे वयसि रेतः सिक्तं न संभवति ' यन्मध्ये हविषां[1] दध्ना च पुरोडाशेन च[2] प्रचरन्ति तस्मादासां मध्यमे वयसि रेतः सिक्तं संभवति[3] ' यदनुयाजा आज्य-हविषो[4] भवन्ति तस्मादासामुत्तमे वयसि रेतः सिक्तं न संभवति[5] ' यदुत्तमे ऽनुयाजे सकृद्पानिति तस्मादिदं शिश्नमुच्चश[6] एति नीचीपद्यते[7] ' यन्नापानेत्सकृच्छ्नं स्याद्यन्मुकुरपानेत्सकृत्पन्नं स्यात्तस्मात्सकृद्पानिति नेत्सकृच्छ्नं स्यात्सकृत्पन्नं वेति ' ॥ १ ॥

अथ ये पुरस्ताद्दृष्टावाज्यभागाः पञ्च प्रयाजा[8] द्वावाघारौ[9] द्वावाज्यभागावाग्नेय[10] आज्यभागानां प्रथमः सौम्यो[11] द्वितीयो[12] हविर्भागानां ' हविर्द्येव सौम्यमाग्नेयः पुरोडाशो ' ऽग्नीषोमीय उपांशुयाजो[13] ' ऽग्नीषोमीयः पुरोडाशो ऽग्निः स्विष्टकृदित्येते मध्यतः पञ्च हविर्भागा ' अथ ये षट् प्राजापत्या[14] इडा च प्राशित्रं च यच्चाग्नीध्रीयावद्यति ब्रह्मभागो यजमानभागो ऽन्वाहार्य[15] एव षष्ठो ' ऽथ य उपरिष्टाद्दृष्टावाज्यभागास्त्रयो[16] ऽनुयाजाश्चत्वारः पत्नीसं-

---

1) हविषो E; 2) च fehlt in A pr. m.; B, C und E; 3) संभवन्ति B; 4) अज्यहविषो C; 5) संभवन्ति E; 6) उच्चश्रस् corrupt! 7) नीची corrupt; 8) प्रजाया C; प्रयजि B; 9) हि वाघारौ B; 10) ह्यावाज्य° E; 11) सोम्य B; 12) द्वितीयौ C; 13) उपांसु° E; 14) °जापत्य A pr. m.; 15) ऽन्वाहाय E; 16) उपरिष्टावाज्य° B.

याज्ञाः समिष्टयजुरष्टमम॑थ या गायत्री[1] ह॒रिणी[2] ज्यो-
तिष्पक्षा[3] सर्वैर्यज्ञैर्यज्ञमानं[4] स्वर्गं लोकमभिवह॒ति वेदि-
रेव सा[5]' तस्य ये पुरस्ताद॒ष्टावाज्यभागाः स दक्षिणः
पक्षो' ऽथ य ऽपरिष्टाद॒ष्टावाज्यभागाः स उत्तर॒ः पक्षो'
ह॒विंष्यात्मा' गार्ह॒पत्यो ज्ञघनमा॑ह॒वनीय॒ः[6] शिर॒ः' सौ-
वर्णराज्ञतौ पक्षौ' तद्यदादित्यं पुरस्तात्पर्यत्तं न पश्यन्ति
तस्माद॒ज्योतिष्क उत्क॒रो[7] भवत्यथ या पङ्क्ति॒ः पञ्चपदा[8]
सप्तदशान्नरा सर्वैर्यज्ञैर्यज्ञमानं स्वर्गं[9] लोकमभिवह॒ति[10]
याज्यैव[11] सा' तस्या श्रीं श्रावयेति चतुरक्षर॑मस्तु[12] श्रौ-
षदिति चतुरक्षरं' यजेति[13] द्व्यक्षरं[14]' ये[15] यजामह॒[15] इति
पञ्चाक्षरं' द्व्यक्षरो[16] वै वषट्का॒रः' सैषा पङ्क्ति॒ः पञ्चपदा
सप्तदशान्नरा सर्वैर्यज्ञैर्यज्ञमानं[17] स्वर्गं[18] लोकमभिवह॒ति'
तद्यत्रास्यैश्वर्यं स्याद्यत्र वैनमभिवक्ष्यु॒रेवंविदमेव तत्र ब्र-
ह्माणं वृणीयान्नानेवंविद॒मिति[19] ब्राह्मणम्' ॥ १० ॥

अथ ह॒ प्राचीनयोग्य आज्ञगामाग्निह॒ोत्रं भवन्तं पृच्छा-

---

1) गायत्रीं B; 2) ह॒रणी B; 3) ज्योतिष्पक्षां E; 4) °ज्ञमान C; 5) सां B; 6) °ह॒वनी॒ः E; 7) उत्तरो B; उत्तरे C; उतरो E; 8) °पद॒ात् E; 9) स्वर्ग B und C; 10) लोकमतिवह॒ति C; 11) यां येव E; 12) चतुरक्षमस्तु E; 13) यज्ञेति A, B und C; 14) द्व्यक्षरं C; 15) ये॒ः यज्ञामह॒ B; ये यज्यामह॒ C; य यज्ञज्ञामह॒ E; 16) द्व्यक्षरौ E; 17) यज्ञै॒ः fehlt in A; 18) स्वर्ग E; 19) दृशीयान्नने° E.

मि[1] गौतमेति[2] । पृच्छ[3] प्राचीनयोग्येति[4] । किंदेवत्यं ते गवीडायां[5] । किंदेवत्यमुपङ्क्तायां । किंदेवत्यमुपसृष्टायां । किंदेवत्यं[6] वत्समुन्नीयमानं[7] किंदेवत्यं वत्समुन्नीतं[7] । किंदेवत्यं दुह्यमानं । किंदेवत्यं दुग्धं । किंदेवत्यं प्रक्रम्यमाणं । किंदेवत्यं ह्रियमाणं[8] । किंदेवत्यमधिश्रीयमाणं[9] । किंदेवत्यमधिश्रितं । किंदेवत्यमभ्यवड्वाल्यमानं[10] । किंदेवत्यमभ्यवड्वालितं । किंदेवत्यं समुद्वान्तं[11] । किंदेवत्यं विष्यन्नं । किंदेवत्यमद्भिः[12] प्रत्यानीतं । किंदेवत्यमुद्वास्यमानं । किंदेवत्यमुद्वासितं[6] । किंदेवत्यमुन्नीयमानं[6] । किंदेवत्यमुन्नीतं[6] । किंदेवत्यं[6] प्रक्रम्यमाणं[6] । किंदेवत्यं ह्रियमाणं[13] । किंदेवत्यमुपसाद्यमानं[14] किंदेवत्यमुपसादितं । किंदेवत्या[15] समित्किंदेवत्यां[16] प्रथमामाङ्क्तिमक्षौषीः । किंदेवत्यं गार्हपत्यमवेक्षिष्ठाः । किंदेवत्योत्तराङ्क्तिः । किंदेवत्यं क्रुवा स्रुचं त्रिरुदञ्चमुदनैषीः[17] । किंदेवत्यं बर्हिषि स्रुचं[18] निधायोन्मृज्योत्तरतः पाणी निर-

---

1) So corr. vgl. I 3. 13, die hss. पृच्छेदु; 2) गोतम इति A sec. m. und B; गोतमेति C und E; 3) पृच्छं B; 4) °योग्नेति A; 5) गविडायां A; 6) Fehlt in E; 7) Corrupt! 8) ह्रीय° A pr. m. und E; 9) °श्रियमाणां A sec. m. und C; 10) °देवत्यमध्य° B; 11) समुढान्तं C, समुद्रान्तं E; 12) Von किं° bis उन्नीयमानं fehlt in B; 13) ह्रीयमाणां A und E; 14) °पसद्यमानं C; 15) °देवत्यममिकं किं A; 16) °देवत्या E; 17) So corr.; die hss. °मुन्नैषी:; 18) सुच E.

मार्ज्मीः[1] ' किंदेवत्यं द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षीः ' किंदेवत्यं प्रथमं[2] प्राशीः ' किंदेवत्यं द्वितीयं ' किंदेवत्यमन्ततः सर्वमेव[3] प्राशीः ' किंदेवत्यमप्रक्षालितयोदकं स्रुचा न्यनैषीः ' किंदेवत्यं प्रक्षालितया ' किंदेवत्यमपरेणाहवनीयमुदक स्रुचा[4] न्यनैषीः[5] ' किंदेवत्यं स्रुवं[6] स्रुचं[7] च प्रत्यताप्सीः ' किंदेवत्यं रात्रौ स्रुग्दण्डमवामार्ज्मीः[8] ' किंदेवत्यं प्रातरुदमार्ज्मीरित्येतच्चेद्वित्थ[9] गौतम कृतं ते[10] यद्यु न वेत्थाकृतं त[11] इति ब्राह्मणम् ' ॥ ११ ॥

स होवाच रौद्रं[12] मे गवीडायां ' मानव्यमुपक्रृतायां ' वायव्यमुपसृष्टायां ' वैराजं वत्समुन्नीयमानं ' ज्ञागतमुन्नीतमाग्निनं[13] दुह्यमानं ' सौम्यं[14] दुग्धं ' बार्हस्पत्यं प्रक्रम्यमाणं ' द्यावापृथिव्यं[15] क्रियमानमाग्नेयमधिश्रीयमाणं[16] ' वैश्वानरीयमधिश्रितं ' वैष्णवमभ्यवड्वाल्यमानं ' मारुतम-

---

1) So corr.; die hss. निर्मार्ज्मीः A; निर्माज्मी: B, C und E; 2) प्रथम E; 3) सर्वमेवा A, B und E; 4) स्रूचा B; 5) न्यनीषी: C; 6) स्रुक् C und B; 7) स्रुवं C; fehlt in E; 8) °वमार्ज्मीः A, B und C; °वमाज्मी: E; 9) So corr.; A und B प्रातरुन्मार्ज्मी°; C und E प्रातरुन्माज्मी°; 10) So corr.; die hss. चेद्; 11) च E; 12) रौद्र् B; 13) ज्ञागतमुन्नित° B; 14) सौम्य B; 15) याग्निद्यावापृथिव्यां B; °थिव्यां A und C; 16) ह्रीयमा° A und E.

भ्यवङ्वालितं ' पौष्णं[1] समुद्वान्तं ' वारुणं विष्यषं ' सार-
स्वतमद्भिः प्रत्यानीतं ' त्वाष्ट्रमुद्वास्यमानं ' धात्रमुद्वासितं '
वैश्वदेवमुन्नीयमानं[2] ' सावित्रमुन्नीतं[3] ' बार्हस्पत्यं प्रक्रम्य-
माणं ' द्यावापृथिव्यं[4] क्रियमाणमैन्द्रमुपसाद्यमानं[5] ' ब्र-
ह्मायोपसन्नमाग्नेयी[6] समिद्धां[7] प्रथमामाकृतिमक्रौषं मामेव
तत्स्वर्गे लोके ऽधां ' यद्वार्हपत्यमवेन्निषमस्य[8] लोकस्य
संतत्यै[9] ' प्राजापत्योत्तराकृतिस्तस्मात्पूर्णतरा[10] मनसैव
सा ' यद्धुवा स्रुचं[11] त्रिरुदञ्चमुदनैषं[12] रुद्रांस्तेनाप्रैषं[13] '
यद्बर्हिषि स्रुचं[14] निधायोन्मृज्योत्तरतः पाणी[15] निरमा-
र्ङ्मोषाधिवनस्पतींस्तेनाप्रैषं[16] ' यद्द्वितीयमुन्मृज्य पित्र्युप-
वीतं कृत्वा दक्षिणातः पितृभ्यः स्वधामकार्षं[17] पितॄंस्ते-
नाप्रैषं[18] ' यत्प्रथमं प्राशिषं प्राणांस्तेनाप्रैषं[19] ' यद्द्वितीयं
गर्भांस्तेन[20] ' तस्मादनश्नतो गर्भा ञ्जीवन्ति[21] ' यदुत्तरतः
सर्वमिव प्राशिषं[22] विश्वान्देवांस्तेनाप्रैषं[23] ' यदप्रक्षालित-

---

1) पौष्णा E; 2) Fehlt in E; 3) सावित्रम् fehlt in E; 4) °पृथिव्यां A pr. m.; B und C; 5) ह्रीय° A und E; 6) Sic! 7) समीधां E; समिधा B; 8) धा यद्वा° B; 9) सतत्यै C und E; 10) प्राजपत्यो° B; 11) स्रुवं B; स्रुतं E; 12) So corr.; die hss. °मुन्नैषं; 13) रुद्रास्ते° B; 14) श्रुतं E; 15) पाणि E; 16) So corr.; A, B und E निर्मार्ङ्मो°; C निर्मार्ङ्मो°; 17) °मकार्ष B; 18) °नाप्रैषा E; 19) प्राणांस्ते° A; 20) गर्भस्तेन B; 21) ञ्जीवन्ते B; 22) सर्वामवाप्राशिषं C; 23) विश्वा-न्द्वास्ते° E.

योदकं स्रुचा न्यनैषं[1] सर्पेतरज्जनांस्तेनाप्रैषं ' यत्प्रक्षालितया[2] सर्पपुण्यजनांस्तेन[3] ' यदपरेणाहवनीयमुदकं स्रुचा न्यनैषं गन्धर्वाप्सरसस्तेनाप्रैषं ' यत्स्रुवं[4] स्रचं च प्रत्यताप्सं[5] सप्तर्षींस्तेनाप्रैषं ' यद्रात्रौ स्रुग्दण्डमवामार्ष्टं[6] ये रात्रौ संविशन्ति दक्षिणांस्तानुदनैषं[7] ' यत्प्रातरुदमार्ष्टं[8] ये प्रातः प्रव्रजन्ति दक्षिणांस्तानुदनैषमिति[9] ब्राह्मणम् ' ॥ १२ ॥

एवमेवैतद्वो यथा भवानाह ' पृच्छामि त्वेव[10] भवन्तमिति ' पृच्छ प्राचीनयोग्येति ' यस्य सायमग्नय उपसमाहिताः स्युः सर्वे ऽग्वलयेयुः[11] प्रक्षालितानि यज्ञपात्राण्युपसन्नानि[12] स्युरथ चेद्दक्षिणाग्निरुद्वायात्किं वा ततो भयमागच्छेदिति ' क्षिप्रमस्य पत्नी प्रैति यो ऽविद्वाञ्जुहोति ' विद्यया त्वेवाहमभिजुहोमीति[13] ' का ते विद्या का प्रायश्चित्तिरिति ' गार्हपत्यादधि दक्षिणाग्निं प्रणीय प्राचो[14] ऽङ्गारानुद्धृत्य प्राणापानाभ्यां[15] स्वाहेति जुहुयादथ[16] प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात्सा[17] मे

---

1) न्यनैष E; 2) °लितयो B; 3) °नंस्तेन B; 4) यत्स्रुव E; 5) प्रत्यताप्स B; 6) So corr. °वमार्च्यं A und B; °वमार्क्षं C und E; 7) So corr.; die hss. °नुनैषं; 8) Vgl. 6; 9) Vgl. 7; 10) त्वेवं B; त्वेमो E; 11) ऽग्वलयेषु E; 12) °सन्तानि E; सन्नानि C; 13) °होमिति C; 14) प्राञ्चो C; 15) प्रापाणावातामां E; 16) Statt जुहुयाद् erwartet man hier und an den folgenden Stellen जुहुयाम्; 17) जुहू° C.

विद्या ' सा प्रायश्चित्तिरित्यथ चेदाहवनीय उद्धायात्किं वा ततो भयमागच्छेदिति[1] ' क्षिप्रमस्य पुत्रः प्रैति[2] यो ऽविद्वाञ्जुहोति ' विद्यया त्वेवाहमभिजुहोमीति ' का ते विद्या का[3] प्रायश्चित्तिरिति ' गार्हपत्यादध्याहवनीयं प्रणीय[4] प्रतीचो ऽङ्गारानुद्धृत्य[5] समानव्यानाभ्यां स्वाहेति जुहुया-दथ[6] प्रातर्यथास्थानमग्नीनुपसमाधाय[7] यथापुरं जुहुयात्सा मे विद्या सा प्रायश्चित्तिरित्यथ[13] चेत्सर्वं ऽग्नय उद्धायेयुः किं वा ततो भयमागच्छे-

---

1) भयमा fehlt in B; 2) प्रेरित C; 3) Fehlt in E; 4) प्रणीया B; 5) गारानुठत्य B und E; 6) °यादथ B; 7) Von अग्नीन् bis इत्यथ fehlt in A pr. man., B, C und E und diese haben statt इत्यथ, इत्येवाथ; 8) तेवाह° E; 9) इति fehlt in E; 10) प्रणायेद् A pr. man.; प्रणायेद् B; प्रणीयेद् C; प्रणीये E; 11) गारानु° B und E; 12) Von अग्नीन् bis इत्यथ fehlt in A pr. m., B, C und E; und statt इत्यथ haben die hss. इत्येवाथ; 13) Von इत्याथ bis त्वेवा° fehlt in E.

दिति ' न्निप्रं गृह्णपतिः सर्वऽयानिं[1] ञीयते यो ऽविद्वा-ञुह्वोति ' विद्यया त्वेवाह्वमभिञुह्वोमीति[2] ' का ते विद्या का प्रायश्चित्तिरित्यानडुहेन शकृत्पिण्डेनाग्न्यायतनानि[3] परिलिप्य ह्वोम्यमुपसाद्याग्निं[4] निर्मथ्य प्राणापानाभ्यां स्वा-ह्वा समानव्यानाभ्यां स्वाह्वोदानव्रूपाभ्यां[5] स्वाह्वेति ञुहु-यादथ प्रातर्यथास्थानमग्नीनुपसमाधाय[6] यथापुरं ञुहुयात्सा मे विद्या सा प्रायश्चित्तिरित्यथ चेन्नाग्निं ञनयितुं[7] शक्नुयुर्न[8] कुतश्चन वातो वायात्किं वा ततो भयमा-गच्छेदिति ' मोघमस्येष्टं च हुतं च भवति यो ऽविद्वा-ञुह्वोति ' विद्यया त्वेवाह्वमभिञुह्वोमीति ' का ते विद्या का प्रयश्चित्तिरित्यानडुह्वैनैव[9] शकृत्पिण्डेनाग्न्यायतनानि[10] परिलिप्य ह्वोम्यमुपसाद्य वात[11] आ वातु भेषञ्जमिति सूक्तेनात्मन्येव ञुहुयादथ प्रातरग्निं[12] निर्मथ्य यथास्था-नमग्नीनुपसमाधाय[13] यथापुरं ञुहुयात्सा[14] मे विद्या सा प्रायश्चित्तिरिति ब्राह्मणम् ' ॥ १३ ॥

एवमेवैतद्वो भगवन्यथा भवानाह्वोपयामि त्वेव[15]

---

1) सर्वऽयनिं A; सर्वऽयनं C; 2) °होमति B; 3) सकृर्वत्यपदेता° E; 4) °पसद्याग्निं B; °पसाद्याग्नि C und E; 5) °व्रूपभ्यां C; 6) Vgl. Seite ८१ Note 12; 7) ञनयितु E; 8) शंकुर्युन्न B; शक्नुर्युर्न C; शक्नुर्युर्न E; 9) °नुडुहे° A und B; °त्यान्तडुहे° E; 10) प्राकुत्पिण्डेनास्यायतनानि C; 11) वातु C; 12) °ग्नि E; 13) °मग्निनुपसमाध्यय B; 14) ञुहुया-त्सो B; 15) त्येव A und E; त्वे C.

भवन्तमित्येवं[1] चेन्नावद्ध्यो[2] मूर्धा ते व्यपतिष्यदिति[3]' ह्न्त तु ते तद्वद्ध्यामि[4] यथा ते न विपतिष्यतीति[5]' यो ह वा एवंविद्वानश्नाति च पिबति च वाक्तेन तृप्यति' वाचि तृप्तायामग्निस्तृप्यत्यग्नौ तृप्ते पृथिवी तृप्यति' पृथिव्यां तृप्तायां यानि पृथिव्यां भूतान्यन्वायत्तानि[6] तानि तृप्यन्ति' यो ह वा[7] एवंविद्वानश्नाति च पिबति च प्राणास्तेन तृप्यति' प्राणे तृप्ते वायुस्तृप्यति' वायौ तृप्ते ऽन्तरिक्षं तृप्यत्यन्तरिक्षे[8] तृप्ते यान्यन्तरिक्षे भूतान्यन्वायत्तानि तानि तृप्यन्ति' यो ह वा एवंविद्वानश्नाति च पिबति च चक्षुस्तेन तृप्यति' चक्षुषि[9] तृप्त[10] आदित्यस्तृप्यत्यादित्ये तृप्ते द्यौस्तृप्यति' दिवि[11] तृप्तायां यानि दिवि भूतान्यन्वायत्तानि[12] तानि[12] तृप्यन्ति[13]' यो ह वा एवंविद्वानश्नाति च पिबति च मनस्तेन तृप्यति[14]' मनसि तृप्ते चन्द्रमास्तृप्यति[15]' चन्द्रमसि तृप्त आपस्तृप्यन्त्यप्सु तृप्तासु यान्यप्सु भूतान्यन्वायत्तानि[16] तानि तृप्यन्ति' यो ह वा एवंवि-

---

1) °त्येव A; 2) वनुवक्ष्ये C; चेन्तावेक्ष्य B; चेनुवक्ष्य E; 3) °ष्यतीति A und E; °ष्यदिदिति C; 4) तद्वक्षामि E; 5) व्यपति° A pr. m.; विपतीति E; 6) °यन्तानि E; 7) वः E; 8) तृप्यन्त्येतरिक्षे C; तृप्यन्त्यन्त° E; 9) चक्षुषी A pr. m. und E; 10) तुप्य B; तृप्य C; 11) दिविस् B und E; 12) भूतानि C; 13) तृप्यन्तिं E; 14) तृप्यन्तिं E; 15) °प्यन्तिं E; 16) भूतान्वा° B.

द्धानश्नाति च पिबति च श्रोत्रं तेन तृप्यति' श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति' दिक्षु चान्तर्देशेषु च तृप्तेषु यानि दिक्षु चान्तर्देशेषु च[1] भूतान्यन्वायत्तानि[1] तानि तृप्यन्ति' यो ह वा एवंविद्धानश्नाति च पिबति च तस्यायमेव दक्षिणः पाणिर्जुह्वः[2]' सव्य[3] उपभृत्कण्ठो ध्रुवान्नं[4] हविः' प्राणा ज्योतींषि[5]' सदृष्टं[6] सदा हुतं सदाशितं[7] पायित-मग्निहोत्रं[8] भवति य एवं वेद यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम्' ॥ १४ ॥

प्रियमेधा ह वै भरद्वाजा यज्ञविदो मन्यमानास्तें ह स्म न कञ्चन[9] वेदविदमुपयन्ति'ते सर्वमविदुस्तें सहैवा-विदुस्तें ऽग्निहोत्र[10] एव न समवदन्त[11]' तेषामेकः सकृदग्निहोत्रमजुहोद्धिरेकस्त्रिरेकस्तेषां[12] यः सकृदग्निहो-त्रमजुहोत्तमितरावपृच्छतां[13] कस्मै त्वं जुहोषीत्येकधा वा इदं सर्वं प्रजापतिः' प्रजापतय एवाहं सायं जुहोमीति प्रजापतये प्रातरिति' तेषां यो द्विरजुहोत्तमितरावपृच्छतां

---

1) चक्षूतान्यन्वा° A; 2) °र्जुहु A pr. man. und B; जुहः E; 3) सन्त्य E; सव्यं C; 4) ध्रुवान्न C; 5) ज्योतीषि B; ज्योतींसो A pr. m.; 6) सदेष्ट C; सदेष्टी E; 7) सदासितं E; 8) पाहितम° A; पापितम° E; 9) So corr.; die hss. कञ्चना; 10) So corr.; die hss. ऽग्निहोत्रम्; 11) So corr.; die hss. समवदयन्त; 12) त्रिरेकस् fehlt in E; 13) स्म-कृदग्नि° B.

काभ्यां[1] त्वं जुहोषीत्यग्नये प्रजापतय[2] इति सायं सूर्याय प्रजापतय इति प्रातस्तोषां यस्त्रिरजुहोत्तमितरावपृच्छतां केभ्यस्त्वं जुहोषीत्यग्नये प्रजापतये ऽनुमतय इति सायं सूर्याय प्रजापतये ऽग्नये[3] स्विष्टकृत इति प्रातस्तोषां यो द्विरजुहोत्स आधीत्सि भूयिष्ठो ऽभवत्प्रजया चेतरौ[4] श्रिया चेतरावत्याक्रामत्तस्य[5] क्व प्रजामितरयोः प्रजे[6] सजातत्वमुपैतां[6] 'तस्माद्धुहोतव्यं यजुषा चैव मनसा च 'यामेव स ऋद्धिमाधीत्तामृध्नोति[7] य एवं वेद यश्चैवं[8] विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम्' ॥ १५ ॥

स्वाहा वै कुतः संभूता 'केन प्रकृता 'किं वास्या गोत्रं[9] 'कत्यक्षरा 'कतिपदा 'कति वर्णा[10] 'किंपूर्वावसाना 'क्व चित्स्थिता 'किमधिष्ठाना 'ब्रूहि स्वाहाया यद्दैवतं रूपं च 'स्वाहा वै सत्यसंभूता 'ब्रह्मणा[11] प्रकृता 'लामगायनसगोत्रा[12] 'द्वे अक्षरे 'एकं पदं 'त्रयश्च वर्णाः शुक्लः पद्मः सुवर्ण इति 'सर्वच्छन्दसां[13] वेदेषु समासभुतैकोच्छ्वासा वर्णान्ते चत्वारो वेदाः शरीरे 'षडङ्गान्यो-

---

1) काभ्य: C; 2) प्रजापत C; 3) Fehlt in B; 4) चेतरौ ist einmal zu viel; 5) चेतरावत्प्राक्रा° B; 6) So corr. nach Kaṭhakam; die hss. haben प्रजासु यातस्त्वमुपेयातां; 7) So corr.; die hss. ऋठिमार्ध्नोति ता°; 8) यश्चैव E; 9) गात्रां B; 10) Fehlt in B und E; 11) ब्रह्मण: A, C und E; 12) लामकायन° C; 13) °च्छन्दसि E.

षधिवनस्पतयो लोमानि 'चक्षुषी सूर्याचन्द्रमसौ 'सा स्वाहा सा[1] स्वधा सैषा यज्ञेषु वषट्कारभूता प्रयुज्यते[2]' तस्या अग्निर्दैवतं 'ब्राह्मणो[3] ऽयमिति ब्राह्मणम्' ॥ १६ ॥

अथापि कारवो ह नाम ऋषयो ऽल्पस्वा आसंस्ते इममेकगुमग्निष्टोमं ददृशुस्तमाहरंस्तेनायजन्त 'ते स्वर्ययुः' स य[4] इच्छेत्स्वरियामिति[5] स एतेनैकगुनाग्निष्टोमेन यजेतेति ब्राह्मणम्' ॥ १७ ॥

अथातः सवनीयस्य पशोर्विभागं व्याख्यास्याम[6] 'उद्धृत्यावदानानि[7] हनू सन्निधे[8] प्रस्तोतुः 'कण्ठः[9] सकाकुदः[10] प्रतिहर्तुः 'श्येनं[11] वक्ष[12] उद्गातुर्दक्षिणं पार्श्वं सांसमध्वर्योः[13]' सव्यमुपगातॄणां 'सव्यो ऽसः[14] प्रतिप्रस्थातुर्दक्षिणा[15] श्रोणिरध्यास्त्री[16] ब्रह्मणो 'ऽवरसक्थं[17] ब्राह्मणाच्छंसिन 'ऊरुः[18] पोतुः 'सव्या श्रोणिर्नेतुरवरसक्थं[19] मैत्रावरुणस्योरुरच्छावाकस्य[20] 'दक्षिणा दोर्निष्टुः'

---

1) Fehlt in C; 2) प्रयुज्यन्ते B; 3) ब्रह्मणो C; 4) य fehlt in C; 5) So corr.; A und C °त्स्वर्यामीति; B °त्स्वर्या यीति; E °त्स्वर्यामिति; 6) व्याख्यासाम E; 7) °वदानि E; 8) तिद्धे E; 9) कण्ठस्य B; 10) काकुदस्य B; 11) श्येन B; 12) So corr.; alle hss. पक्ष; 13) सास° B und E; 14) सः B und E; 15) प्रतिप्रस्थातु° E; 16) ? sic; 17) ऽवरसक्थं C; °सक्थं A und C; °सच्छं B; 18) ऊरुः C; 19) Vgl. 17; 20) So corr.; die hss. °स्योऽरुरच्छावाकस्य.

सव्या सदस्यस्य सदं[1] चानूकं च गृहपतेर्जाघनी[2] पत्न्या-स्तां[3] सा ब्राह्मणेन प्रतिग्राहयति वनिष्ठुर्हृदयं वृक्कौ चाङ्गुल्यानि[4] दक्षिणो बाहुराग्नीध्रस्य सव्य आत्रेयस्य दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य[5] सव्यौ पादौ गृहपत्न्याः व्रतप्रदायाः[6] सक्थ्यैवैनयोरोष्ठस्तं गृहपतिरेवानुशिनष्टि[7] मणिकाश्च[8] स्कन्ध्यास्तिस्रश्च[9] कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा अर्धं चापानस्योन्नितुरंत[10] ऊर्ध्वं चमसाध्वर्यूणां क्लोमा[11] शमयितुः शिरः सुब्रह्मण्यस्य यः श्वःसुत्या-माह्वयते तस्य चर्म तथा खलु षट्त्रिंशत्संपद्यन्ते[12] षट्त्रिंशदवदाना गौः षट्त्रिंशदक्षरा बृहती[13] बार्हतो वै स्वर्गो लोको बृहत्या वै[14] देवाः स्वर्गं लोकं यन्ति[15] बृहत्या[16] स्वर्गे लोके प्रतितिष्ठन्ति[17] प्रतितिष्ठन्ति[18] प्रजया[19] पशुभिर्य[20] एवं विभज्यन्ते[21] य यदतो ऽन्य-थाशीलिको[22] वा पापकृतो वा कृतादो वान्यजना[23]

---

1) सदां B; 2) °ग्नीधनी B; 3) पत्न्यास्था C; 4) Sic; B वाङ्° ; 5) °पदस्य B; 6) व्रतपदायाः B; 7) So corr.; die hss. haben °रेवानुशास्तिः 8) मणिग्राश्च B, C und E; 9) स्कधास्त्रि° B; 10) चापा-नश्रोत्रे° A pr. m.; चापं नेस्यो E; 11) क्रोमा E; 12) °पद्यते C; 13) बृहतिः B; 14) Fehlt in E; 15) यन्ते A; 16) बृहत्यो C; 17) So corr.; die hss. प्रतिष्ठति; 18) So corr.; die hss. प्रतितिष्ठति; 19) प्रजाया E; 20) य fehlt in A, B und C; 21) विभजात C; 22) °शीलको B; 23) न्यजना C; वान्यव्रजना E.

वा विमथ्नीरन्नेवमेवैषां[1] पशुर्विमथितो भवत्यस्वर्ग्यी' देव-भाज्ञो[2] ह वा इमं[3] श्रुतऋषिः पशोर्विभगं विदां चकार' तमु[4] गिरिज्ञाय बाभ्रव्यायान्यो मनुष्येभ्यः[5] प्रोवाच' ततो ऽयमवर्ञ्ञनुष्येस्वासीदिति[6] ब्राह्मणम्[7]' ॥ १८ ॥

अथातो दीक्षा' कस्य स्विद्धितोदीक्षित[8] इत्याचक्षते' श्रेष्ठां धियं क्षियतीति[9]' तं वा एतं धीक्षितं सन्तं[10] दीक्षित[11] इत्याचक्षते परोक्षेण' परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः' कस्य स्विद्धितोदीक्षितो ऽप्रत्युत्थायिको[12] भवत्यनभिवादुकः प्रत्युत्थेयो[13] ऽभिवाद्यो' ये प्रत्युत्थेया[14] अभिवाद्यास्त एनमाविष्टा[15] भवन्त्यथर्वाङ्गिरसस्तंस्य किमाथर्वणमिति' यदात्मन्येव[16] जुह्वति न परस्मिन्नेवं ह्याथर्वणानामदनसवानामात्मन्येव जुह्वति न परस्मिन्नथास्य[17] किमाङ्गिरसमिति' यदात्मनश्च[18] परेषां च नामानि[19] न गृह्णात्येवं ह तस्मिन्नासादात्मनश्चैव[20]

---

1) So corr.; die hss. पिमथ्नी°; 2) देवता यो C und E; 3) So corr.; die hss. इमां; 4) So corr.; die hss. तामु; 5) मनुष्येभ्यः E; 6) So corr.; die hss. इयम°; 7) ब्रह्मणम् C; 8) Von दीक्षित bis धीक्षितं fehlt in B; 9) क्षियन्तीति C; क्षयती E; 10) सतं B; 11) दीक्षितं E; 12) So corr.; alle hss. °युको; 13) प्रत्युच्छेयो B; 14) प्रत्युच्छेया B; प्रत्युच्छेयो E; 15) °विष्टा B und C; 16) °त्मनेव E; 17) यस्मिन्° B; 18) °त्मनश्चै B; 19) नाम्यति B; 20) आसाद्? ?.

परेषां[1] च नामानि न गृह्यन्ते[2]' विचक्षणावतीं[3] वाचं भाषन्ते चनसितवतीं' विचक्षयन्ति[4] ब्राह्मणं चनसयन्ति[5] प्राजापत्यं[6]' सैषा व्रतधुगथर्वाङ्गिरस्तां[7] क्यन्वायत्ताः[8]' कस्य स्विद्धेतोर्दीक्षितो ऽनाश्यन्नो[9] भवति नास्य नाम गृह्णत्यंन्नस्थो[10] नामस्थो[11] भवतीत्याङुस्तंस्य ये ऽन्नमदन्ति ते ऽस्य पाप्मानमदन्त्यंथास्य[12] ये नाम गृह्णन्ति[13] ते ऽस्य नाम्नः पाप्मानमपाध्नते' ऽथापि वेदानां गर्भभूतो भवतीत्याङुस्तंस्याज्ञातस्याविज्ञातस्याक्रीतसोमस्याभोजनीयं[14] भवतीत्याङुः' स दीक्षाणां प्रातर्जायते सोमं क्रीणन्ति तस्य ज्ञातस्य विज्ञातस्य क्रीतसोमस्य[15] भोजनीयं[16] भवतीत्याङुः' कस्य स्विद्धेतोः संसवाः परिजिह्वीर्षिता[17] भवन्ति[18]' यतरो वीर्यवत्तरो[19] भवति[20] स परस्य यज्ञं[21] परिमुष्णाति[22]' कस्य स्विद्धेतोर्दैवे न ध्यायेत्संस्थिते[23] नाधीयीतेति[24]' संसवस्यैव हेतोरिति' विद्योतमाने स्तनयत्यथो

---

1) परेषा B; 2) गृह्यन्तो A; 3) °वती E; 4) विचक्षयेति E; 5) न च सयन्ति B; 6) प्राजापतिं E; 7) Die hss. ता; 8) क्यचायताः B; °यन्ताः E; 9) नाशानो C; 10) गृह्णात्य° C und E; 11) नामस्यो E; 12) °थास्या A; 13) गृह्णाति E; 14) °सोमस्यभक्षनीयं E; 15) क्रीतसोम E; 16) भोक्षनी E; 17) °ह्वीर्षता C; 18) भवति C; 19) विर्यवत्तमो C; 20) भव B; भवती E; 21) यज्ञ E; 22) परिमुक्षाति B; 23) ध्याये संस्थिते C; धाये संस्थिते B; 24) नाधीयैतेति C; नाधीयीतैति B.

वर्षति वायव्यमभिषुण्वन्ति वै देवाः सोमं[1] च भक्षयन्ति ' तदभिषुण्वन्ति ब्राह्मणाः शुश्रुवांसो[2] ऽनूचानास्तेषां सर्वꣳसभक्षाः पितृपितामहा भवन्ति ' स दैवे न ध्यायेत्संस्थिते[3] नाधीयीतेति[4] ब्राह्मणम् ' ॥ ११ ॥

समावृत्ता[5] आचार्या निषेदुस्तान्ह यज्ञो दीक्षिष्यमाणान्ब्राह्मणान्दृष्वं[6] कृत्वोपोदियायेत्थं[7] चेद्धो ऽयसमवत्सुर्हृत[8] वो ऽहं मध्ये दिक्षा इति ' त ऊचुर्नैव[9] वा विद्म न ज्ञानीमः[10] ' को ह्वीदविज्ञायमानेन[11] सह दीक्षिष्यतीति[12] ' यन्विदं दीक्षिष्यध्वे भूयो न दीक्षिष्यध्वे ' ऽथ वा ऽ एकं दीक्षयिष्यथ[13] सं वै तर्हि मोक्षिष्यथ ' मोक्षिष्यति[14] वो यज्ञः ' सर्वे ते दीक्षयिष्यथेत्यथ[15] वा ऽ एकं[16] दीक्षयिष्यथ ते वा अहीनर्त्विजो गृहपतयो भविष्यथ[17] ' ते तूष्णीं[18] ध्यायन्त[19] आसां चक्रिरे ' स होवाच ' किं नु तूष्णीमाध्वे ' भूयो वः पृच्छामः ' पृच्छतेति[20] ' यन्विदं दीक्षिष्यध्व[21] उपमये[22] एतस्मिन्संवत्सरे मिथुनं

---

1) सोम E; 2) सुश्रु° A und E; श्रुश्रु° B; 3) ध्याये सं° B und C; 4) न धीयीतेति A pr. m.; नाधीयैतेति C; 5) समावृत्त C; 6) So corr.; die hss. दीक्षिष्यमाणानां ब्रा°; 7) °येच्छां B; 8) समवत्सु: ??; 9) ऊचुर्वैव A; 10) ज्ञनिमा B; 11) ह्वीदवि° B; 12) °ष्यसीति A und B; 13) दीयिष्य B; दीक्षयीष्यथ E; 14) °ष्यतो C; 15) दीक्षियिष्यतेत्यथ C; 16) एक B; 17) भविष्य B; 18) तष्णी B; 19) धायन्त B; 20) पृच्छ्येति E; 21) °ष्यध E; 22) ?? B. Ind. उपयेम.

चरिष्यथ नोपैष्यथेति' धिगिति होचुः' कथं नु दीक्षिता उपैष्यामो नोपैष्यामहा इति' ते वै ब्राह्मणानामभिमन्ता-रो[1] भविष्यथ[2]' रेतो ह वो य एतस्मिन्संवत्सरे ब्रा-ह्मणास्तदभविष्यंस्ते[3] बोधिमता भविष्यथेत्यथ[4] वा उपे-ष्यामो नोपैष्यामहा इति' ते वै दीक्षिता अवकीर्णिनो भविष्यथ' न ह वै देवयानः[5] पन्था प्राडुर्भविष्यतीति' तिरो वै[6] देवयानः पन्था भविष्यतीति' ते वयं भगवत्त-मेवोपधावाम यथा स्वस्ति संवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम्' ॥ २० ॥

स होवाच द्वादश ह वै वसूनि दीक्षिताडुत्क्रामन्ति[7]' न ह वै दीक्षितो ऽग्निहोत्रं जुहुयान्न पौर्णमासेन[8] यजेन यजेत' नामावास्येनाऽस्मिन्वसीत' न पितृयज्ञेन य-जेत[9]' न तत्र गच्छेद्यत्र मनसा निगमिषेन्नेष्या यजेत' न वाचा यथाकथाचिदभिभाषेत[10]' न मिथुनं चरेन्नान्नस्य[11] यथाकाममुपयुञ्जीत' न पशुबन्धेन यजेन यजेत' न तत्र गच्छेद्यत्र चक्षुषा परापश्येत्कृष्णाजिनं वसीत' कुरीरं धारयेन्मुष्टी[12] कुर्यादङ्गुष्ठप्रभृतयस्तिस्र उच्छ्रयेन्मृगशृङ्ग

---

1) °भिमन्दारा A und B; 2) भविष्यत E; 3) °भविष्यन्ति ते E; 4) भविष्यतेत्यथ E; 5) देवायानः C; 6) वो C; 7) दीक्षिता उत्क्रा° E; 8) पूर्णा° C; 9) यजेत A; 10) °विभाषेत C; 11) So corr.; die hss. °चरेन्नान्यस्य; 12) धारयन्मुष्टी E.

गृह्णीयात्तेन क्षेतांथ यस्य दीक्षितस्य वाग्वायता स्यान्मुष्टी वा विसृष्टौ[1] स एतानि जपेत्' ॥ २१ ॥

अग्निहोत्रं च मा पौर्णमासश्च यज्ञः पुरस्तात्प्रत्यञ्चमुभौ कामप्रौ भूत्वाग्नित्या सह्राविशतां[2]' वसतिश्च मामावास्यश्च यज्ञः पश्चात्प्राञ्चमुभाविति[3] समानं' मनश्च मा पितृयज्ञश्च यज्ञो दक्षिणत उदञ्चमुभाविति समानं' वाक्च मेष्टिश्चोत्तरतो दक्षिणाञ्चमुभाविति समानं' रेतश्च मात्रं चेत ऊर्ध्वमुभाविति समानं' चक्षुश्च मा पशुबन्धश्च यज्ञो[4] ऽमुतो ऽर्वाञ्चमुभौ कामप्रौ भूत्वाग्नित्या[5] सह्राविशतामिति[6] खलु ह वै दीक्षितो य आत्मनि वसूनि धत्ते न चैवास्य का चनार्तिर्भवति न च यज्ञविष्कन्धमुपयात्यपह्नुते[7] पुनर्मृत्युमपाजत्येति[8] पुनराज्ञातिं[9]' कामचारो ऽस्य सर्वेषु लोकेषु भाति य एवं वेद यश्चैवंविद्वान्दीक्षामुपैतीति ब्राह्मणम्' ॥ २२ ॥

अथ यस्य[10] दीक्षितस्यर्तुमती ज्ञाया स्यात्प्रतिस्रावा[11] प्रतिस्रावा[12] सरूपवत्साया[13] गोः[14] पयसि स्थालीपाकं

---

1) वसृष्टौ A pr. m. und E; 2) माहाविशता B; 3) In A findet man das ganze yajus; 4) यज्ञो C; 5) °क्षित्य E; 6) ? fehlt etwas; 7) यज्ञविस्कन्ध° B; 8) So alle hss. °मत्येति wäre besser; 9) °ज्ञाकिं B; °ज्ञात्यं C; 10) ऽमुस्य B; 11) ? ? B स्यात्प्रस्यात्प्रतिस्रावा; 12) ? ?; 13) सारूप° A sec. m. und E; 14) गौः B.

अपयित्वाभिघार्योद्धास्योद्धृत्याभिहिंकृत्य गर्भवेदनपुंसवनैः संपातवन्तं[1] कृत्वा तं परैव प्राश्नीयाद्वितो वा अन्नं[2]। वृषा हिंकार्। एवं क्षीश्वरा या[3] दीक्षिताय[4] दीक्षिता[5] जाया पुत्रं लभेतेत्येतेनैव[6] प्रक्रमेण[7] यजेतेति ब्राह्मणम्। ॥ २३ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे तृतीयः प्रपाठकः ॥

ओमयं[4] वै यज्ञो यो ऽयं पवते। तमेत ईप्सन्ति ये संवत्सराय दीक्षन्ते[8]। तेषां गृहपतिः प्रथमो दीक्षते। ऽयं वै लोको गृहपतिरस्मिन्वा इदं सर्वं लोके प्रतिष्ठितं। गृहपता उ एव सर्वे[4] सत्त्विणः प्रतिष्ठिताः। प्रतिष्ठाया[9] एवैनं[9] तत्प्रतिष्ठित्यै[9] दीक्षन्ते[10]। ॥ १ ॥

अथ ब्रह्माणं[11] दीक्षयति। चन्द्रमा वै ब्रह्माधिदैवं मनो ऽध्यात्मं। मनसैव तदोषधीः[12] संदधाति। तच्चा[13] ओषधीर्विद स एव ब्रह्मौषधीस्तंदनेन लोकेन[4] संदधाति। तस्मादितावत्तरेणान्यो न दीक्षित[14]। स यदितावत्तरेणान्यो

---

1) °तवन्त E; 2) अन्न C; 3) So corr.; die hss. य; 4) Fehlt in E; 5) So corr. die hss. °ती; 6) °त्येत्येनैव E; 7) प्रक्रम्येण E; 8) दीक्षन्तो E; 9) ? ? 10) दीक्ष्यन्ते E; 11) ब्राह्मणं C; 12) तदौषधीः C; 13) तच E; 14) दीक्षत B.

दीक्षेतेमं तं लोकमोषधिभिर्व्यापादयेदुच्छोषुका[1] क[2] स्युस्तस्मादितावत्तरेणान्यो न दीक्षित' ॥ २ ॥

अथोद्गातारं दीक्षयत्यादित्यो[3] वा उद्गाताधिदैवं चक्षुरध्यात्मं' पर्जन्य[4] आदित्यः[4] 'पर्जन्यादधि वृष्टिर्जायते' वृष्टिरेव[5] तदोषधीः[5] संदधाति[5] 'तस्मादितावत्तरेणान्यो न दीक्षित' स यदेतावत्तरेणान्यो दीक्षेतेमं तं लोकं वर्षेण व्यापादयेदवर्षुका[6] क स्युस्तस्मादितावत्तरेणान्यो[7] न दीक्षित' ॥ ३ ॥

अथ होतारं दीक्षयत्यग्निर्वै होताधिदैवं वागध्यात्ममन्नं वृष्टिर्वाचं[8] चैव तदग्निं चान्नेन संदधाति' तस्मादेतावत्तरेणान्यो न दीक्षित' स[9] यदेतावत्तरेणान्यो दीक्षेतेमं तं लोकमन्नेन व्यापादयेदशनायुका क स्युस्तस्मादेतावत्तरेणान्यो न दीक्षित' ॥ ४ ॥

अथाध्वर्यु[10] प्रतिप्रस्थाता दीक्षयति 'वायुर्वा अध्वर्युरधिदैवं प्राणो ऽध्यात्ममन्नं वृष्टिर्वायुं[11] चैव[12] तत्प्राणं चान्नेन संदधाति' तस्मादेतवत्तरेणान्यो न दीक्षित' स

---

1) °र्व्यादयेदुच्छो° B; 2) E fügt वा ein; 3) °दीत्यो E; 4) Corrupt; 5) Corrupt; man erwartet वृष्टिं तदोषधिभ्यः संदधाति; 6) °वर्षका B; 7) स्युस्तस्मादेत्ताव° B; 8) °र्वाच E; 9) Von स bis I 4. 5 fehlt in E; 10) °ध्वर्यु E; 11) °र्वायु C und E; 12) चैवं C.

यदेतावत्तरेणान्यो दीक्षेतेमं तं लोकं प्राणेन व्यापादयेत्प्रमायुका[1] ह स्युस्तस्मादेतावत्तरेणान्यो[2] न दीक्षित ' ॥ ५ ॥

अथ ब्रह्मणे ब्राह्मणाच्छंसिनं दीक्षयत्यथोद्गात्रे प्रस्तोतारं दीक्षयत्यथ[3] होत्रे मैत्रावरुणं दीक्षयत्यथाध्वर्यवे प्रतिप्रस्थातारं[4] नेष्टा दीक्षयति ' स हैनमन्वेतेषां[5] वै नवानां कृप्तिमन्वितरे[6] कल्पन्ते ' नव वै प्राणाः ' प्राणैर्यज्ञस्तायते[7] ' अथ ब्रह्मणे पोतारं दीक्षयत्यथोद्गात्रे[8] प्रतिहर्तारं दीक्षयत्यथ होत्रे अच्छावाकं दीक्षयत्यथाध्वर्यवे नेष्टारमुन्नेता दीक्षयति ' स हैनमन्वथ ब्रह्मण आग्नीध्रं दीक्षयत्यथोद्गात्रे सुब्रह्मण्यं दीक्षयत्यथ होत्रे ग्रावस्तुतं दीक्षयत्यथ[9] तमन्यः स्नातको वा ब्रह्मचारी वा दीक्षयति ' न पूतः[10] पावयेदित्याहुः ' सैषानुपूर्वी[11] दीक्षा[12] ' तथ एवं दीक्षन्ते दीक्षिष्यमाणा[13] एव[14] ते[14] सत्त्रिणां प्रायश्चित्तं न विन्दन्ते[15] ' सत्त्रिणां प्रायश्चित्तमनु तस्यार्धस्य

---

1) व्यापद्° A und C; 2) स्युस्तस्मादेक्षाव° B; 3) °त्यथा A pr. m.; °त्यथो C; 4) So corr.; die hss. प्रतिस्थातारं; E प्रतिस्थातरं; 5) So corr.; die hss. °न्वितरेषां; 6) So corr. die hss. कृप्तिरन्यतरे; 7) °स्तायात B; 8) °थोद्गायत्रे B; 9) °त्यथा C; 10) पुनः A; पुतः C; 11) सेषानुपूर्वी B; °पूर्व्यं C; 12) दीक्षते C; 13) दक्षिष्य° A pr. m.; 14) एवमेते C; 15) विंदंते A; विदंते C.

योगक्षेमः कल्पते यस्मिन्नर्धे दीक्षन्त इति ब्राह्मणम् ' ॥ ६ ॥

श्रद्धाया वै देवा दीक्षणीयां[1] निरमिमतादितेः प्रायणीयां[2] ' सोमात्क्रयं[3] ' विष्णोरातिथ्यमादित्यात्प्रवर्ग्यं[4] ' स्वधाया उपसदो ' ऽग्नीषोमाभ्यामौपवसथ्यमक्षः[5] ' प्रातर्यावद्भ्यो देवेभ्यः प्रातरनुवाकं ' वसुभ्यः प्रातःसवनं ' रुद्रेभ्यो माध्यंदिनं सवनमादित्येभ्यस्तृतीयसवनं ' वरुणाद्वभृथमदितिरुदयनीयां[6] ' मित्रावरुणाभ्यामनूबन्ध्यां[7] ' त्वष्टुस्त्वाष्ट्रं ' देवीभ्यो देविकाभ्यो[8] देवताह्वीषि[9] ' कामाद्दशातिरात्रं[10] ' स्वर्गाल्लोकाडुद्वसानीयां ' तद्धा एतदग्निष्टोमस्य जन्म ' स य एवमेतदग्निष्टोमस्य जन्म वेदाग्निष्टोमेन[11] सात्मा[12] सलोको[13] भूत्वा देवानप्येतीति[14] ब्राह्मणम् ' ॥ ७ ॥

अथ यद्दीक्षणीययया[15] यजन्ते श्रद्धामेव तद्देवीं[16] देवतां यजन्ते ' श्रद्धा देवी[17] देवता[18] भवन्ति[19] ' श्रद्धाया

---

1) देक्षिणीया E; दीक्षीयां B; 2) आयणीयां C; 3) सोमात्क्रम्यं B; 4) °त्प्रवर्म्य B; 5) °थ्यम: E; 6) °नीयं E; 7) °ब्धां B; °ब्धं C; 8) देकाभ्यो B; देववाकाभ्यो E; 9) Man erwartet देविकाह्वीषि; 10) Wahrscheinlich कामादतिरात्रं; 11) देवाग्नि° E; 12) Die hss. स आत्मा; 13) सलोका E; 14) देवानपीतीति E; 15) यस्य दीक्षिणी° B; 16) तद्देवो A und B; तद्देवो E; 17) Fehlt in B; देव E; 18) देवताय B; 19) भवति A, C und E.

देव्याः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ[1] यत्प्रा-
यणीयया[2] यजन्ते ऽदितिमेव तद्देवीं देवतां यजन्ते ' ऽदि-
तिर्देवी देवता भवत्यंदित्या[3] देव्याः[4] सायुज्यं[5] सलो-
कतां यन्ति य एतदुपयन्त्यंथ[6] यत्क्रयमुपयन्ति सोममेव
तद्देवं[4] देवतां यजन्ते ' सोमो देवो दवता भवन्ति ' सोमस्य
देवस्य[4] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ[7]
यदातिथ्यया यजन्ते विष्णुमेव तद्देवं[8] देवतां[8] यजन्ते '
विष्णुर्देवो देवता भवन्ति[9] ' विष्णोर्देवस्य सायुज्यं सलो-
कतां यन्ति[10] य[11] एतदुपयन्त्यंथ[11] यत्प्रवर्ग्यमुपयन्त्या-
दित्यमेव तद्देवं[12] दवतां यजन्त ' आदित्यो देवो देवता
भवत्यंादित्यस्य[13] देवस्य सायुज्यं सलोकतां यन्ति य
एतदुपयन्त्यंथ[14] यदुपसदमुपयन्ति[15] स्वधामेव तद्देवीं[16]
देवतां यजन्ते ' स्वधा देवी देवता भवन्ति[17] ' स्वधाया
देव्याः सायुज्यं[18] सलोकतां यन्ति य एतदुपयन्त्यंथ[19]
यदौपवसथ्यमक्रुपयन्त्यग्नीषोमावेव तद्देवौ देवते यजन्ते[20] '

---

1) एतदुभय° B; 2) यत्प्राणीया B; 3) भवत्यदित्य A, C und E;
4) Fehlt in B; 5) सायुज्य B; 6) एत उपय° B; 7) एतदुभ° B;
8) तदेवगं B; 9) भवति A, C und E; 10) मन्ति B; 11) यदात
उप° B; 12) देवं fehlt in B; 13) Alle hss. haben भवत्यादि°;
14) एतदुभ° B; 15) य उपस° B; 16) तद्देवी B; 17) भवति B;
18) सायुज्य B; 19) एतमुप° B; 20) यजतो A, C und E; यजन्तो B.

ऽग्नीषोमौ देवौ देवते भवन्ति ' ऽग्नीषोमयोर्दैवतयोः[1] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यत्प्रातरनुवाकमुपयन्ति प्रातर्याव्णा एव तद्देवान्देवता[2] यजन्ते ' प्रातर्यावाणो देवा देवता भवन्ति[3] ' प्रातर्याव्णां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यत्प्रातःसवनमुपयन्ति वसूनेव तद्देवान्देवता[4] यजन्ते ' वसवो देवा देवता भवन्ति ' वसूनां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यन्माध्यंदिनं सवनमुपयन्ति रुद्रानेव तद्देवान्देवता यजन्ते ' रुद्रा देवा देवता भवन्ति ' रुद्राणां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यत्तृतीयसवनमुपयन्त्यादित्यानेव तद्देवान्देवता[5] यजन्त ' आदित्या देवा[6] देवता भवन्त्यांदित्यानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यदवभृथमुपयन्ति[7] वरुणमेव तद्देवं देवतां[8] यजन्ते ' वरुणो देवो देवता भवन्ति[9] ' वरुणस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यदुदयनीयया यजन्ते ऽदितिमेव तद्देवीं देवतां यजन्ते ' ऽदितिर्देवी देवता भवन्त्यांदित्या[10] देव्याः

---

1) °र्दैवयोः B und C; 2) °न्देवतां C und E; 3) भवति C und E; 4) °न्देवतां A pr. m., B und C; 5) °न्देवतां A und B; 6) Fehlt in E; 7) Von उप° bis यदुदयनीयया fehlt in B; 8) देवता E; 9) भवति A, B und C; 10) °दित्य E.

सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यदनूबन्ध्यया[1] यजन्ते मित्रावरुणावेव तद्देवौ देवते यजन्ते[2] 'मित्रावरुणौ देवौ देवते भवन्ति[3] 'मित्रावरुणयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यत्त्वाष्ट्रेण[5] पशुना यजन्ते त्वष्टारमेव[6] तद्देवं देवतां यजन्ते 'त्वष्टा देवो देवता भवन्ति 'त्वष्टुर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यद्देविकाहविर्भिश्चरन्ति या एता उपसत्सु[7] भवन्त्यग्निः[8] सोमो विष्णुरिति देव्यो देविका देवता भवन्ति[9] 'देवीनां देविकानां[10] देवतानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यद्दशातिरात्रमुपयन्ति[11] काममेव तद्देवं देवतां यजन्ते 'कामो देवो देवता भवन्ति 'कामस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यदुदवसानीयया यजन्ते स्वर्गमेव[12] तल्लोकं देवं देवतां यजन्ते 'स्वर्गो लोको देवो देवता भवन्ति 'स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति 'तद्वा एतदग्निष्टोमस्य जन्म 'स य एवमेतदग्निष्टोमस्य[13] जन्म वेदात्मैव[14]

---

1) °बन्ध्याय B und C; 2) So corr.; alle hss. यजतो; 3) So corr.; alle hss. भवतो:; 4) °पयात्यथ B und E; 5) यत्त्वष्ट्रेण A; 6) त्वाष्टारमेव B; 7) So corr.; die hss. उपसत्सु:; 8) भवत्यग्नि: A pr. man. und C; 9) भवति B; 10) देवोकानां E; 11) ? wschl. यदतिरात्रमुपयन्ति vgl. I 4. 7; 12) स्वर्गमेवं B; 13) एवमेव तदग्नि° E; 14) वेदो ह्यैव E; वेदाधैव C.

तद्ग्निष्टोमं स्वर्गे[1] लोके[1] प्रतितिष्ठति[2] । प्रतितिष्ठति[3] प्रजया पशुभिर्य एवं वेदाग्निष्टोमेन सात्मा[4] सलोको भूत्वा देवानप्येतीति ब्राह्मणम् । ॥ ८ ॥

अहोरात्राभ्यां वै देवाः प्रायणीयमतिरात्रं[5] निरमिमतार्धमासेभ्यश्चतुर्विंशमहर्ब्रह्मणो[6] ऽभिप्लवं । क्षत्रात्पृष्ठ्यमंग्नेरभिजितमंह्नः[7] स्वरसाम्नः[8] । सूर्याद्विषुवन्तमुक्था आवृत्ताः स्वरसामान । इन्द्राद्विश्वजितमुक्थौ पृष्ठ्याभिप्लवौ । मित्रावरुणाभ्यां गवायुषी । विश्वेभ्यो देवेभ्यो दशरात्रं[9] । दिग्भ्यो दाशरात्रिकं[10] पृष्ठं[11] षडहेभ्यो लोकेभ्यश्छन्दोमं[12] त्र्यहं[13] । संवत्सराद्दशममहः । प्रजापतेर्महाव्रतं । स्वर्गाल्लोकादुदयनीयमतिरात्रं[14] । तद्वा एतत्संवत्सरस्य जन्म । स य एवमेतत्संवत्सरस्य[15] जन्म वेद संवत्सरेण[16] सात्मा[17] सलोको भूत्वा देवानप्येतीति[18] ब्राह्मणम् । ॥ ९ ॥

अथ यत्प्रायणीयमतिरात्रमुपयन्त्यहोरात्राविव तद्दर्वौ

---

1) स्वलोक B; स्वर्ग लोके E; 2) So corr.; die hss. प्रतिष्ठति; 3) प्रतिष्ठति B; fehlt in C; 4) स आत्मा A, B und E; 5) °रात्र E; 6) C निरमिमताधमा°, E °ऋतुर्विंशतिमहर्ब्रह्मणो; 7) क्षत्रात्पृष्ठ्याम° E; 8) So corr.; die hss. स्वरसामान:; 9) दशरात्र E; 10) दशरात्रकं E; 11) पृष्ठय: B; 12) °श्छन्दाम A, B und E; 13) त्रहं E; 14) स्वर्गोल्लोकदु° C; 15) एवमेवतात्स° C; 16) °त्सरेणा A; 17) स आत्मा A sec. m.; स अत्मा B; 18) देवमप्येतीति B.

देवते यजन्ते[1] । अहोरात्रौ देवौ देवते भवन्ति[2] । अहोरात्रयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यश्चतुर्विंशमहरुपयन्त्यर्धमासानेव[3] तद्देवान्देवता[4] यजन्ते । अर्धमासा देवा देवता भवन्त्यर्धमासानां देवानां[5] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदभिप्लवमुपयन्ति ब्रह्माणमेव[6] तद्देवं देवतां यजन्ते । ब्रह्मा देवो देवता भवति[7] । ब्रह्मणो देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्पृष्ठ्यमुपयन्ति क्षत्रमेव तद्देवं देवतां यजन्ते । क्षत्रं देवो[8] देवता भवति[9] । क्षत्रस्य[10] देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदभिजितमुपयन्त्यग्निमेव[11] तद्देवं देवतां यजन्ते । अग्निर्देवो देवता भवन्त्यग्नेर्देवस्य[12] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्स्वरसाम्न[13] उपयन्त्येव तद्देवीर्देवता[14] यजन्त आपो देव्यो देवता भवन्त्यपां देवीनां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्विषुवन्तमुपयन्ति सूर्यमेव तद्देवं देवतां

---

1) Alle hss. यजतो; 2) Alle hss. भवतो; 3) °हन्नूपय° C und E; 4) °न्देवतां A pr. m.; B und C; 5) देवतानां E; 6) ब्राह्म व C; 7) भवति A, C und E; 8) Fehlt in B; 9) So corr.; alle hss. भवति; 10) क्षत्र E; 11) Von यद्भि° bis यत्स्वर° fehlt in E; 12) So corr.; alle hss. भवत्य°; 13) °रसान्म E; 14) °र्देवतो A; तद्देवि देवतां C; °र्देवतां E.

यजन्ते ' सूर्यो देवो देवता भवन्ति[1] ' सूर्यस्य देवस्य सायुज्यं सलोकतां यन्ति[2] य एतदुपयन्त्युंक्ता आवृत्ताः स्वरसामानो ' ऽथ यद्विश्वजितमुपयन्तीन्द्रमेव[3] तद्देवं देवतां यजन्त ' इन्द्रो देवो देवता भवतीन्द्रस्य[4] देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्युंक्तौ पृष्ठ्याभिप्लवावथ यद्गवायुषी उपयन्ति मित्रावरुणाविव तद्देवौ देवते यजन्ते[5] ' मित्रावरुणौ देवौ[6] देवते[7] भवन्ति[8] ' मित्रावरुणयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्दशरात्रमुपयन्ति विश्वानिव तद्देवान्देवता[9] यजन्ते ' विश्वे देवा देवता[10] भवन्ति ' विश्वेषां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्दाशरात्रिकं पृष्ठं[11] षडङ्कमुपयन्ति दिश एव तद्देवीर्देवता[12] यजन्ते ' दिशो देव्यो[13] देवता भवन्ति ' दिशां देवीनां सायुज्यं सलोकतां यन्ति[14] य एतदुपयन्त्यथ यच्छन्दोमं त्र्यङ्कमुपयन्तीमानेव तल्लोकान्देवान्देवता[15] यजन्त ' इमे लोका देवा देवता भवन्त्येषां लोकानां देवानां[16] सायुज्यं सलोकतां यन्ति य एतदु-

---

1) Alle hss. भवति; 2) यति A; 3) °यतीन्द्रमेव B; 4) भवतो° A, B und C; 5) So corr.; die hss. यजतो; 6) Fehlt in A; 7) देते A; 8) Die hss. भवतो; 9) Die hss. °न्देवतां; 10) देवतां B; 11) पृष्ठ्यः B; 12) तद्देवीं देवतां B; °न्देवतां C; 13) Fehlt in E; 14) यति A; 15) °वतां C und E; 16) Fehlt in B.

पयन्त्यंथ[1] यद्दशममहरुपयन्ति[2] संवत्सरमेव तद्देवं देवतां[3] यजन्ते ' संवत्सरो देवो दवता भवन्ति[4] ' संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यन्महाव्रतमुपयन्ति[5] प्रजापतिमेव[5] तद्देवं[5] देवतां[6] यजन्ते ' प्रजापतिर्देवो दवता भवन्ति[7] ' प्रजापतेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ यदुदयनीयमतिरात्रमुपयन्ति स्वर्गमिव[8] तल्लोकं देवं देवतां यजन्ते ' स्वर्गो लोको[9] देवो देवता भवन्ति[10] ' स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति ' तद्धा एतत्संवत्सरस्य जन्म ' स य[11] एवमेतत्संवत्सरस्य जन्म वेदात्त्वैव[12] तत्संवत्सरं[13] स्वर्गे लोके प्रतितिष्ठति[14] ' प्रतितिष्ठति[15] प्रजया पशुभिर्य एवं[16] वेद ' संवत्सरेण सात्मा[17] सलोको भूत्वा देवानप्येतीति ब्राह्मणम् ' ॥ १० ॥

स वा एष संवस्तरो ऽधिदैवं[18] चाध्यात्मं च प्रतिष्ठितः ' स य एवमेतत्संवत्सरमधिदैवं[19] चाध्यात्मं च

---

1) एतदुपवत्यथ C; 2) °महद्रूपयन्ति C und E; 3) देवतं E; 4) Die hss. भवति; 5) Fehlt in E; 6) Fehlt in E; B hat देवानां; 7) Die hss. भवति; 8) स्वर्गमिवं B; 9) लोके E; 10) Die hss. भवति; 11) Fehlt in C; 12) वेदाश्चैव E; 13) °त्सर् E; 14) So corr.; die hss. प्रतिष्ठति; 15) तिष्ठति B; 16) एव E; 17) स आत्मा A und B; 18) °दैव E; 19) एवमेतं सं° C und E.

प्रतिष्ठितं वेद प्रतितिष्ठति[1] । प्रतितिष्ठति[2] प्रजया पशुभिर्य एवं वेद[3] ॥ ११ ॥

स वा एष संवत्सरो बृहतीमभिसंपन्नो । द्वावक्षरावक्षां[4] षडक्षौ[5] द्वौ पृष्ठ्याभिप्लवौ[6] । गवायुषी दशरात्रस्तया खलु षट्त्रिंशत्संपद्यन्ते[7] । षट्त्रिंशदक्षरा[8] गौः[8] । षट्त्रिंशदक्षरा बृहती । बार्हतो वै स्वर्गो लोको । बृहत्या वै देवाः स्वर्गे लोके यजन्ते । बृहत्या स्वर्गे लोके प्रतितिष्ठति[1] । प्रतितिष्ठति[2] प्रजया पशुभिर्य एवं वेद ॥ १२ ॥

स वा एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशे[9] महाव्रतं विषुवति महाव्रतं महाव्रत एव महाव्रतं । तं ह स्मैतमेवं विद्वांसः पूर्वे त्रिमहाव्रतमुपयन्ति[10] । ते तेजस्विन आसंत्सत्यवादिनः संशितव्रता[11] । य एनमध्व तथोपेयुर्यथामपात्रमुदक आसिक्ते[12] निर्मृत्येदेवं[13] यजमाना निर्मृत्येरनुपर्युपयन्ति[13] । तथा ह्यस्य सत्येन तपसा व्रतेन चाभिजितमवरुद्धं[14] भवति य एवं वेद ॥ १३ ॥

---

1) So corr.; die hss. प्रतिष्ठति; 2) Fehlt in B; 3) Die hss. स वा एष संवत्सर in dieser und in sieben folgenden kaṇḍikā's; 4) द्वादशाक्षरा° C und E; 5) षडहो B; षडहो C; 6) पृष्ठ्यभि° A pr. m.; 7) °पद्यते E; 8) Fehlt in E; 9) So corr.; alle hss. °विंशेन; 10) °यन्ते E; von °पद्यन्ति bis पात्रम् fehlt in B; 11) शंसितव्रता A und C; 12) आसिके A; आशिसिक्ते C; 13) So corr.; die hss. निर्मृत्ये°; 14) याभिति° C.

अथ यच्चतुर्विंशमक्रुपेत्यानुपेत्य विषुवन्तं महाव्रत-
मुपेयात्कथमनागूर्त्यै[1] भवतीति ' यमेवामुं पुरस्ताद्विषुवतो
ऽतिरात्रमुपयन्ति तेनेति ब्रूयाद्ंभिप्लवात्पृष्ठ्यो निर्मितः '
पृष्ठ्याद्भिजिद्ंभिजितः स्वरसामानः ' स्वरसामभ्यो विषुवा-
न्विंषुवतः[2] स्वरसामानः ' स्वरसामभ्यो विश्वजिद्ंविश्वजितः
पृष्ठ्याभिप्लवौ ' पृष्ठ्याभिप्लवाभ्यां गवायुषी ' गवायुभ्यां [3]
दशरात्रः [4] ' दशरात्रान्महाव्रतं [5] ' महाव्रताद्उदयनीयो [6]
ऽतिरात्र [7] ' उदयनीयो [7] ऽतिरात्रः स्वर्गाय लोकायान्नाद्याय
प्रतिष्ठित्यै ' ॥ १४ ॥

अथ यच्चतुर्विंशमक्रुपेत्यानुपेत्य [8] विषुवन्तं महाव्रत-
मुपेयात्कथमनागूर्त्यै [9] भवतीति ' यमेवामुं [10] पुरस्ताद्विषु-
वतो ऽतिरात्रमुपयन्ति [11] तेनेति ब्रूयाद्ंभिप्लवात्पृष्ठ्यो नि-
र्मितः ' पृष्ठ्याद्भिजिद्ंभिजितः [12] स्वरसामानः ' स्वरसामभ्यो
विषवान्विंषुवतः [13] स्वरसामानः ' स्वरसामभ्यो विश्वजि-
द्विश्वजितः पृष्ठ्याभिप्लवौ [14] ' पृष्ठ्याभिप्लवाभ्यां गवायुषी '

---

1) So corr.; die hss. °नाकूत्यै; 2) Von विषुवान्वि° bis पृष्ठ्या° fehlt in B; 3) गवायुभ्यां B; 4) Fehlt in B; 5) So corr.; die hss. दशरात्राय महाव्रतं; E °व्रत; 6) °दयनीयाया A und B; 7) ऽतिरात्रायो-दनीयो A und B; 8) °त्यनुपेत्य B; 9) So corr.; die hss. °नाकूत्यै; 10) यमेवामु C; 11) ऽतित्रिरात्र° A; त्रिरात्र° E; 12) अभिजित् fehlt in B und E; 13) °षवन्तः E; 14) °भिप्लौ E.

गवायुभ्यां दशरात्रो[1] 'ऽथ ह देवेभ्यो महाव्रतं न[2] तस्ये कथमूर्ध्वै[3] स्तोमैर्विषुवत्तमुपागातावृत्तिर्मामिति[4] 'ते देवा इक्षसामिवासुरूप[5] तं यज्ञक्रतुं[6] ज्ञानीमो[7] य ऊर्ध्वस्तोमो[8] येनैतदक्षरवाप्नुयामिति' तत[9] एतं द्वादशरात्रमूर्ध्वस्तोमं ददृशुस्तमाहरंस्तेनायजन्त' तत एभ्यो ऽतिष्ठंस्तिष्ठति[10] ह्यस्मै महाव्रतं' प्रतितिष्ठति[11]' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद' ॥ १५ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात्कथमनागूर्त्यै[12] भवतीति' यमेवामुं पुरस्ताद्विषुवतो ऽतिरात्रमुपयन्ति तेनेति ब्रूयात्तंदाङ्कः कति संवत्सरस्य पराञ्चयहानि भवन्ति कत्यर्वाञ्चि' तद्यानि सकृत्सकृदुपयन्ति तानि पराञ्चंय यानि पुनः पुनरुपयन्ति तान्यर्वाञ्चीत्येवैनान्युपासीरन्षंडक्षयोर्ध्वावृत्तिमन्वावर्तन्ते[13]' ॥ १६ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं[14] महाव्रतमुपेयात्कथमनागूर्त्यै[15] भवतीति' यमेवामुं पुरस्ता-

---

1) दशरात्रौ C; 2) नु A; 3) °मुर्ध्वै E; 4) So corr.; die hss. °पागातां वृत्तै°; 5) ?; es kommt nog einige Malen in diesem Texte vor; 6) यज्ञक्रतं C und E; 7) ज्ञानीयो E; 8) °स्तोमो A, B und E; 9) तव C; 10) ऽतिष्ठांस्तिष्ठति B; 11) So corr.; die hss. प्रतिष्ठति; 12) So corr.; die hss. °नाकूत्यै; 13) °त्येवैनां न्युपसी° A, B, C; 14) विषुवन्त E; 15) So corr.; die hss. °नाकूत्यै.

द्विषुवतो ऽतिरात्रमुपयन्ति[1] तेनेति ब्रूयादभिप्लवं पुरस्ता-
द्विषुवतः पूर्वमुपयन्ति ' पृष्ठ्यमुपरिष्टात्पिता वा अभिप्लवः
पुत्रः पृष्ठ्यस्तस्मात्पूर्वे वयसि पुत्राः पितरमुपजीवन्ति '
पृष्ठं[2] पश्चाद्विषुवतः पूर्वमुपयन्त्यभिप्लवमुपरिष्टात्पिता वा
अभिप्लवः ' पुत्रः पृष्ठ्यस्तस्मादुत्तमे वयसि पुत्रान्वितोपजी-
वति[3] य एवं वेद ' तदप्येतदृचोक्तं शतमिन्नु शरदो अन्ति
देवा यत्रा नश्चक्रा जरसं तनूनाम्[4]। पुत्रासो यत्र पितरो
भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरित्युप ह्व वा
एनं पूर्वे वयसि पुत्राः पितरमुपजीवन्त्युपोत्तमे वयसि
पुत्रान्वितोपजीवति[5] य एवं वेद ' ॥ १७ ॥

अथ ह्वैष महासुपर्णस्तस्य यान्पुरस्ताद्विषुवतः षण्मा-
सानुपयन्ति स दक्षिणः[6] पक्षो[7] ' ऽथ यानावृत्तानुपरि-
ष्टात्षडुपयन्ति स उत्तरः पक्ष[8] ' आत्मा वै संवत्सरस्य
विषुवानङ्गानि[9] पक्षौ ' यत्र वा आत्मा तत्पक्षौ ' यत्र वै
पक्षौ तदात्मा ' न वा आत्मा पक्षावतिरिच्यते[10] ' नो
पक्षावात्मानमतिरिच्येते[11] इत्येवमु ह्वैव तदपरेषां स्वि-

---

1) त्रिरात्र° A; 2) पृष्टं C; 3) °जीवन्ति A und B; 4) जनूनाम् E;
5) °जीवन्ति A, B und E; 6) दक्षिणात: E; 7) पक्ष्यो B; 8) Fehlt
in B; 9) विषुवानाङ्गानि B und C; 10) So corr.; die hss. °च्येते;
11) So corr.; die hss. °रिच्यन्त .

दितमङ्कां[1] परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्'
॥ १८ ॥

तदाऽऊर्यद्बादश मासाः संवत्सरो ऽथ[2] क्वैतदहरवा-
प्नुयामेति[2]' यद्वैषुवतमपरेषां स्विदितमङ्कां परेषामित्यप-
रेषां चैव परेषां चेति ब्रूयादात्मा वै संवत्सरस्य विषु-
वानङ्गानि मासा[3]' यत्र वा आत्मा तदङ्गानि' यत्राङ्गानि
तदात्मा' न वा[4] आत्माङ्गान्यतिरिच्यते[4] नो ऽङ्गान्या-
त्मानमतिरिच्यन्त इत्येवमु क्वैव तदपरेषां स्विदितमङ्कां[5]
परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष सं-
वत्सरः' ॥ १९ ॥

तदाऽऊः कथमुभयतोऽज्योतिषो ऽभिप्लवा अन्यतरतोऽज्यो-
तिः[6] पृष्ठ इत्युभयतोऽज्योतिषो वा इमे लोका[7] अग्निनेत
आदित्येनामुत इत्येष क्व वा एतेषां ज्योतिर्य एनं[8]
प्रमृदीव[9] तपति' देवचक्रे क्व वा एते पृष्ठप्रतिष्ठिते[10]
पाप्मानं तृंक्ती[11] परिप्लवेते[12]' तद्य एवं विदुषां दी-
क्षितानां पापकं कीर्तयतेते[13] एवास्य तद्देवचक्रे शिर-

---

1) Corrupt!; 2) ऽथैतदह° A und E; 3) So corr.; die hss. मासौ; 4) वात्मा° E; °रिच्येते B und E; 5) स्विदितिमङ्गां B; 6) अन्यतरोज्योतिः B, C und E; 7) लोको E; 8) ?; 9) ?? B प्रमृदिव; 10) पृष्ठ्यं प्रति° B; पृष्टः प्रति° C; 11) दूंहती B und C; 12) परिप्लवते A; 13) So corr.; A, B und C °येदेत; E °येदेव.

प्रिछन्दतो[1] ' दशरात्रमुद्धिः[2] ' पृष्ठ्याभिप्लवौ चक्रे ' दशरात्र-मुद्धिं[3] पृष्ठ्याभिप्लवौ चक्रे तत्कं कुर्वीतेति ह स्माह[4] वास्युस्तयो[5] स्तोत्राणि च शस्त्राणि च संचारयेथ्यः[6] संचारयेत्तस्मादिमे पुरुषे प्राणा[7] नाना सन्त एकोदया-च्छरीरमधिवसति यन्न संचारयेत्प्रमायुको ह यजमानः स्यादेष ह वै प्रमायुको यो ऽन्धो वा बधिरो वा ' नवाग्निष्टोमा मासि संपद्यन्ते ' नव वै प्राणाः[8] ' प्राणैर्य-ज्ञस्तायत ' एकविंशतिरुक्थ्या ' एक[9] उक्थ्यः[9] षोडश्यन्नं वा उक्थ्यो[10] ' वीर्यं षोडश्येव[11] ' तथा[12] वृत्वा स्वर्गं लोकमध्यारोक्ष्यन्ति[13] ' ॥ २० ॥

अथातो ऽङ्गामध्यारोहः ' प्रायणीयेनातिरात्रेणोदयनी-यमतिरात्रमध्यारोक्ष्यन्ति[14] चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवं ' पृष्ठेन परं पृष्ठ्यमभिजितामभिजितं[15] स्वरसा-मभिः परात्स्वरसामानो ' ऽथैतदक्षरवाप्नुयामेति[16] यद्वैषु-वतमपरेषां[17] स्विदितमङ्गां[18] परेषामित्यपरेषां चैव

---

1) प्रिरच्छन्दतो B und E; 2) °मुद्धिं C; 3) °मुद्धि E; 4) Fehlt in E; 5) वास्युस्तावो B; वास्यस्तयो C; 6) संचारेथः A; 7) प्राणान् B; 8) Fehlt in B; 9) एकोक्थ्य: A und B; एकोक्थ्याः C; 10) उक्थ्यं B; 11) षोडश्यैव A; षोडशैव B; 12) So corr.; die hss. तया; 13) A, B und C fügen noch zu: यद्ध्यारोहन्ति; 14) प्रानीयेना° B; 15) पृष्ठ्या-नभि° C; 16) अथ हैतद° B, C und E; 17) यद्वैषुवतपरेषां C; 18) स्विदितिमङ्गां B.

परेषां चेति ब्रूयात्स वा एष संवत्सरः' ॥ २१ ॥

अथातो ऽङ्गां निवाहः[1] 'प्रायणीयो ऽतिरात्रश्चतुर्विंशायाङ्गे निवहति ' चतुर्विंशमहरभिप्लवायाभिप्लवः पृष्ठ्याय ' पृष्ठ्यो ऽभिजिते ' ऽभिजित्स्वरसामभ्यः ' स्वरसामानो विषुवते ' विषुवान्त्स्वरसामभ्यः ' स्वरसामानो विश्वजिते ' विश्वजित्पृष्ठ्याभिप्लवाभ्यां ' पृष्ठ्याभिप्लवौ[2] गवायुभ्यां ' गवायुषी दशरात्राय ' दशरात्रो महाव्रताय ' महाव्रतमुदनीयायातिरात्रायोदयनीयो ऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै ' ॥ २२ ॥

आदित्याश्च ह वा अङ्गिरसश्च[3] स्वर्गे लोके ऽस्पर्धन्त वयं पूर्वे स्वरेष्यामो[4] वयं पूर्व इति ' त आदित्या लघुभिः सामभिश्चतुर्भि स्तोमैर्द्वाभ्यां पृष्ठाभ्यां स्वर्गं लोकमभ्यप्लवन्त ' यदभ्यप्लवन्त तस्मादभिप्लवो ' ऽन्वञ्च एवाङ्गिरसो गुरुभिः सामभिः[5] सर्वै स्तोमैः सर्वैः पृष्ठैः स्वर्गं[6] लोकमभ्यस्पृशन्त ' यदभ्यस्पृशन्त तस्मात्स्पृश्यस्तं[7] वा एतं स्पृश्यं[8] सन्तं[9] पृष्ठ[10] इत्याचक्षते[11] परोक्षेण ' परो-

---

1) नीवाह: A, C und E; 2) पृष्ठ्यभि° A; 3) आङ्गिरसश्च B und E; 4) स्वरेष्यासो E; 5) Fehlt in B; समाभि: E; 6) स्वर्ग B; 7) So corr. तस्मात्पृश्यस्तं A und C; तस्मात्पृशस्तं E; तस्मात्पृष्ठ्यतं B; 8) स्पृशं B; 9) सन्त: C; 10) स्पृष्ठ्य A; पृष्ठ्या E und B; 11) Von इत्याचक्षते bis निर्मित: fehlt in B.

ऋप्रिया इव हि देवा भवन्ति प्रत्यङ्ङद्विषो ऽभिप्लवा-त्यृष्यो निर्मितः ' पृष्ठ्यादभिजिदभिजितः[1] स्वरसामानः[2] ' स्वरसामभ्यो विषुवान्विषुवतः स्वरसामानः ' स्वरसाम-भ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ ' पृष्ठ्याभिप्लवाभ्यां गवायुषी ' गवायुर्भ्यां दशरात्रस्तानि ह वा एतानि यज्ञा-रण्यानि यज्ञक्रन्तन्त्राणि[3] ' तेषां शतं शतं रथानान्यन्तरं[4] तद्यथारण्यान्याद्रुढा[5] अशनापिपासे[6] ते पाप्मानं तृंहती[7] परिप्लवेते ' एवं[8] हैवैते प्लवन्ते ये ऽविद्वांस[9] उपय-न्त्यंथ[10] ये विद्वांस[11] उपयन्ति तद्यथा प्रवाद्धात्प्रवाद्धं स्थलात्स्थलं समात्समं सुखात्सुखमभयाद्भयमुपसंक्रामन्ती-त्येवं[12] हैवैते संवत्सरस्योदृचं समश्नवामहा इति ब्रा-ह्मणम् ' ॥ २३ ॥

प्रेदिर्ह वै कौशाम्बेयः कौसुरुबिन्दुरुद्दालक[13] आरु-णौ[14] ब्रह्मचर्यमुवास[15] ' तमाचार्यः पप्रच्छ[16] कुमार कति

---

1) अभिजित् fehlt in E; 2) Fehlt in E; 3) ?? A, B und C यज्ञक्रतन्त्राणि; 4) Sic! B रथानां न्यन्तरं; E रथ्यान्यंतरं; Ś. B. रथाक्षा-न्यन्तरेण; 5) तद्यथारण्यां न्या° A; तद्यथाराण्या° E; 6) अशनायापिपासे A pr. m.; अशनापिसे E; 7) So corr.; die hss. दूंहती; 8) एव E; 9) विद्वास B; विद्वांसम् A und C; 10) उपयत्यथ E; 11) विद्वांसम् A und C; 12) °क्रामन्त्येवं C; 13) कौसुरविंदु° E; 14) आरुणो A, C und E; 15) So corr. nach Ś. B. XII 2. 2. 13; die hss. °मुवाच; 16) प्रपच्छ B.

ते पिता संवत्सरस्याह्नान्यमन्यतेति[1] ' कति[2] त्वेवेति[2] ' दशेति होवाच ' दश वा इति होवाच ' दशाक्षरा विराड्विराजो यज्ञः ' कति त्वेवेति ' नवेति होवाच ' नव वा इति होवाच ' नव वै प्राणाः ' प्राणैर्यज्ञस्तायते[3] ' कति त्वेवेत्यष्टेति[4] होवाचाष्टौ वा इति होवाचाष्टाक्षरा गायत्री ' गायत्रो यज्ञः ' कति त्वेवेति सप्तेति होवाच ' सप्त वा इति होवाच ' सप्त छन्दांसि ' च्छन्दोभिर्यज्ञस्तायते ' कति त्वेवेति ' षडिति होवाच ' षड्वा इति होवाच ' षड्वा ऋतव ' ऋतूनामाप्त्यै ' कति त्वेवेति[5] ' पञ्चेति होवाच ' पञ्च वा इति होवाच ' पञ्चपदा पङ्क्तिः ' पाङ्क्तो यज्ञः ' कति त्वेवेति ' चत्वारीति[6] होवाच ' चत्वारि वा इति होवाच ' चत्वारो वै वेदा[7] ' वैर्यज्ञस्तायते ' कति त्वेवेति[8] ' त्रीणीति होवाच ' त्रीणि[9] वा[9] इति[9] होवाच ' त्रिषवणो वै यज्ञः ' सवनैर्यज्ञस्तायते ' कति त्वेवेति ' द्वे इति होवाच ' द्वे[10] वा इति होवाच ' द्विपाद्वै पुरुषो ' द्विप्रतिष्ठः[11] पुरुषः ' पुरुषो[12] वै यज्ञः ' कति त्वेवेत्येकमिति

---

1) °न्यथेति A, B und C; 2) So alle hss.; man erwartet es hier nicht. Im Ś. Br. fehlt es; 3) प्राणैर्वज्रै° E; 4) त्वेवेतिष्टेति E; 5) त्वेति B; 6) चत्वारिति B; 7) Fehlt in B; 8) B fügt हो ein; 9) त्रीनिति B; 10) द्वि C und E; 11) द्विप्रतिष्ठित: E; 12) पुरुषौ B.

क्षोवाचैकं[1] वा इति क्षोवाचाक्षरक्षरित्येव सर्वं संवत्सरं ' ॥ २४ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे चतुर्थः प्रपाठकः ॥

ओमभिप्लवः षडहः ' षड्ढानि[2] भवन्ति ज्योतिर्गौरायुर्ज्योतिरभिप्लवः[3] पञ्चाहः[4] ' पञ्च क्षोवाहानि भवन्ति ' यद्येव[5] प्रथममहस्तदुत्तममहरभिप्लवश्चतुरहश्चत्वारो[6] हि स्तोमा भवन्ति त्रिवृत्पञ्चदशः[7] सप्तदश एकविंश[8] एवाभिप्लवस्त्र्यहस्त्र्यावृत्तिर्ज्योतिर्गौरायुरभिप्लवो[9] द्व्यहो ' द्वे क्षोव सामनी[10] भवतो बृहद्रथंतरे[11] एवाभिप्लव[12] एकाह ' एकाहस्य हि[13] स्तोमैस्तायते ' चतुर्णामुक्थ्यानां[14] द्वादश स्तोत्राण्यतिरिच्यन्ते ' स सप्तमो ऽग्निष्टोमस्तथा[15] खलु सप्ताग्निष्टोमा मासि संपद्यन्त इति ब्राह्मणम् ' ॥ १ ॥

अथातो गाधप्रतिष्ठा[16] ' समुद्रं वा एते प्रतरन्ति ये

---

1) होवाचैकैचैकं E; 2) षड्याहानि C; षडह: षड्यहानि E; 3) ज्योतिर्गौरायुर्गौ° E; 4) Von पञ्चाह: bis चतुरहश्च° fehlt in E; 5) So corr.; die hss. यथेव; 6) °तुरहत्याश्चत्वारो E; 7) °दशा A pr. m.; 8) °विंशा A, B und C; 9) °हस्त्र्यहावृत्ति° B; 10) समनी B; सामानी C und E; 11) °थंतर् A pr. m.; C und E; 12) °भिप्लवं C; 13) Fehlt in den hss.; 14) °मुकथाना E; 15) ऽग्निष्टोमास्तथा A; 16) गायध-प्रतिष्ठ C.

संवत्सराय दीक्षन्ते ' तेषां तीर्थमेव प्रायणीयो ऽतिरात्र-स्तीर्थेन हि प्रतरन्ति ' तद्यथा समुद्रं तीर्थेन प्रतरेयुस्ता-दृक्तदार्धं प्रतिष्ठा चतुर्विंशमर्ध्यथोपकक्षदघ्नं वा[1] कण्ठ-दघ्नं[2] वा यतो[3] विश्रम्य[4] प्रस्नायेयुस्तादृक्तत्प्रस्नयो ऽभि-प्लवः ' प्रस्नेयः पृष्ठ्यो ' गार्धं प्रतिष्ठाभिजित्यथोपकक्षदघ्नं वा कण्ठदघ्नं[5] वा यतो विश्रम्य प्रस्नायेयुस्तादृक्तन्नीविदघ्न एव प्रथमः स्वरसामा ' ज्ञानुदघ्नो द्वितीयः ' कुल्फदघ्नस्तृ-तीयो[6] ' द्वीपः[7] प्रतिष्ठा विषुवान्यथोपकक्षदघ्नं वा क-ण्ठदघ्नं वा यतो[8] विश्रम्य[9] प्रस्नायेयुस्तादृक्तत्कुल्फदघ्न[10] एव प्रथमो ऽर्वाक्स्वरसामा[11] ' ज्ञानुदघ्नो द्वितीयो ' नी-विदघ्नस्तृतीयो ' गार्धं प्रतिष्ठा[12] विश्वजित्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक्तत्प्रस्नेयः पृष्ठ्यः प्रस्नेयो ऽभिप्लवः[13] प्रस्नेये[14] गवायुषी प्रस्नेयो दशरात्रो ' गार्धं प्रतिष्ठा महाव्रतं[15] यथोपकक्षदघ्नं[16] वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायेयुस्तादृक्तत्तेषां[17] तीर्थमेवोद्य-

---

1) वा न B; 2) °दग्धं E; 3) यातो E; 4) विश्राम्य E; 5) कण्ठं दघ्नं B; 6) कुल्युद° A und E; कुल्यद° C; 7) So corr. nach Ś. Br.; die hss. द्वीपः; 8) युतो C; 9) द्विश्रम्य C; 10) °त्कुल्यु° A, B und E; °त्कुल्य° C; 11) Von ऽर्वाक्स्व° bis यथोपक° fehlt in B; 12) प्रतिष्ठां C; 13) ऽभिः प्लवः A pr. m.; 14) So corr.; die hss. प्रस्तेवो; 15) महां व्रतं E; 16) °क्षदघ्नं E; 17) °क्षास्तेषां B.

नीयो ऽतिरात्रस्तीर्थिन व्युच्यन्ति[1] । तद्यथा समुद्रं तीर्थिनोदियुस्तादृक्तदेव ह स्माह श्वेतकेतुरारुणेयः संवत्सराय[2] न्वहं दिक्षा इति । तस्य ह पिता मुखमुदीक्ष्योवाच[3] वत्थ[4] नु[4] त्वमायुष्मत्संवत्सरस्य[4] गाधप्रतिष्ठ[5] इति[5] । वेदित्यैतद्ध स्मैतद्विद्वानाहेति ब्राह्मणम् । ॥ २ ॥

पुरुषो वाव संवत्सरस्तस्य पादावेव प्रायणीयो ऽतिरात्रः । पादाभ्यां हि[6] प्रयन्ति । तयोर्यच्छुक्लं तदह्नो रूपं । यत्कृष्णं तद्रात्रेर्नखानि नक्षत्राणां रूपं । लोमान्योषधिवनस्पतीनामूरू[7] चतुर्विंशमक्ररो[8] ऽभिप्लवः[9] । पृष्ठं[10] पृष्ठ्यः । शिर[11] एव त्रिवृत्त्रिवृतं व्येव शिरो भवति[12] त्वगस्थि मज्जा मस्तिष्कं । ग्रीवाः पञ्चदशश्चतुर्दश व्येवैतस्यां[13] कनूकराणि[14] भवन्ति । वीर्यं पञ्चदश[15] । तस्मादाभिरण्वीभिः[16] सतीभिर्गुरुं[17] भारं[18] हरति । तस्माद्ग्रीवाः

---

1) क्षयन्ति B; क्षुयन्तिः E; 2) So corr.; °संवत्सरस्या A und C; सवत्सरस्यां B und E; 3) °क्षोवाच C; 4) वेत्तमुत्तममायुष्मान्तसं° B; alle hss. °ष्मान्तसंव°; 5) °तिष्ठेति E; 6) Fehlt in B; 7) लोमान्योषधी° A pr. m.; °न्योषधिं वनस्प° C; °न्योषधेवनस्प° E; 8) °विंशहरुरो E; °शमहरोरु B; °शमहरुरो C; 9) भिप्लवं B; 10) पृष्ठं fehlt in alle hss.; 11) शिवर E; 12) भवत् A, B und E; 13) ग्रीवा wird im Sing. und im Plur. gebraucht; 14) करुकराणि C; कंडूकरापो E; 15) पञ्चदश E; 16) Die hss. तस्मादियमाभिरण्वीभिः; 17) °भिर्गुरं B; 18) भरं B.

पञ्चदश ' ऽरः सप्तदशो ' ऽष्टावन्ये[1] ऽत्रवो[2] ऽष्टावन्य ' ऽरः सप्तदशं[3] ' तस्मादुरः[3] सप्तदश ' ऽदरमेकविंशो[4] ' विंशतिर्ह्येवैतस्यान्तर ऽदरे कुन्तापानि[5] भवन्त्युदरमेकविंशं[6] ' तस्मादुदरमेकविंशः ' पार्श्वे त्रिणवस्त्रयोदशान्याः[7] पर्शवस्त्रयोदशान्याः[8] पार्श्वे त्रिणवे[3] ' तस्मात्पार्श्वे[3] त्रिणवो ' ऽनूकं त्रयस्त्रिंशो[9] ' द्वात्रिंशतिर्ह्येवैतस्य पृष्टीकुण्डीलानि[10] भवन्त्यनूकं त्रयस्त्रिंशं ' तस्मादनूकं त्रयस्त्रिंशस्तस्यायमेव[11] दक्षिणो बाहुरभिजित्तस्येमे दक्षिणे त्रयः प्राणाः स्वरसामान ' आत्मा विषुवांस्तस्येमे सव्ये त्रयः प्राणा अर्वाक्स्वरसामानस्तस्यायं[12] सव्यो बाहुर्विश्वजिद्वैतो पृष्ठ्याभिप्लवौ ' यावद्वाचौ प्राणौ ते[13] गवायुषी ' अङ्गानि दशरात्रो[14] ' मुखं महाव्रतं ' तस्य हस्तावेवोदयनीयो ऽतिरात्रो ' हस्ताभ्यां व्युच्यन्ति ' ॥ ३ ॥

पुरुषो वाव संवत्सरस्तस्य प्राण एव प्रायणीयो ऽतिरात्रः ' प्राणेन हि प्रयन्ति ' वागारम्भणीयमहर्यद्यदार-

---

1) ऽष्टावङ्गे B; 2) यत्रवो A, B und C; 3) Fehlt in B; 4) उरमेकंविंशो E; 5) कुन्तापामि B; कुतापानि C; 6) भवत्यु° B; Im E fehlt von प्रं तत्सा° bis °यस्त्रिंशो; 7) °दशांन्याः C; 8) पर्शवन्याः A, B und E; 9) Von त्रयत्रिंशो bis त्रयस्त्रिंशस्त° fehlt in B; 10) ? ?; 11) °प्रंस्तस्मायमेव C; 12) अवाक्स्व° B; 13) So corr.; die hss. तौ; 14) दशरात्रा E.

भते[1] वागारभते ' वाचैव तदारभते ' तस्यायमेव दक्षिणः पाणिरभिप्लवस्तंस्येदं प्रातःसवनमिदं माध्यंदिनं[2] सवनमिदं तृतीयसवनं ' गायत्र्या आयतने ' तस्मादियमस्यै[3] क्रसिष्ठा ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं ' त्रिष्टुभ[4] आयतने ' तस्मादियमस्यै[5] वरिष्ठा[6] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं[7] ' जगत्या आयतने[8] ' तस्मादियमनयोर्वरिष्ठा ' तस्येदं प्रातः-सवनमिदं[9] माध्यंदिनं सवनमिदं तृतीयसवनं ' पङ्क्त्या आ-यतने[10] ' पृथुरिव वै पङ्क्तिस्तंस्मादियमासां[11] प्रथिष्ठा[12] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं ' विराज[13] आयतने ' ऽन्नं वै श्रीर्विराडन्नाद्यमंन्नाद्यस्य[14] श्रियो[15] ऽवरुद्ध्यै ' तस्मादियमासां[16] वरिष्ठा[17] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनमंतिछ-न्दस[18] आयतने[19] ' ऽतिछन्दो[20] वै छन्दसामायतनं '

---

1) °मह्यग्यदा° C; 2) मध्यंदिनं E; 3) Man erwartet °मासां; 4) त्रिष्टुभा A pr. m.; und B; 5) Vgl. 3; 6) वशिष्टा B und C; 7) तृतीयं सवनं E; 8) आयतनो A pr. m.; 9) प्रतिःसव° E; 10) आय-तनो E; 11) पङ्क्तिं तस्मा° E; °वमासां B; 12) Alle hss. प्रतिष्ठा; 13) विराज्ञा A pr. m. und B; 14) So corr.; die hss. श्रीर्विराडन्नाद्यस्य; 15) श्रीयो B und E; 16) तस्मादय° C; 17) वसिष्ठः B; 18) °तिछ-न्दसा A pr. m. und B; 19) आयताने C; 20) ऽतिछन्दों B.

तस्मादिदं[1] प्रथिष्ठं[2] फलकं[3] । तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं । स[4] इतः[4] स[4] इतो[4] ऽभिप्लवः स[5] इत[5] आत्मा पृष्ठः । प्लवतीवाभिप्लवस्तिष्ठतीव पृष्ठः । प्लवत इव ह्येवमङ्गैस्तिष्ठतीवात्मना[6] । तस्यायमेव[7] दक्षिणः कर्णो ऽभिजित्तस्य यद्दक्षिणमदृणः[8] शुल्कं[9] स प्रथमः स्वरसामा । यत्कृष्णं[10] स द्वितीयो । यन्मण्डलं[11] स[12] तृतीयो[12] । नासिके विषुवान्मण्डलमेव प्रथमो ऽर्वाक्स्वरसामा[13] । यत्कृष्णं स द्वितीयो[14] । यच्छुक्लं[15] स तृतीयस्तस्यायं[16] सव्यः कर्णो विश्वजिद्दुक्तौ पृष्ठ्याभिप्लवौ । यावद्वाचौ प्राणौ ते गवायुषी । अङ्गानि दशरात्रो[17] । मुखं महाव्रतं । तस्योदान एवोदयनीयो[18] ऽतिरात्र । उदानेन ह्युद्यन्ति[19] ॥ ४ ॥

पुरुषो वाव संवत्सरः[20] । पुरुष इत्येकं । संवत्सर[21] इत्येकमन्त्र[22] तत्समं । द्वे अहोरात्रे संवत्सरस्य । द्वाविमौ

---

1) तस्माद्दिनं C; 2) Die hss. प्रतिष्ठं; 3) फलगं B; 4) So corr.; die hss. सैत: सैतो; 5) Die hss. सैत; 6) °द्वात्माना C; 7) तस्माद्य° E; 8) °दामक्त: B; 9) शुक्र: B; 10) Die hss. यकृष्णं; 11) यन्मउलं A; यन्मडं B; 12) संस्तृतीया B; 13) ऽर्वाकस्वर्° B, C und E; 14) द्वीतीयो B; 15) यच्छुक C; 16) तृतीयंस्त° E; 17) दशरात्रौ B, C und E; 18) °यनाद्यो E; 19) °ह्लूध्वन्ति C; 20) °त्सरा B; 21) So corr.; die hss. संवत्सरं; 22) So corr.; die hss. इत्येक इत्यत्र.

पुरुषे प्राणावित्यंत्र[1] तत्समं ' त्रयो[2] वा ऋतवः संवत्सरस्य ' त्रय इमे पुरुषे प्राणा इत्यंत्र तत्समं ' षड्वा[3] ऋतवः संवत्सरस्य ' षडिमे पुरुषे प्राणा इत्यंत्र तत्समं ' सप्त वा ऋतवः संवत्सरस्य ' सप्तेमे[4] पुरुषे प्राणा इत्यंत्र तत्समं ' द्वादश मासाः संवत्सरस्य ' द्वादशेमे पुरुषे प्राणा इत्यंत्र तत्समं ' त्रयोदश मासाः संवत्सरस्य ' त्रयोदशेमे पुरुषे प्राणा इत्यंत्र तत्समं ' चतुर्विंशतिरर्धमासाः संवत्सरस्य ' चतुर्विंशो ऽयं[5] पुरुषो ' विंशत्यङ्गुलिश्चतुरङ्ग इत्यंत्र तत्समं ' षड्विंशतिरर्धमासाः संवत्सरस्य ' षड्विंशो[6] ऽयं पुरुषः ' प्रतिष्ठे षड्विंशे[7] इत्यंत्र तत्समं ' त्रीणि च ह्र वै शतानि षष्टिश्च[8] संवत्सरस्याहोरात्राणीत्येतावन्त एव पुरुषस्य प्राणा इत्यंत्र तत्समं ' सप्त च ह्र[9] वै शतानि विंशतिश्च संवत्सरस्याहानि च रात्रयश्चेत्येतावन्त एव पुरुषस्यास्थीनि[10] च मज्जानश्चेत्यंत्र तत्समं ' चतुर्दश च ह्र वै शतानि चत्वारिंशच्च संवत्सरस्यार्धाहाश्चार्धरात्रयश्चेत्येतावन्त[11] एव पुरुषस्य स्थूरा[12] मांसानीत्यंत्र[13] तत्समंमष्टाविंशतिश्च ह्र वै शतान्यशीतिश्च संवत्सरस्य

---

1) So corr.; die hss. प्राणा उत्यत्र; 2) Von त्रयो bis स्वेदायनानि fehlt in B; 3) षडवा E; 4) सप्तमे C; 5) मे E; 6) षडविंशो E; 7) षडविंशे E; 8) षष्णु E; 9) हे E; 10) पुरुषस्योनि E; 11) संवत्सरस्यार्धाश्चार्ध° E; 12) स्थुरा E; 13) मासानी° E.

पादाश्च पादत्रयश्चेत्येतावन्त[1] एव पुरुषस्य स्नावा[2] बन्धा[3] इत्यंत्र तत्समं ' दश च ह वै सहस्राण्यष्टौ च शतानि संवत्सरस्य मुहूर्ता[4] इत्येतावन्त एव पुरुषस्य पेशशमरा[5] इत्यंत्र तत्समं ' यावन्तो मुहूर्ताः[4] पञ्चदश कृत्वस्तावन्तः प्राणा ' यावन्तः प्राणाः पञ्चदश कृत्वस्तावन्तो ऽपाना ' यावन्तो ऽपानाः पञ्चदश कृत्वस्तावन्तो[6] व्याना ' यावन्तो व्यानाः पञ्चदश कृत्वस्तावन्तः समाना ' यावन्तः समानाः पञ्चदश कृत्वस्तावन्त उदाना ' यावन्त उदानाः पञ्चदश कृत्वस्तावन्त्येतादीनि[7] ' यावन्त्येतादीनि तावन्त्येतर्हीणि ' यावन्त्येतर्हीणि[8] तावन्ति[9] स्वेदायनानि[10] ' यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि ' यावन्ति क्षिप्रायणानि तावन्तो रोमकूपा ' यावन्तो रोमकूपाः पञ्चदश कृत्वस्तावन्तो[11] वर्षतो धारास्तदेतत्क्रोशशतिकं[12] परिमाणं ' तदप्येतदृचोक्तं श्रमादन्यत्र परिवर्तमानश्चरन्वासीनो[13] यदि वा स्वपन्नपि । अहोरात्राभ्यां पुरुषः क्षणेन कति कृत्वः[14] प्राणिति[15] चापानिति[16] च '

---

1) पादात्र° E; 2) स्तावा C; स्ताव E; 3) त्रिध्या E; 4) मूहूर्ता A; महूर्ता C; 5) श्रप्समरा E; 6) °वतो E; 7) °तादिनि A pr. m.; 8) यावन्तेतर्हीणि A, B und C; 9) B fügt ein सप्तवा ऋतवः णितावन्ति; 10) स्वदाय° B; 11) °वत्यो A; °वन्त्यो C und E; 12) °देतक्रोशशतिं कं C; 13) °न्वासतो E; 14) कृत्वा C; कृत्यः E; 15) प्राणति B und E; 16) चापानति B; चापानितिति E.

शतं शतानि परिवत्सराणामंष्टौ च शतानि संवत्सरस्य[1] मुहूर्तान्यान्वदत्यहोरात्राभ्यां[2] पुरुषः समेन कति[3] कृत्वः प्राणिति[4] चापानिति[5] चेति ब्राह्मणम्' ॥ ५ ॥

संवत्सरस्य समता वेदितव्येति[6] ह स्माह वास्युरे-कमेव पुरस्ताद्विषुवतो ऽतिरात्रमुपयत्येकमुपरिष्टात्त्रिंप-च्चाशतमेव पुरस्ताद्विषुवतो ऽग्निष्टोमानुपयन्ति त्रिपच्चा-शतमुपरिष्टाद्विंशतिशतमेव[7] पुरस्ताद्विषुवत उक्थ्यानु-पयन्ति विंशतिशतमुपरिष्टात्षडेव पुरस्ताद्विषुवतः षो-डशिन[8] उपयन्ति षडुपरिष्टात्त्रिंशदेव पुरस्ताद्विषुवतः षडहानुपयन्ति त्रिंशदुपरिष्टात्सैषा संवत्सरस्य समता' स य एवमेतां संवत्सरस्य समतां वेद संवत्सरेण सात्मा[9] सलोको भूत्वा देवानप्येतीति ब्राह्मणम्' ॥ ६ ॥

अथातो यज्ञक्रमा' अग्न्याधेयमग्न्याधेयात्पूर्णाहुतिः[10]' पूर्णाहुतेरग्निहोत्रमग्निहोत्राद्दर्शपूर्णमासौ[11]' दर्शपूर्णमासा-भ्यामाग्रयणमाग्रयणाच्चातुर्मास्यानि[12]' चातुर्मास्येभ्यः[13] प-

---

1) Fehlt in C und E; 2) मूहूर्ता° A und B; महूर्त न्यान्व° C; 3) तति C; 4) प्राणति B; प्राणानि E; 5) चापानति A und B; 6) वेदिन्यव्येति C; वेतिदितवेति E; 7) °परिष्टात्षडेव B; °परिष्टाद्विंशतमेव E; 8) षोडशिनं B; 9) सा आत्मा A; स आत्मा B; 10) °धेय्याः पूर्णाहुतिः B; °हूतिः C; 11) पुर्णा° C; दर्शपूर्णमासौ fehlt in C; 12) दर्शपौर्णा° B; आग्रयणम् fehlt in B; °तुर्मासानि E; 13) चातुर्मास्येभ्यः B.

प्सुबन्धः ' पशुबन्धादग्निष्टोमो[1] ' ऽग्निष्टोमाद्राजसूयो ' राजसूयाद्वाजपेयो ' वाजपेयादश्वमेधो ' ऽश्वमेधात्पुरुषमेधः ' पुरुषमेधात्सर्वमेधः ' सर्वमेधाद्दक्षिणावन्तो[2] ' दक्षिणावद्भ्यो ऽदक्षिणा ' अदक्षिणाः सद्यस्दक्षिणे प्रत्यतिष्ठंस्ते[3] वा एते यज्ञक्रमाः ' स य एवमेतान्यज्ञक्रमान्वेद यज्ञेन सात्मा[4] सलोको भूत्वा देवानप्येतीति[5] ब्राह्मणम् ' ॥ ७ ॥

प्रजापतिरकामयतानल्वमश्नुवीयेति[6] ' सो ऽग्नीनाधाय पूर्णाहुत्यायजत[7] ' सो ऽन्तमेवापश्यत्सो[8] ऽग्निहोत्रेणेष्ट्वान्तमेवापश्यत्स दर्शपूर्णमासाभ्यामिष्ट्वान्तमेवापश्यत्स आग्रयणेनेष्ट्वान्तमेवापश्यत्स[9] चातुर्मास्यैरिष्ट्वान्तमेवापश्यत्स पशुबन्धेनेष्ट्वान्तमेवापश्यत्सो ऽग्निष्टोमेनेष्ट्वान्तमेवापश्यत्स[10] राजसूयेनेष्ट्वा राजेति[11] नामाधत्त ' सो ऽन्तमेवापश्यत्स वाजपेयेनेष्ट्वा[12] सम्राडिति नामाधत्त[13] ' सो ऽन्तमेवापश्यत्सो[14] ऽश्वमेधेनेष्ट्वा स्वराडिति[15] नामाधत्त ' सो ऽन्तमेवापश्यत्स[16] पुरुषमेधेनेष्ट्वा विराडिति नामाधत्त ' सो ऽन्तमे-

---

1) अग्निष्टोमो fehlt in B; 2) °णावतो A; 3) °तिष्ठस्ते B; °तिष्ठन्ति E; 4) स आत्मा A, B und E; 5) °नप्यतीति A; देवा अप्ययेतीति B; 6) So corr.; A °श्नुयेति; B °श्नुयेति; C °श्नुयेने; E °श्नुयति; 7) So corr.; °त्रेत A, C und E; °नेते B; 8) त्रमेवा° C; तमेवा° E; 9) आगृयणेने° E; आग्रयणेनं स्त्रान्तमेवा° B; 10) °पश्यात्स E; 11) राड्येति E; 12) °येनेष्ट्वां E; 13) °धत्ते C; 14) ऽन्तमवा° E; 15) स्वरडिति E; 16) ऽन्तमेवाश्यत्स A.

वापश्यत्स[1] सर्वमेधेनेष्ट्वा सर्वराडिति[2] नामाधत्त[3] सो ऽत्तमेवापश्यत्सो ऽक्षीनिर्दक्षिणावद्भिरिष्ट्वात्तमेवापश्यत्सो[4] ऽक्षीनिरदक्षिणावद्भिरिष्ट्वात्तमेवापश्यत्स[5] सत्रेणोभयतो-[6] ऽतिरात्रेणात्ततो ऽयजत[7]' वाचं[8] क्र वै क्षोत्रे प्रायच्छ-त्प्राणमध्वर्यवे[9] चक्षुरुद्गात्रे मनो ब्रह्मणे[10] ऽङ्गानि क्षोत्रकेभ्य आत्मानं सदस्येभ्य[11]' एवमानन्त्यमात्मानं दत्वा-नन्त्यमाश्नुत[12]' तया दक्षिणा आनयत्ताभिरात्मानं[13] नि-ष्क्रीणीय[14]' तस्मादेतेन ज्योतिष्टोमेनाग्निष्टोमेनात्मनि-ष्क्रयणेन सहस्रदक्षिणेन[15] पृष्ठशमनीयेन[16] चरेत' यो क्ष्यनिष्ट्वा[17] पृष्ठशमनीयेन[18] प्रैत्यात्मानं[19] सो ऽनिष्क्री-य[20] प्रैतीति[21] ब्राह्मणम्' ॥ ८ ॥

यद्वै[22] संवत्सराय संवत्सरसदो[23] दीक्षन्ते कथमेषाम-

---

1) स fehlt in E; 2) सर्वाराडिति B; 3) °धत्त् B und C; 4) ऽक्षीनैर्दक्षिणातद्भि° B; °न्त्वमेवापश्यत्सो C; 5) स fehlt in E; 6) °भवतो B; सत्रणोभयते C; सत्रेणोभयते E; 7) So corr.; यज्ञेत A und C; यज्ञेत B; यज्ञेतं E; 8) वाच B; 9) °ध्वर्यवै B; °धर्यवै E; 10) ब्रह्मणो E; 11) सदस्योभ्य B; सदसेभ्य E; 12) So corr.; दत्वानन्त्यमश्नूयेति A; दत्वा-नन्तमश्नूयति B; दत्वानन्तमश्नुयेति C; दत्वानन्तमश्नूयते E; 13) आनं यं तानिरा-त्मानं E; आनयत्ता° B; 14) ? ? 15) सहस्रं दक्षिणेन E; 16) पृष्ठसम° E; 17) क्षेनिष्ट्वा B; 18) पृष्ठाश्न° B; 19) प्रीत्यात्मानं B; 20) So corr.; निष्क्रीणीय A, B, C; नीष्कृणीयतीं E; 21) प्रैति E; 22) यद्वैत्ये B; 23) संवत्सरदो C; °रसोदो E.

ग्निहोत्रमनन्तरितं[1] भवति[1]' व्रतेतेति[1] ब्रूयात्कंथमेषां[2] दर्शो ऽनन्तरितो[3] भवति' दध्ना च पुरोडाशेन चेति ब्रूयात्कंथमेषां पौर्णमासमनन्तरितं[4] भवत्याऽग्येन[5] च पुरोडाशेन चेति ब्रूयात्कंथमेषामाग्रयणमनन्तरितं भवति' सौम्येन चरुणेति ब्रूयात्कंथमेषां[6] चातुर्मास्यान्यनन्तरितानि[7] भवन्ति' पयस्ययेति[8] ब्रूयात्कंथमेषां पशुबन्धो[9] ऽनन्तरितो भवति' पशुना च पुरोडाशेन चेति ब्रूयात्कंथमेषां[10] सौम्यो ऽध्वरो[11] ऽनन्तरितो[12] भवति' ग्रह्रिति ब्रूयात्कंथमेषां[13] गृह्यमेधो[13] ऽनन्तरितो भवति' धानाकरम्भैरिति ब्रूयात्कंथमेषां पितृयज्ञो ऽनन्तरितो भवत्यौपासनैरिति[14] ब्रूयात्कंथमेषां मिथुनमनन्तरितं भवति' ह्रिंकारेनेति[15] ब्रूयात्सैषा संवत्सरे यज्ञक्रतूनामपीतिः[16]' स य एवमेतां संवत्सरे यज्ञक्रतूनामपीतिं[17] वेद[18] यज्ञेन सात्मा[19] सलोको[20] भूत्वा देवानप्येतीति ब्राह्मणम्'

॥ १ ॥

---

1) Fehlt in B; 2) ब्रूयात् fehlt in B; 3) ऽनतरितो B; 4) पौणमनन्तरितो B; 5) भवतित्या° B; 6) °त्कषमषां E; 7) चतु° E; 8) पयसेति A, C und E; 9) पम्पू° E; 10) °मेषी B; 11) ऽधरो E; 12) ऽनतरितो B und E; 13) Fehlt in E; 14) भवत्योपा° C; °सनीरिति E; 15) ह्रिंकारोनेति C; 16) So corr.; die hss. °मुपैतिः; 17) So corr.; °तूनामुपैतिं A; °तूनामुपैते B; °तूनां मपैतिं C; °तूनां मुपैतिं E; 18) A fügt संवत्सरेण ein; 19) स आत्मा A, B und E; 20) संलोको E.

देवा ह वै सहस्रसंवत्सराय दिदीक्षिरे[1] 'तेषां पञ्च शतानि संवत्सराणां पर्युपेतान्यासन्नथेदं[2] सर्वं[3] शश्राम[4] ये स्तोमा यानि पृष्ठानि यानि[5] शस्त्राणि' ते देवा इहसामिवासुरुप[6] तं यज्ञक्रतुं[7] ज्ञानीमो यः सहस्रसंवत्सरस्य प्रतिमा' को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति' तदयातयाम[8] मध्ये[9] यज्ञस्यापश्यंस्तेनायातयाम्ना[10] या[10] वेदे[10] व्यष्टिरासीत्तां[11] पञ्चस्वपश्यन्नृचि[12] यजुषि साम्नि[13] शान्ते ऽथ घोरे' ता वा[14] एताः पञ्च व्याकृतयो भवन्त्यो श्रावयास्तु[15] श्रौषड्यज्ञ येयजामहे वौषडिति' ते देवा इहसामिवासुरुप[16] तं यज्ञक्रतुं ज्ञानीमो यः[17] सहस्रसंवत्सरस्य[17] प्रतिमा[17]' को[17] हि[17] तस्मै[17] मनुष्यो[17] यः सहस्रसंवत्सरेण[18] यजेतेति[19]' तत एतं तापश्चितं[20] सहस्रसंवत्सरस्याज्ञस्यमपश्यंस्ते[20] व्येव

---

1) दीक्षन्ते C; दीक्षरे E; 2) पर्यपेतां न्यास° B und C; 3) सर्व B; 4) So corr. nach Ś. Br., die hss. सुश्रुवुः; 5) B fügt शागनि ein; 6) ? ? 7) °क्रतु B und E; 8) तदवा fehlt in B; 9) मधे E; 10) So corr. nach Ś. Br.; °याम्या पेदे A; °याम्या व पेदे B; °याम्या वा पेदे C; °याम्यां वा पेदे E; 11) व्युष्टिरा° A, B und E; 12) So corr.; die hss. °पश्यदृचि; 13) सामि A, C und E; साम्ने B; 14) Fehlt in E; C व; 15) श्रव° A; श्रावया श्रस्तु B; 16) ? ?; 17) Fehlt in B; 18) सहस्रं वत्स° B; 19) यजेतिति B; श्रजेनेति C; यजेति E; 20) संवत्सरं तापश्चितस्याज्ञस्यमपश्यंस्ते E.

स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि ' स[1] खलु द्वादश मासान्दीक्षाभिरेति[2] द्वादशमासानुपसद्भिर्द्वादशमासांत्सुत्याभिरथ यद्द्वादश मासान्दीक्षाभिरेति द्वादशमासानुपसद्भिस्तेनैतावग्न्यर्कावाप्नोत्यथ[3] यद्द्वादश मासांत्सुत्याभिस्तेनेदं मरुत्वकथमवाप्नोति[4] ' ते देवा इरसामिवासुरुप[5] तं[6] यज्ञक्रतुं ज्ञानीमो यः सरसंवत्सरस्य[7] प्रतिमा ' को हि तस्मै मनुष्यो[8] यः सरसंवत्सरेण[9] यजेतेति ' तत[10] एतं[11] संवत्सरं[12] तापश्चितस्याज्ञस्यमपश्यंस्ते[12] क्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि ' ते[13] देवा इरसामिवासुरुप तं यज्ञक्रतुं ज्ञानीमो[14] यः सरसंवत्सरस्य[15] प्रतिमा ' को हि तस्मै मनुष्यो यः सरसंवत्सरेण[15] यजेतेति[16] ' तत एतं द्वादशाहं संवत्सरस्याज्ञस्यमपश्यंस्ते[17] क्येव स्तोमा भवन्ति तानि पृष्ठानि[18] तानि शस्त्राणि ' स खलु द्वादशाहं दीक्षाभिरेति द्वादशाहमुपसद्भिर्द्वादशाहं[19] सुत्याभिरथ यद्द्वादशाहं दी-

---

1) Von स bis ते देवा उह° fehlt in E; 2) मासा दीक्षा° B; 3) °वग्नि-र्कावाप्नोत्यथ B; 4) °मावाप्नोति B; 5) ? ? °सुरूप° A, C und E; 6) तां C; 7) सहसंव° B; 8) मनुष्या C und E; 9) सहस्रं सं° B und E; 10) त B; 11) एवं A; 12) द्वादशाहं संवत्सरस्याज्ञस्यमपश्यस्ते E; 13) Von ते bis द्वादशहमुपसभि° fehlt in E; 14) ज्ञानामो A und C; 15) सहसंव° B; 16) यजेति B; 17) °मपश्यस्ते C; 18) पृष्ठा B; 19) °दशह C.

ऋाभिरेति द्वादशाक्तमुपसद्भिस्तेनैतावग्न्यर्कावाप्नोत्यथ[1] य-
द्द्वादशाक्तं[2] सुत्याभिस्तेनेदं महदुक्थमवाप्नोति[3] 'ते देवा
इक्तसमिवासुरुप[4] तं यज्ञक्रतुं[5] ज्ञानीमो यः सक्तसंव-
त्सरस्य प्रतिमा' को हि तस्मै मनुष्यो यः सक्तसंव-
त्सरेण यजेतेति[6] 'तत एतं पृष्ठ्यं[7] षडक्तं[8] द्वादशाक्तस्या-
ऽऽस्यमपश्यंस्ते[9] क्येव स्तोमा भवन्ति तानि पृष्ठानि ता-
नि[10] शस्त्राणि' ते देवा इक्तसामिवासुरुप[11] तं यज्ञक्रतुं[12]
ज्ञानीमो यः सक्तसंवत्सरस्य प्रतिमा' को हि तस्मै
मनुष्यो यः सक्तसंवत्सरेण यजेतेति' तत एतं विश्वजितं
पृष्ठ्यषडक्तस्याऽऽस्यमपश्यंस्ते[13] क्येव स्तोमा भवन्ति[14]
तानि पृष्ठानि तानि[15] शस्त्राणि' ते देवा इक्तसामिवा-
सुरुप[16] तं यज्ञक्रतुं[17] ज्ञानीमो यः सक्तसंवत्सरस्य प्र-
तिमा[18]' को हि तस्मै मनुष्यो यः सक्तसंवत्सरेण
यजेतेति' स वा एष विश्वजिद्यः सक्तसंवत्सरस्य प्रतिमैष
क्ष प्रजानां प्रजापतिर्यद्विश्वजिदिति ब्राह्मणम्' ॥ १० ॥

---

1) °न्यर्कापोत्यथ A; °न्यार्कावापोत्यथ C; 2) °दशाहं C; 3) महदुक्थ° A und C; महद्दुक्था° B; 4) ? ?; 5) °क्रतु E; 6) यजेति B; 7) पृष्ठ्यः B; पृष्ठ E; 8) षडह C; 9) °पश्यस्ते E; 10) Fehlt in E; 11) ? ?; °सुरुप E; 12) °क्रतु E; 13) °मपश्यस्ते B und C; 14) भवति B; 15) E fügt स्म ein; 16) ? ?; °सुरुप E; 17) °क्रतु E; 18) प्रति E.

पुरुषं ह वै नारायणं प्रजापतिरुवाच यजस्व[1] यजस्वेति 'स होवाच यजस्व यजस्वेत्येवं ह्यत्य मा 'त्रिरपि[2] ज्ञत[2] मे वसवः प्रातःसवनेनागू रुद्रा माध्यंदिनसवनेनादित्यास्तृतीयसवनेन[3] 'यज्ञवास्तुन्येव[4] पर्यशिषो यज्ञवास्तुमित्येवमाशिषो[5] ऽहं वा एतद्वेद यज्ञे[6] वसवः प्रातःसवनेनागू रुद्रा माध्यंदिनसवनेनादित्यास्तृतीयसवनेन[7] यज्ञवास्तुन्येव पर्यशिषो यज्ञवास्तुमित्येवमाशिषो[8] विद्वांसो नूनं वा याजयेयुरेते[9] ह वा अविद्वांसो यत्रानृग्विद्धोता भवत्ययजुर्विद्ध्वर्युरसामविदुद्गातामृग्वङ्गिरोविद्ब्रह्मा[10] 'यजस्वैव ह्यत्त तु ते तद्वक्ष्यामि 'यथा सूत्रे मणिरिव सूत्रमेतान्युक्थाह्यानि भवन्ति सूत्रमिव वा मणाविति 'तस्माद्य एव सर्ववित्स्यात्तं ब्रह्माणं कूर्वीतैष ह[11] वै विद्वांत्सर्वविद्ब्रह्मा यद्ऋग्वङ्गिरोविदेते[12] ह वा अस्य सर्वस्य शमयितारः[13] पालयितारस्तस्माद्ब्रह्मा[14] स्तुते[15] बहिःपवमाने वाचयति' ॥ ११ ॥

---

1) यस्व E; 2) ?, त्रिरयज्ञते A und C; त्रिरज्ञयिते B; त्रिरज्ञते D; Mit Ś. Br. XII 3. 4. 1. zu lesen यजस्त्रेति वाव त्वं मामात्य त्रिरयज्ञि वसवः u.s.w.; 3) So corr.; die hss. माध्यंदिने सवने आदित्यास्तृतीयसवने; 4) यज्ञवास्तुंन्येव B und C; 5) यज्ञवस्तु° B; 6) यते A, E und D; यन्ते C; 7) Vgl. 3; 8) °माग्निधौ B; 9) यायजेयुरेते C; 10) भवन्त्यय° B; भवत्ययजुर्विदमेध्व° C; भवत्ययजुर्वेदमध्व° E; 11) Fehlt in E; 12) य भृग्वङ्गि° B; °रोविद्येते C; °रोविद्वेषेते E; 13) समैतारः C; शमेयितारः E; 14) °स्तस्माद्ब्राह्मा C; °तार तस्मा E; 15) सुते B.

श्येनो ऽसि गायत्रछन्दा ' अनु त्वारभे ' स्वस्ति मा संपारयेति ' स यदाह[1] श्येनो ऽसीति सोमं वा एतदाहैष ह वा अग्निर्भूत्वास्मिंल्लोके[2] संशाययति[3] ' तद्यत्संशा-ययति[4] तस्माच्छ्येनस्तच्छ्येनस्य श्येनत्वं[5] ' स यदाह गा-यत्रछन्दा अनुत्वारभ इति गायत्रेण छन्दसा वसुभिर्दैवैः[6] प्रातःसवने ऽस्मिंल्लोके ऽग्निं सत्तमन्वारभते[7] ' स यदाह स्वस्ति मा संपारयेति गायत्रेणैव छन्दसा वसुभिर्दैवैः प्रातःसवने ऽस्मिंल्लोके ऽग्निना देवेन स्वस्ति मा[8] संपा-रयेति गायत्रेणैवैनं तच्छन्दसा[9] वसुभिर्दैवैः प्रातःसवने ऽस्मिंल्लोके ऽग्निना देवेन स्वस्ति संपद्यते य एवं वेद '

॥ १२ ॥

अथ माध्यंदिने पवमाने वाचयति सम्राडसि त्रिष्टुप्छ-न्दा[10] ' अनु त्वारभे ' स्वस्ति मा संपारयेति ' स यदाह सम्राडसीति[11] सोमं वा एतदाहैष ह वै वायुर्भूत्वान्त-रिक्षलोके[12] सम्राजति[13] ' तद्यत्सम्राजति[14] तस्मात्सम्रा-ट्त्सम्राजस्य सम्राट्त्वं ' स यदाह त्रिष्टुप्छन्दा[15] अनु त्वारभ इति

---

1) यदा E; 2) °त्वा अस्मिंल्लोके A und E; 3) संश्रायति A; संशारयेति सदाश्रायति B; संशापयति C; संश्राति E; 4) So corr.; die hss. °श्रायय-ति; 5) श्रयेनधं B; 6) वसुभि° A; 7) °रभेते A pr. m.; 8) Fehlt in B, C und E; 9) तच्छन्दंसा B; 10) त्रिष्टुभछन्दा B; त्रिष्टुपछन्दा C; 11) संम्यउसीति B; 12) °रिक्षं° B; 13) सम्राजिति E; 14) तद्यत्संम्राजति E; B fügt ein: तद्यात्सम्राउसीति; 15) त्रिष्टपछन्दा B.

त्रैष्टुभेन [1] छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने ऽन्तरिक्षलोके वायुं [2] सन्तमन्वारभते 'स यदाह [3] स्वस्ति मा संपारयेति [4] त्रैष्टुभेनैव छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना [5] देवेन [5] स्वस्ति मा संपारयेति 'त्रैष्टुभेनैवैनं [6] तच्छन्दसा [6] रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति [7] संपद्यते य एवं वेद' ॥ १३ ॥

अथार्भवे पवमाने वाचयति स्वरो ऽसि गयो ऽसि जगच्छन्दा 'अनु त्वारभे 'स्वस्ति मा [8] संपारयेति 'स यदाह स्वरो ऽसीति सोमं वा एतदाहैष ह वै सूर्यो भूत्वामुष्मिंल्लोके स्वरति [9] ' तद्यत्स्वरति तस्मात्स्वरस्तत्स्वरस्य [10] स्वरत्वं [11] ' स यदाह गयो ऽसीति सोमं [12] वा एतदाहैष ह वै चन्द्रमा भूत्वा [13] सर्वाल्लोकान्गच्छति [14] ' तद्यद्गच्छति तस्माद्गयस्तद्गयस्य [15] गयत्वं 'स यदाह जगच्छन्दा अनु त्वारभ इति जागतेन छन्दसादित्यैर्देवैस्तृतीयसवने ऽमुष्मिंल्लोके सूर्यं सन्तमन्वारभते 'स यदाह स्वस्ति

---

1) त्रिष्टुभेन E; 2) वायु B und C; 3) दाह B; 4) °रयति B; 5) B hat: वायु सन्तमन्वारभते सदाह; 6) वैनं तच् fehlt in B; 7) B fügt ein संपारयेति त्रैष्टुभेनैवैनं तच्छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति; 8) म B; 9) स्वरति B; 10) तस्मात्स्वरतत्स्व° A; तस्मात्स्वरतस्वरस्य C; 11) स्वरस्यत्वं C; 12) सोम B; 13) भूत्वां B; 14) E fügt य ein; 15) तस्माद्गयास्त° C; °स्तद्गयस्त E.

मा संपारयेति ज्ञागतेनैव[1] छन्दसादित्यैर्दैवस्तृतीयसवने ऽमुष्मिंल्लोके सूर्येण देवेन स्वस्ति मा[2] संपारयेति ज्ञागतेनैवैनं तच्छन्दसादित्यैर्दैवस्तृतीयसवने ऽमुष्मिंल्लोके सूर्येण देवेन स्वस्ति संपद्यते य एवं वेद' ॥ १४ ॥

ग्रथ संस्थिते संस्थिते सवने वाचयति[3] मयि भगों[4] मयि[5] महो मयि[6] यशो मयि सर्वमिति' पृथिव्येव भगों ऽन्तरिक्ष एव[7] महो द्यौरेव यशो ऽप एव सर्वमंग्निरेव भगों वायुरेव[8] मह ग्रादित्या[9] एव यशश्चन्द्रमा एव सर्वं' वसव एव भगों रुद्रा एव मह ग्रादित्या[9] एव यशो विश्वेदेवा एव सर्वं' गायत्र्येव भर्गस्त्रिष्टुबेव महो ज्ञगत्येव यशो ऽनुष्टुबेव सर्वं' प्राच्येव भर्गः प्रतीच्येव मह उदीच्येव[10] यशो दक्षिणैव सर्वं' वसन्त[11] एव भगों ग्रीष्म एव महो वर्षा एव यशः शरदेव सर्वं' त्रिवृदेव भर्गः पञ्चदश[12] एव महः सप्तदश एव यश एकविंश एव सर्वमृग्वेद एव भगों यजुर्वेद एव महः सामवेद[13] एव यशो[14] ब्रह्मवेद एव सर्वं' होतैव भगों ऽध्वर्युरेव

---

1) °नैवं C; °नैवैत E; 2) मा fehlt in C; von मा bis संपद्यते fehlt in B und E; 3) E fügt भवति ein; 4) भिर्गो A; 5) य E; 6) माय्ये E; 7) E fügt च ein; 8) °रेवम B; 9) ग्रादित्य E; 10) उदीचित्र C; 11) वसेत E; 12) पञ्चदवा B; 13) सामावेदा E; 14) E fügt एव ein.

मह उद्गातेव यशो ब्रह्मैव सर्वं वागेव भर्गः प्राण एव मह श्चक्षुरेव यशो मन एव सर्वम्' ॥ १५ ॥

स यदाह मयि भर्ग[1] इति पृथिवीमेवैतल्लोकानामाहाग्निं[2] देवानां वसून्देवान्देवगणानां[3] गायत्रं छन्दसां प्राचीं दिशां वसन्तमृतूनां[4] त्रिवृतं स्तोमानामृग्वेदं वेदानां क्षौत्रं[5] क्षोत्रकाणां[6] वाचमिद्रियाणाम्[7] ॥ १६ ॥

स यदाह मयि मह[8] इत्यन्तरिक्षमेवैतल्लोकानामाह वायुं देवानां रुद्रान्देवान्देवगणानां त्रैष्टुभं छन्दसां[9] प्रतीचीं दिशां ग्रीष्ममृतूनां पञ्चदशं[10] स्तोमानां यजुर्वेदं[11] वेदानामाध्वर्यवं क्षोत्रकाणां प्राणमिन्द्रियाणाम्[12] ॥ १७ ॥

स यदाह मयि यश इति दिवमेवैतल्लोकानामाहादित्यं देवानामादित्यान्देवान्देवगणानां[13] जागतं छन्दसामुदीचीं[14] दिशां वर्षा ऋतूनां[15] सप्तदशं स्तोमानां सामवेदं वेदानामौद्गात्रं क्षोत्रकाणां चक्षुरिन्द्रियाणाम्' ॥ १८ ॥

स यदाह मयि सर्वमित्यप एवैतल्लोकानामाह[16] च-

---

1) भर्गा A pr. m.; 2) °माहाग्नि E; 3) वासुन्दे° C; वसूदे° B; 4) °मृतुनां B; 5) Fehlt in B; 6) क्षौत्रकाणां B; 7) वाचमिद्रियाणाम् E; 8) महे B; 9) छन्दसां E; 10) पञ्चदशां C; 11) यजुर् E; 12) प्राणमिद्रि° E; 13) °गणाना E; 14) छदसां मुदींचीं B; 15) ऋतूना E; 16) °कानां गाह C.

न्द्रमसं देवानां विश्वान्देवान्देवगणानामानुष्टुभं[1] छन्दसां दक्षिणां दिशां शरदमॄतूनामेकविंशं[2] स्तोमानां ब्रह्मवेदं वेदानां ब्रह्मत्वं क्षोत्रकाणां मन इन्द्रियाणाम्' ॥ १९ ॥

स वा[3] एष दशधा चतुः संपद्यते 'दश च क्व वै चतुर्विराजो ऽन्नराणि[4] 'तं गर्भा उपजीवन्ति[5] 'श्रीर्वै विराड्ंशो[6] ऽन्नाद्यं[7] 'श्रियमेव तद्विराजं[8] यशस्यन्नाद्ये प्रतिष्ठापयति 'प्रतिष्ठन्तीरिदं[9] सर्वमनुप्रतिष्ठति 'प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद' ॥ २० ॥

अनर्वाणं[10] क्व वै देवं[11] दध्यङ्ङाङ्गिरस[12] उपसीदं[13] क्व यज्ञस्य शुष्टिं[14] समश्नवामहा इति 'स दध्यङ्ङाङ्गिरसो[15] ऽब्रवीद्यो वै सप्तदशं प्रजापतिं यज्ञे ऽन्वितं वेद नास्य यज्ञो रिष्यते 'न यज्ञपतिं[16] रिष्यत[16] इति 'ता वा एताः पञ्च व्याहृतयो भवन्त्यो श्रावयास्तु श्रौषड्यज्ञ येयज्ञामहे वौषडिति 'स दध्यङ्ङाङ्गिरसो[17] ऽब्रवीन्न वयं विद्मो यदि ब्राह्मणाः स्मो यद्यब्राह्मणाः स्मो यदि तस्यर्षेः

---

1) °नामः नष्टुभं B; °ष्टुभ E; 2) श्रारमॄतू° B; 3) एवा C und E; 4) ऽन्नराणी B; 5) °जीवति E; 6) विराड्ग्रशो A, C und E; 7) ऽन्नाद्यां C; 8) तद्विश E; 9) ?? प्रतिष्ठन्तिरिदं B; 10) अथर्वाणं A pr. m.; 11) वं B; 12) So corr.; दध्यङाङ्गिरसम् die hss.; 13) Corrupt; 14) शुष्टि A; शुष्टीं B; शुष्टिं E; शुष्टि D; 15) So corr.; die hss. दध्यङाङ्गि°; 16) ??; vielleicht यज्ञपतो रिष्यत?; 17) So corr.; die hss. दध्यङाङ्गिरसो .

स्मो वान्यस्येत्यंनर्वाणश्च[1] ह वा ऋतावत्तश्च[2] पितरः स्वधायामावृषायन्त[3] वयं वदामहै वयं वदामहा[4] इति ' सो ऽयात्स्वायंभुवो[5] वा[5] ऋतावत्तो[5] मद्यातां[5] न[5] वयं[5] वदामहा[5] इति ' तस्मात्प्रवरे प्रब्रियमाणे[6] वाचयेद्देवाः पितर इति तिस्रो ' य एति संयजति[7] स भवति यश्च[8] न ब्रूते यश्च[9] न ब्रूत इति ब्राह्मणम् ' ॥ २१ ॥

सावित्रं ह स्मैतं[10] पूर्वे पुरस्तात्पशुमालभन्त इत्येतर्हि[11] प्राजापत्यं ' यो ह्येव सविता स प्रजापतिरिति वदन्तस्तंस्माद्ध समुप्याग्नींस्तेन[12] यजेरंस्ते समानधिष्ण्या एव स्युरोखासंभरणीयाया[13] ' ऽखासंभरणीयायां विन्युप्याग्नींस्तया[14] यजेरंस्ते नानाधिष्ण्या एव स्युरा दीक्षणीयाया[15] ' दीक्षणीयायां संन्युप्याग्नींस्तया[16] यजेरंस्ते समानधिष्ण्या[17] एव स्युरोदवसानीयाया[18] ' ऽदवसानीयायां विन्युप्याग्नींस्तया यजेरंस्ते नानाधिष्ण्या एव स्युरथ यदि यजमानस्योपतपेत्पार्श्वतो ऽग्नीनाधाय तावदासीत[19] या-

---

1) नान्य° ed. B. Ind.; 2) ऋतावत्यश्च B; ऋतावन्तश्च E; 3) °वायन्तं B; 4) वमहां E; 5) ? ? A und C मदेयातां; E मद्यातां; 6) प्रब्रोय: माणे B; 7) सयजति B; 8) यस्य C; यस्त्वव E; 9) यस्य C; यस्म E; 10) स्म वैतं A, C und E; वैतं B; 11) So corr.; die hss. इति नेतर्हि; 12) So corr.; die hss. समोप्या°; 13) स्युसेखासं A; स्युस्तेषां सं° B; स्युरेषासं° C; स्युरोषा° E; 14) °स्तेन C; 15) Fehlt in B und E; 16) °स्तेन A, B und E; 17) सामानधिष्ण्या E; 18) स्युरेद° B; 19) तावदासीत्र A.

वदगदः[1] स्याद्यदि प्रेयात्स्वैरेव[2] तमग्निभिर्दहेदशवाग्नि-
भिरितरे[3] यजमाना[4] आसत इति वदन्तस्तस्य तदेव
ब्राह्मणं यदद: पुरःसवने ' पितृमेध[5] आशिषो व्या-
ख्याताः ' ॥ २२ ॥

सायंप्रातर्होमौ स्यालीपाको नवश्च[6] यः ।
बलिश्च पितृयज्ञश्चाष्टका[7] सप्तमः पशुः ॥
इत्येते पाकयज्ञाः[8] '

अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये ।
नवेष्टिश्चातुर्मास्यानि[9] पशुबन्धो ऽत्र सप्तमः ॥
इत्येते हविर्यज्ञाः '

अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः ।
वाजपेयो ऽतिरात्रश्चाप्तोर्यामात्र सप्तमः ॥
इत्येते सुत्याः '

के स्विद्देवाः प्रवोवाजाः के स्विद्देवा अभिग्ववः ।
के स्विद्देवा हविष्मन्तः किं स्विज्जिगाति सुम्नयुः ॥
ऋतव एव प्रवोवाजा[10] मासा देवा अभिग्ववः ।

---

1) So corr.; die hss. यावदग्ध; 2) प्रेयाद्यासोत्स्वैरेव B; प्रेयात्सैरेव C; 3) °भिर्दहेद° B; °भिर्दहेदृदश्च वा अग्नि° A, C und E; 4) यजमान A, C und E; 5) पितृमेधा B; 6) नभश्च C; 7) पित्र्ययज्ञ° A und E; पितृयज्ञस्याष्टका C; 8) पाकंयज्ञाः B; पाकयज्ञः C; 9) °तुर्मास्यांनि A und E; 10) °वावोजा A und B.

अर्धमासा ह्यविष्मन्तस्तङ्डिगाति[1] सुम्नयुः ॥
कति स्विद्रात्रयः कत्यह्नानि कति स्तोत्राणि कति शस्त्रा-
ण्यस्य[2] ।
कति स्वित्सवनाः संवत्सरस्य स्तोत्रियाःपदाक्षराणि क-
त्यस्य ॥
द्वावतिरात्रौ षट्शतमग्निष्टोमा[3] द्वे[4] विंशतिशते उक्थ्यानां।
द्वादश षोडशिनः षष्टिः[5] षडह्ना वैषुवतं[6] च ॥
अह्नान्यस्य विंशतिशतानि त्रीण्यह्नश्चैकं तावदस्य ।
संवत्सरस्य सवनाः सहस्रमसीति त्रीणि च संस्तुतस्य[7] ॥
षष्टिश्च द्वे च शते भवत स्तुतशस्त्राणामयुतं[8] चैकमस्य।
स्तोत्रियाश्च नवतिसहस्रा[9] द्वे नियुते नवतिश्चाति[10] षट्[11]॥
अष्टौ शतान्ययुतानि त्रिंशच्चतुर्नवतिश्च पदान्यस्य[12] ।
संवत्सरस्य कविभिर्मितस्यैतावती मध्यमा देवमात्रा ॥
अयुतमेकं प्रयुतानि त्रिंशद्वे नियुते तथा[13] ह्यनुसृष्टाः[13] ।
अष्टौ शतानि नव चाक्षराण्येतावानात्मा परमः प्रजा-
पतेः ॥

---

1) So corr.; °स्तांस्विद्ग्गाति A; °स्ता स्विद्गिगाति C; °स्तां स्वंद्गिगाति B; °स्तांद्गिगाति E; 2) Von ग्रस्त्रा° bis रात्रौ fehlt in B; 3) षट्शत° B; 4) द्वा E; 5) पृष्टि: A; 6) विषुवतं B; 7) संस्ततस्य E; 8) °णामयु: कं B; 9) नवतिंस° C und E; नवतीस° A; 10) °आधि A; °अति C; 11) षट्ट C; षडे E; 12) पत्तं न्यस E; 13) तस्याप्यनुसृष्टा : E.

आग्नं वषट्कारः प्रदानान्तमेतमग्निष्टोमे[1] पर्वशः[2] साधु
कॢप्तम् ।
सौभेषजं क्रन्द ईप्सन्यदग्नौ[3] चतुःशतं वज्रधा क्रूयते यत् ॥
प्रातःसवन स्तुत एकविंशो गायत्रस्तोममित एक एव ।
माध्यंदिनः सप्तदशेन कॢप्तस्त्रयस्त्रिंशेन सवनं तृतीयम् ॥
॥ २३ ॥

श्रद्धायां रेतस्तपसा तपस्वी वैश्वानरः सिषिचे ऽप्त्यमी-
प्सन् ।
ततो जज्ञे[4] लोकजित्सोमजम्भा[5] ऋषेर्ऋषिरङ्गिराः संबभूव ॥
ऋषेर्यज्ञस्य चतुर्विधस्य[6] श्रद्धां[7] यः श्रेयसीं लोकममुं जिगाय ।
यस्मै वेदाः प्रसृताः सोमबिन्दु[8] युक्ता वहन्ति सुकृतामु
लोकम् ॥
ऋचो ऽस्य भागांश्चतुरो वहन्त्युक्थशस्त्रैः प्रमुदो मोदमानाः ।
ग्रहैर्हविर्भिश्च कृताकृतश्च यज्ञूंषि[9] भागांश्चतुरो वहन्ति ॥
औदुम्बर्यां सामधेषिणा तावत्सविष्टुतिभिश्च स्तोमैः क्रन्द-
सा[10] ।
सामानि भागांश्चतुरो वहन्ति गीत्या स्तोमेन सह प्र-
स्तावेन[11] च ॥

---

1) °ष्टोमेन C; 2) प्रवर्तशः C; 3) इक्षंत्यचध्मौ B; 4) यज्ञो B; यज्ञे A und E; 5) °त्सोमलंभंगा B; 6) °र्विदस्य C; 7) श्रठा C; 8) °बिन्दुं A; 9) यज्ञूंषी B; यज्ञूषि E; 10) छन्द् C; 11) प्रस्थावेन C.

प्रायश्चित्तैर्भेषजैः संस्तुवन्तो ऽथर्वाणो ऽङ्गिरसश्च शान्ताः ।
ब्रह्मा ब्रह्मत्वेन प्रमुदो मोदमाना असंसृष्टान्भागांश्चतुरो [1]
वक्षन्ति ॥

यो ब्रह्मवित्सो[2] ऽभिकरो ऽस्तु वः शिवो धिया[3] धी-
रो[4] रक्षतु धर्ममेतम्[5] ।
मा वः प्रमत्तामृताच्च यज्ञात्कर्माच्च[6] येनानङ्गिरसो[7] ऽपि-
यासीत्[8] ॥

मायुं[9] दशं[10] मारुशस्ताः प्रमेष्ठा मा मे भूर्युक्ता[11] वि-
दक्षाय लोकान् ।
दिव्यं भयं[12] रक्षत धर्ममुद्यतं[13] यज्ञं कालाश स्तुतिगो-
पनायनम्[14] ॥

होता च मैत्रावरुणश्च पादमच्छावाकः सह ग्रावस्तुतै-
कम्[15] ।
ऋग्भि स्तुवन्तो ऽध्वरः पृथिव्या[16] अग्निं पादं ब्रह्मणा[17]
धारयन्ति ॥

---

1) असंसृष्टा प्रागोश्चतुरो E; 2) ब्रह्मभिः सो C; 3) धीया A pr. m.; 4) धीयो C; 5) धर्ममेतां C; 6) ??; °त्कर्मच्च B; 7) °ङ्गिरासा B; 8) ऽपियासीत C; 9) मायु C; 10) दिशं A; दिशां B; 11) So corr.; die hss. भूर्मुक्ता; 12) भयां A pr. m. und B; 13) °मुद्यन्त E; 14) °गापतायनं A, C und E; 15) ग्रावस्तुवैकम् C; ग्रावस्तुवैक E; 16) पृथिव्यां B; 17) ब्राह्मणा C.

अध्वर्युः प्रतिप्रस्थाता[1] नेष्टोन्निता निक्तिं पादमेकम् ।
समन्तरिक्षं यजुषा स्तुवन्तो[2] वायुं पादं ब्रह्मणा धारयन्ति ॥
साम्नोद्गाता ह्लादयन्नप्रमत्त औदुम्बर्यो[3] स्तोभदेयः[4] सगृहदः।
विद्वान्प्रस्तोता विदथाय[5] सुष्टुतिं सुब्रह्मण्यः प्रतिहर्ताय[6] यज्ञे ॥
साम्ना दिव्येकं निक्तिं स्तुवन्तः सूर्यं पादं ब्रह्मणा धारयन्ति ।
ब्रह्मा दैकं[7] ब्राह्मणाच्छंसिनः सह पोताग्नीध्रो निक्तिं पादमेकम् ॥
अथर्वभिरङ्गिरोभिश्च गुप्तो ऽप्सु[8] चन्द्रं पादं ब्रह्मणा धारयन्ति[9] ।
षोडशिकं होत्रका अभिष्टुवन्ति वेदेषु युक्ताः प्रपृथक्चतुर्धा[10] ॥
मनीषिणो दीक्षिताः श्रद्धाना[11] होतारो गुप्ता अभिवक्ति[12] यज्ञम् ।
दक्षिणातो ब्रह्मणस्यों[13] जनदित्येतां व्याहृतिं जपन् ॥

---

1) प्रस्याता B; 2) स्तुवतो B; 3) °र्या C; 4) स्तोमदेयः E; 5) Sic!; 6) °हर्ताच A pr. m., B und E; 7) हैक E; 8) सु E; 9) धारयति B; 10) पृथक्चतुर्धा B; प्रथक्चतुर्धा C und E; 11) श्रद्धाना B; 12) अभिवहन्ति A; 13) So corr. nach Bloomfield (Ved. Conc.) ब्रह्मणास्या A und C; ब्रह्मणोस्यां B; ब्रह्मणास्यात् E.

सप्तदशं सदस्यं तं कीर्तयन्ति पुरा[1] विदुः ।
अष्टादशी दीक्षिता दीक्षितानां यज्ञे पत्नी श्रद्धानिक्[2]
युक्ता ॥
एकोनविंशः शमिता बभूव विंशो[3] यज्ञे गृहपतिरिव[4]
सुन्वन् ।
एकविंशतिरेवैषां संस्थायामङ्गिरो वक्[5] ॥
वेदैरभिष्टुतो लोको नानावेशापराजितः । ॥ २४ ॥
सप्त सुत्याःसप्त च पाकयज्ञाः[6] हविर्यज्ञाः सप्त तथैकविं-
शतिः ।
सर्वे ते यज्ञा अङ्गिरसो ऽपियन्ति[7] नूतना यानृषयो सृज-
न्ति[8] ये च सृष्टाः पुराणैः ॥
एतेषु वेदेष्वपि चैकमेवापव्रज्ञमृत्विजां संभरन्ति ।
कृ[स्तृ]ढ्वात्सचते[9] तामशस्तिं[10] विष्कन्धमेनं विसृतं प्रज्ञासु ॥
निवर्तन्ते दक्षिणा नीयमानाः सुते सोमे वितते यज्ञतन्त्रे[11] ।
मोघाशिषो यत्त्यनिवर्तमाना अनिष्टयज्ञा न तरन्ति लो-
कान् ॥

---

1) पुराष्टा B; 2) °नेव C; 3) विशो C und E; 4) गृहपतिरिव A, B und E; 5) ह्व B; 6) वावयज्ञा C; पाव्यकयज्ञा E; 7) ऽपी-यन्ति E; 8) सृजति B; 9) Corrupt; कृदस्विपा° C; कृ[स्तृ]ढ्वात्सवते E; 10) कामशस्तिं C; °शस्तं B und E; 11) यज्ञं तन्त्रे E.

द्वादशवर्षं[1] ब्रह्मचर्यं पृथग्वेदेषु तत्स्मृतम् ।
एवं[2] व्यवस्थिता वेदाः[3] सर्व एव स्वकर्मसु ॥
सन्ति चैषां समानाः मन्त्राः कल्पाश्च ब्राह्मणानि च ।
व्यवस्थानं तु तत्सर्वं पृथग्वेदेषु तत्स्मृतम् ॥
ऋग्वेदस्य पृथिवी स्थानमन्तरिक्षस्थानो ऽध्वर्युः ।
द्यौ[4] स्थानं सामवेदस्यापो भृग्वङ्गिरसां स्मृतम् ॥
अग्निर्देवत[5] ऋग्वेदस्य यजुर्वेदो वायुदेवतः[6] ।
आदित्यः[7] सामवेदस्य चन्द्रमा वैद्युतश्च भृग्वङ्गिरसाम् ॥
त्रिवृत्स्तोम ऋग्वेदस्य[8] यज्ञूंषि पञ्चदशेन सह जज्ञिरे ।
सप्तदशेन सामवेद एकविंशो ब्रह्मसंमितः ॥
वागध्यात्ममृग्वेदस्य[9] यजुषां प्राण उच्यते ।
चक्षुषी सामवेदस्य मनो भृग्वङ्गिरसां स्मृतम् ॥
ऋग्भिः सह गायत्रं जागतमाङ्कुर्यज्ञूंषि त्रैष्टुभेन सह जज्ञिरे ।
उष्णिगनुष्टुब्भ्यां भृग्वङ्गिरसो जगत्या[10] सामानि[11] कवयो
वदन्ति ॥
ऋग्भिः पृथिवीं[12] यजुषान्तरिक्षं[13] साम्ना दिवं लोकञ्जि-
त्सोमञ्जम्भाः ।

---

1) °वर्षे B; 2) एव E; 3) वेदाः E; 4) द्यौः E; 5) अग्निर्देवता A; 6) वायुर्देवता A pr. m. und E; 7) आदित्याः E; 8) ऋग्वेदस्य E; 9) वागाध्या° E; 10) जागत्य C; 11) समानि C; 12) पृथिवी B und E; 13) °न्तरिक्ष E.

अथर्वभिरङ्गिरोभिश्च[1] गुप्तो यज्ञश्चतुष्पाद्दिवमुद्वक्ष्यत[2] ॥
ऋग्भिः सुशस्तो यजुषा[3] परिष्कृतः सविष्टुतः सामभि-
त्सोमजम्भाः[4] ।
यज्ञस्यापराजितं[1] यदाग्नीध्रं ' यदाग्नीध्राद्धिष्ण्यान्विक्रति[2] तत एवैनं पुनस्तनुते ' पराजित्या ' अप[3] खलु वा एते गच्छन्ति ये बर्हिष्यवमानं[4] सर्पन्ति[5] ' बर्हिष्यवमाने[6] स्तुत आद्धाग्नीद्ग्नीन्विक्रर बर्हि स्तृणीहि पुरोडाशान-लंकुर्विति[7] ' यज्ञमेवापराजित्य[8] पुनस्तन्वाना[9] आयत्यं-ङ्गारैर्द्वे सवने विक्रति शलाकाभिस्तृतीयसवनं[10] ' सशु-क्त्वायाथो[11] संभवत्येवमेवैतद्दक्षिणातो वै देवानां यज्ञं रक्षांस्यभिधांसंस्तान्याग्नीध्रेणापाघ्नत[12] ' तस्माद्दक्षिणामुख-स्तिष्ठन्नग्नीत्प्रत्याश्रावयति ' यज्ञस्याभिजित्यै ' रक्षसामपक्रत्यै रक्षसामपक्रत्यै ' ॥ १६ ॥

तदाङ्गिरस कस्मात्सौम्य एवाध्वरे प्रवृताङ्कृतीर्जुह्वति[13] न ह्विर्यज्ञ इत्यंकृत्स्ना वा एषा देवयज्या[14] यद्धविर्यज्ञो[15] ऽथ ह्वैषैव कृत्स्ना[16] देवयज्या यत्सौम्यो[17] ऽध्वरस्तस्मा-त्सौम्य एवाध्वरे प्रवृताङ्कृतीर्जुह्वति[18] ' जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाग्यद्वाचो मधुमत्तमं[19] तस्मिन्मा

---

1) जित E; 2) So corr.; die hss. यदाग्नीधाधि°; 3) च प E; 4) °वमाने E; 5) सर्पयन्ति B; 6) °वमानं D; 7) °कुर्वीति A pr. m.; 8) °जित्यं B; 9) °न A, B, E und F; 10) शालाका° F; 11) °थो F; 12) °संस्तन्याग्नी° B; 13) प्रवृत्ता° A pr. m. und D; 14) देवयज्ञा D; 15) °र्यज्ञा D; 16) कृत्स्ना एषा A pr. m., D und E; 17) य सोम्यो D; 18) प्रवृत्तां जुतो° D; प्रवृत्ता° F; 19) मधुमं E.

धाः स्वाहा वाचे स्वाहा वांचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वत्या इति पुरस्तात्स्वाहाकरेण जुहोति' तस्माद्वागत ऊर्ध्वमुत्सृष्टा यज्ञं वहति मनसोत्तरां[1] 'मनसा हि मनः प्रीतं' तद्व दैके सप्ताकृतीर्जुह्वति[2] सप्त छन्दांसि प्रवृत्तानि[3] प्रतिमन्त्रमिति वदन्तो' यथा मेखला[4] पर्यस्यते मेध्यस्य चामेध्यस्य[5] च विघृत्या एवं दैवैते न्युप्यन्ते मेध्यस्य चामेध्यस्य[6] च विघृत्यै[7] यज्ञस्य[8] विघृत्यै[8] ' प्राचीनं हि धिष्ण्येभ्यो देवानां लोकाः[9] प्रतीचीनं मनुष्याणां' तस्मात्सोमं पिबता प्राञ्चो धिष्ण्या नोपसर्प्या[10] ' ज्ञनं[11] ह्येतद्देवलोकं ह्यध्यारोहति[12] ' तेषामितदायतनं[13] चोदयनं च यदाग्नीध्रं[14] च सदश्च' तस्मो ऽविद्वान्त्संचरत्यार्तिमार्छत्यथ यो विद्वत्संचरति[15] न स धिष्णीयामार्तिमार्छति' ॥ १७ ॥

प्रजापतिर्वै यज्ञस्तस्मिन्त्सर्वे कामाः सर्वा इष्टीः[16] सर्वममृतत्वं[17] ' तस्य दैते गोप्तारो यद्धिष्ण्यास्तान्त्सदः[18]

---

1) मनसोन्तरां D; मनसोतरा E; 2) समाहु° F; 3) प्रवृतानि B; 4) मेखाला E; 5) Fehlt in E; 6) Fehlt in den hss.; 7) यद्वृत्यै E; 8) Fehlt in F; 9) लोक B; 10) नोपसर्पा A, B und E; नोपसप्य D; 11) त्रिनं D; 12) So corr.; die hss. क्षुध्या°; 13) °यतन A; 14) °ग्रीध्रयं D; 15) °चरन्ति D; 16) इष्टा: D; 17) D fügt च ein; 18) यद्धिष्णाया° E.

प्रस्रप्स्यन्नमस्करोति[1] ' नमो नम इति ' न हि नमस्कारमति देवास्ते[2] ह्न नमसिताः कर्तारमतिसृज्नतीति[3] ' तत एतं प्रजापतिं यज्ञं प्रपद्यते[4] नमो नम इति ' न हि नमस्कारमति देवाः ' स तत्रैव यजमानः सर्वान्कामानाप्नोति सर्वान्कामानाप्नोति ' ॥ १८ ॥

यो वै सदस्यान्गन्धर्वान्वेद न[5] सदस्यामार्तिमार्छति ' सदः[6] प्रस्रप्स्यन्ब्रूयाडुपद्रष्ट्रे नम इत्यग्निर्वै द्रष्टा तस्मा[7] उ एवात्मानं परिददाति[8] ' सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद ' सदः प्रसृप्य ब्रूयाडुपश्रोत्रे नम इति ' वायुर्वा उपश्रोता ' तस्मा उ एवात्मानं परिददाति[9] ' सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद ' सदः प्रसर्पन्ब्रूयादनुख्यात्रे[10] नम इत्यादित्यो वा अनुख्याता ' तस्मा उ एवात्मानं परिददाति[9] ! सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद ' सदः प्रसृप्तो ब्रूयाडुपद्रष्ट्रे नम इति ' ब्राह्मणो वा उपद्रष्टा ' तस्मा उ[11] एवात्मानं परिददाति[9] ' सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं

---

1) °स्कारोति D; 2) देवस्ते D; 3) °मिसृज्नन्तीति A sec. m. und F; 4) प्रपद्येते A pr. m., B und F; 5) Man erwartet न स सद°; 6) सदा D; 7) तस्माद् F; 8) So corr.; die hss. परिदधाति; परिज्ञि D; 9) So corr.; die hss. °दधाति; 10) प्रसृपो ब्रूया° D; 11) So corr.; die hss. उ.

वेद ते वै[1] सदस्या गन्धर्वाः स[1] य एवमेतात्सदस्या-
गान्धर्वानविद्वात्सदः प्रसर्पति स सदस्यामार्तिमार्छत्यथ
यो विद्वात्संचरति[2] न सदस्यामार्तिमार्छत्येतेन[3] ह स्म
वा अङ्गिरसः[4] सर्वं सदः पर्याकुस्ते न सदस्यामार्तिमा-
र्छत्यथ[5] यान्कामयेत न सदस्यामार्तिमार्छियुरिति तेभ्य[6]
एतेन सर्वं सदः परिब्रूयात्ते न सदस्यामार्तिमार्छत्यथ[7] यं
कामयेत प्रमीयतेति तमेतेभ्य आवृश्चेत्प्रमीयते ॥ ११ ॥

तदाहुर्यदैद्धो यज्ञो ऽथ कस्माद्धावेव[8] प्रातःसवने
प्रस्थितानां प्रत्यङ्दीक्षीभ्यां यजतो होता चैव[9] ब्राह्म-
णाच्छंसी चेदं ते[10] सोम्यं[11] मधिति होता यजतीन्द्र[12]
त्वा वृषभं वयमिति ब्राह्मणाच्छंसी नानादेवत्याभिरितरे
कथं तेषामैन्द्यो भवन्ति मित्रं वयं हवामह इति मैत्रा-
वरुणो यजति वरुणं सोमपीतय इति यद्धै किं च पी-
तवत्तदैन्द्रं[13] हूयं तेनेन्द्रं प्रीणाति मरुतो यस्य हि क्षय
इति पोता यजति स[14] सुगोपतमो जन इतीन्द्रो वै गो-
पास्तदैन्द्रं हूयं तेनेन्द्रं प्रीणात्यग्ने पत्नीरिहावहेति नेष्टा

---

1) Fehlt in D; 2) °चरन्ति D; 3) °त्यते E; 4) अङ्गिरसं E;
5) Vielleicht °तिमार्छन्नित्यथ; °मार्छत्यथ A, B, D und F; 6) Fehlt in B;
7) °मार्छत्यथ A, D und F; 8) So corr.; die hss. कस्माद्धावेव; 9) वेव D;
10) मे E; 11) सौम्यं F; 12) यजन्तीन्द्र D; 13) °त्तदैद्र D;
14) च D.

यजति ' त्वष्टारं सोमपीतय इति ' यद्वै किं च पीतवत्तदैन्द्रं द्रूपं ' तेनैन्द्रं प्रीणात्युन्नान्नाय वशान्नायेत्याग्नीध्रो[1] यजति ' सोमपृष्ठाय वेधस इतीन्द्रो वै वेधास्तदैन्द्रं द्रूपं ' तेनैन्द्रं प्रीणाति ' प्रातर्यावभिरागतं देवेभिर्जिन्यावसू[2] इन्द्राग्नी सोमपीतय इति ' स्वयंसमृद्धा अच्छावाकस्यैवमु ह्वैता ऐन्द्र्यो[3] भवन्ति ' यन्नानादेवत्यास्तेनान्या देवताः प्रीणाति ' यद्गायत्र्यस्तेनाग्नेय्यस्तस्मादिताभिस्त्रयमवाप्तं भवति ' ॥ २० ॥

ते वै खलु सर्व एव माध्यंदिने प्रस्थितानां प्रत्यद्गा-दैन्द्रीभिर्यजन्त्यभितृणावतीभिरेके[4] ' पिबा सोममभि यमुग्र तर्द इति होता यजति ' स ईं पाहि य ऋज्रीषी तरुत्र इति मैत्रावरुण ' एवा पाहि प्रन्नया[5] मन्दतु त्वेति ब्राह्मणाच्छंस्यर्वाङेहि[6] सोमकामं त्वाङुरिति पोता ' तवायं सोमस्त्वमेह्यर्वाङिति[7] नेष्टैन्द्राय सोमाः प्रदिवो विदाना इत्यच्छावाक ' आपूर्णो अस्य कलशः स्वहोत्याग्नीध्र ' एवमु ह्वैता अभितृणावत्यो भवन्तीन्द्रो वै प्रातःसवनं नाभ्यजयत्स एताभिर्माध्यंदिनं सवनमभ्यतृणात्तद्यदेताभिर्माध्यंदिनं[8] सवनमभ्यतृणात्तस्मादिता[8] अभितृणावत्यो भवन्ति ' ॥ २१ ॥

---

1) °ग्नीध्रा D ; 2) °र्ज्ञन्यावसू A ; °र्ज्ञावसू E ; 3) ऐद्रिया A pr. m. ; 4) °गिर्यज्ञत्यभितृ° D ; 5) पत्नथा A ; प्रन्नया D ; 6) Ed. B. Ind. °ग्रार्वाङेहि ; 7) सोमस्त्वमह्व° D ; 8) So corr. ; die hss. सवनमभ्यतृणावन्नय°.

तदाहुर्यदैन्द्रार्भवं तृतीयसवनमथ कस्मादिक एव तृतीयसवने प्रस्थितानां प्रत्यङ्नादिन्द्रार्भव्या यजतीन्द्र[1] ऋभुभिर्वाजवद्भिः[2] समुक्षितमिति क्रोतीव ' नानादेवत्या-भिरितरे ' कथं तेषामैन्द्रार्भव्यो भवन्तीन्द्रावरुणा[3] सुतपा-विमं सतमिति मैत्रावरुणो यजति ' युवो रथो अध्वरो देववीतय इति बह्वृनि वाक् ' तदृभूणां रूपमिन्द्रश्च[4] सोमं पिबतं बृहस्पत[5] इति ब्राह्मणाच्छंसी यजत्यां वां वि-शन्विन्दवः स्वाभुव इति बह्वृनि वाक् ' तदृभूणां रूप-मा[6] वो वहन्तु सप्तयो रघुष्यद इति पोता यजति ' रघुपत्वानः प्र जिगात[7] बाहुभिरिति बह्वृनि वाक् ' तदृ-भूणां रूपमेव नः सुकृता आ हि गन्तनेति नेष्टा य-जति गन्तनेति बह्वृनि वाक् ' तदृभूणां रूपमिन्द्राविष्णू[8] पिबतं मध्वो अस्येत्यच्छावाको यजत्यां वामन्धांसि मदि-राण्यग्मन्निति बह्वृनि वाक्[9] ' तदृभूणां रूपमिमं स्तोम-मर्हते[10] जातवेदस इत्याग्नीध्रो यजति ' रथमिव सं महेमा मनीषयेति[11] बह्वृनि वाक् ' तदृभूणां रूपमेवमु खैता[12] ऐन्द्रार्भव्यो भवति ' यन्नानादेवत्यास्तेनान्या देवताः प्री-

1) यतन्तीन्द्र A sec. m. und B; 2) प्रत्नुभिर्वा° D; 3) °वरुणा E; 4) Von इन्द्रश्च bis आ वो वहन्तु fehlt in F; 5) बृहस्पति D; 6) Von आ वो वहन्तु bis अमेव नः fehlt in B; 7) जिगातु E; 8) °विष्णु B; °विष्णा E; 9) वा F; 10) स्तोमर्हते E; 11) मनीषिये B; 12) ता D.

णाति ' यदु जगत्प्रासाद्धा जागतमु वै तृतीयसवनं ' तृतीयसवनस्य समष्ट्यै ' ॥ २२ ॥

विचक्षणावतीं वाचं भाषन्ते[1] चनसितवतीं[2] ' विचक्षयन्ति ब्राह्मणं ' चनसयन्ति प्राजापत्यं[3] ' सत्यं वदत्येतद्वै मनुष्येषु सत्यं यच्चनुस्तस्मादाङ्गिराचक्षाणमद्रागिति[4] ' स यदाह्राद्धामिति तथाह्रास्य श्रद्दधति ' यद्यु वै स्वयं वै[5] दृष्टं[5] भवति न बह्वृनां जनानामेष[6] श्रद्दधाति[7] ' तस्माद्विचक्षणावतीं वाचं[8] भाषन्ते चनसितवतीं[9] ' सत्योत्तरा ह्येवैषां वागुदिता भवति[10] ' ॥ २३ ॥

समृतयज्ञो[11] वा एष यद्दर्शपूर्णमासौ[12] ' कस्य वाव देवा यज्ञमागच्छन्ति कस्य वा न[13] ' बह्वृनां वा[14] एतद्यजमानानां सामान्यमह्रस्तस्मात्पूर्वेद्युर्देवताः परिगृह्णीयाद्यो ह वै पूर्वेद्युर्देवताः परिगृह्णाति तस्य श्वो भूते यज्ञमागच्छन्ति[15] ' तस्माद्विह्व्यस्य चतस्र ऋचो जपेद्यज्ञविदो हि मन्यन्ते सोम एव समृत[16] इति यज्ञो यज्ञेन समृतः[16] ' ॥ २४ ॥

---

1) भाषते B; 2) वनसि° B; 3) प्रजापत्यं D; 4) °चक्षणामद्रागिति E; 5) Korrupt; B. Ind. वै रिष्टं; 6) ज्ञानानामेष E; 7) अद्दद्धति A sec. m.; अद्दद्धन्ति E; 8) Fehlt in D; 9) °तवती D; 10) भवन्ति D; 11) So corr.; die hss. सवृत°; 12) यद् fehlt in B; 13) Fehlt in F; 14) व D; 15) °गच्छति B; 16) So corr.; die hss. सवृत.

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे द्वितीयःप्रपाठकः ॥

ओं देवपात्रं वै वषट्कारो[1] 'यद्वषट्करोति[2] देवपात्रेणैव तद्देवतास्तर्पयत्यंथो यदाभितृष्यन्तीरभिसंस्थं[3] तर्पयत्येवमेव तद्देवतास्तर्पयति यदनुवषट्करोति 'तद्यथैवादोऽश्वान्वा गा वा पुनरभ्याकारं[4] तर्पयत्येवमेव तद्देवतास्तर्पयति यदनुवषट्करोतीमानेवाग्नीनुपासत इत्याङुर्धिष्ण्यानंथ कस्मात्पूर्वस्मिन्नेवाग्नौ जुह्वति[5] पूर्वस्मिन्वषट्करोति[6] 'यदेव सोमस्याग्ने वीहीत्यनुवषट्करोति तेनैव वषट्करोति धिष्ण्यान्प्रीणात्यंथ[7] संस्थितान्सोमान्भक्षयन्तीत्याङुर्येषां[8] नानुवषट्करोति 'तदाङुः को नु सोमस्य स्विष्टकृद्भाग इति 'यदेव[9] सोमस्याग्ने[9] वीहीत्यनुवषट्करोति[9] तेनैव संस्थितान्सोमान्भक्षयन्तीत्याङुः 'स उ एष सोमस्य स्विष्टकृद्भागो[10] यदनुवषट्करोति' ॥ १ ॥

वज्रो वै वषट्कारः 'स[11] यं द्विष्यात्तं[12] मनसा ध्यायन्वषट्कुर्यात्तंस्मिंस्तद्वज्रमास्थापयति 'षडिति वषट्करोति[13] '

---

1) Fehlt in F; 2) यद् fehlt in F; °ट्कारोति D; 3) यदाभितृष्यन्तीर्° A pr. m.; B und F; 4) So corr. nach Ait Br. III 5; die hss. °भ्याधारं; 5) जुहूति E; 6) °षट्कारोति D; 7) अथ fehlt in D und E; 8) Von येषां bis सोमस्य hat E. स उ एष; 9) एव सोमस्याग्ने व्रीहीति fehlt in E; 10) °ङ्गो A pr. m. und F; 11) स्व D und E; 12) द्विष्यात्तं D; द्विष्यान्त E; 13) वषट्कारोति D.

षड्वा ऋतव ' ऋतूनामाप्त्यै ' वौषडिति वषट्करोत्यंसौ[1] वा व वावृतवः[2] षडेतमेव तद्ऋतुष्वादधात्यृतुषु[3] प्रतिष्ठापयति ' तदु ह स्माह वैद[4] एतानि वा[5] एतेन षट्प्रतिष्ठापयति[6] ' द्यौरन्तरिक्षे प्रतिष्ठितान्तरिक्षं[7] पृथिव्यां ' पृथिव्यप्स्वापः सत्ये[8] ' सत्यं ब्रह्मणि ' ब्रह्म तपसीत्येता एव तद्देवताः[9] प्रतिस्थान्याः[10] प्रतितिष्ठन्तीरिदं[11] सर्वमनु प्रतितिष्ठति ' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद '
॥ २ ॥

त्रयो वै वषट्काराः ' वज्रो धामच्छद्रिक्तः[12] ' स यदेवोच्चैर्बलं[13] वषट्करोति स वज्रस्तं तं प्रहरति द्विषते भ्रातृव्याय वधं यो ऽस्य स्तृत्यस्तस्मै[14] स्तरीतवे[15] ' तस्मात्स भ्रातृव्यवता[16] वषट्कृत्यो ' ऽथ यः[17] समः[18] संततो निर्हाणाच्छत्स्व[19] धामच्छत्तं तं प्रजाश्च पशवश्चानूपतिष्ठन्ते[20] ' तस्मात्स[21] प्रजाकामेन पशुकामेन वषट्कृत्यो ' ऽथ येनैव

---

1) वषट्का° D; 2) वा ऋतवः D; 3) °ध्यात्यनुषु D; 4) So corr.; die hss. वैत; 5) व E; 6) वषट्करो प्रति A pr. m.; वषट्प्र° D und E; D fügt न ein; 7) °रिक्षे D; 8) So corr.; die hss. सत्येन; 9) तद्देवतान्याः D; 10) Fehlt in D; 11) So corr.; die hss. प्रतिष्ठ°; 12) धमच्छ° D; 13) So corr.; die hss. बल; 14) सृत्य° D; 15) स्तरीस्तवे F; 16) °व्यवताय D; भ्रातृव्यपा E; 17) यत् A sec. m.; यात् A pr. m.; 18) So corr.; die hss. सयः; 19) Korrupt!; 20) पशवश्चाश्चनूप° E; 21) तस्मात्सं D.

षऽउपराध्नोति[1] स रिक्तो[2]' रिणात्त्यात्मानं[3] रिणाति यज-
मानं[4]' पापीयान्वषट्कर्ता भवति पापीयान्यस्मै वषट्करोति'
तस्मात्तस्याशां नेयात्किं स्वित्स यजमानस्य पापभद्रमाद्रि-
येतेति ह स्माह यो ऽस्य वषट्कर्ता भवत्यंत्रैवैनं[5] यथा
कामयेत तथा कुर्याद्यं कामयेत यथैवानीज्ञानो[6] ऽभूत्त-
थैवेज्ञानः स्यादिति यथैवास्यर्चं ब्रूयात्तथैवास्य वषट्कुर्यात्स-
मानमेवैनं तत्करोति' यं कामयेत पापीयान्स्यादित्युच्चै-
स्तरामस्यर्चं ब्रूयान्नीचैस्तरां वषट्कुर्यात्पापीयांसमेवैनं तत्क-
रोति' यं कामयेत श्रेयान्स्यादिति नीचैस्तरामस्यर्चं ब्रूया-
दुच्चैस्तरां वषट्कुर्याच्छ्रैयांसमेवैनं तत्करोति' श्रिय एवैनं
तच्छ्रियमादधाति' ॥ ३ ॥

यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायन्व-
षट्कुर्यात्साक्षादेव तद्देवतां प्रीणाति' प्रत्यक्षाद्देवतां परि-
गृह्णाति' संततमृचा वषट्कृत्यं' संतत्यै' संधीयते प्रजया पशु-
भिर्य एवं वेद' ॥ ४ ॥

वज्रो वै वषट्कारः' स उ[7] एष प्रकृतो[8] ऽशान्तो
दीदाय' तस्य ह न सर्व एव शान्तिं[9] वेद नो प्रतिष्ठां'

---

1) पराध्नोति A und F; °पराध्येति D; °पराधेति E; 2) ऋक्तो E und F; 3) रिक्त्यात्मानं A, E und F; 4) So corr.; die hss. यजमानस्य; 5) °त्रैवेन D; 6) यथैवानीयो F; 7) Fehlt in E; 8) प्रकृत D; प्रहृत F; 9) श्रान्ति F.

तस्माद्वाप्येतर्हि[1] भूयानिव मृत्युस्तस्य कैषैव शान्तिरेषा प्रतिष्ठा यद्वागिति ' वषट्कृत्य वागित्यनुमन्त्रयते ' वषट्कार मा मां प्रमृक्षो[2] माऽहं त्वां प्रमृक्षं बृहता[3] मन उपह्वये[4] व्यानेन शरीरं प्रतिष्ठीसि[5] प्रतिष्ठां गच्छ[6] प्रतिष्ठां मा गमयेदिति ' तदु ह स्माह दीर्घमेवैतित्सदप्रम्वोऽन्नः[7] सह ओज इत्यनुमन्त्रयेतौजश्च ह वै सहश्च वषट्कारस्य[8] प्रियतमे तन्वौ ' प्रियाभ्यामेव तत्तनूभ्यां समर्धयति[9] ' प्रियया तन्वा समृध्यते य एवं वेद ' ॥ ५ ॥

वाङ्क वै प्राणापानौ च वषट्कारस्ते[10] वषट्कृते वषट्कृते व्युत्क्रामन्ति ' ताननुमन्त्रयते वागोजः सह ओजो मयि प्राणापानाविति ' वाचं चैव तत्प्राणापानौ च होतात्मनि प्रतिष्ठापयति ' सर्वमायुरेति ' न[11] पुरा जरसः प्रमीयते य एवं वेद ' शं नो भव हृद आ पीत इन्दो[12] पितेव सोम सूनवे सुशेवः । सखेव सख्य ऊरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीरित्यात्मानं प्रत्यभिमृशती-श्वरो[13] वा एषो[14] ऽप्रत्यभिमृष्टो यजमानस्यायुः प्रत्यव-

---

1) तस्माद्वा° A und F; तस्माद्ददाथेतर्हि D; तस्माद्वाथेतर्हि E; 2) प्रमृक्ते D; 3) बृहत्ता A; बृहत्या D; 4) अपह्वये D; 5) So corr.; die hss. प्रतिष्ठामि; 6) So corr.; die hss. गच्छन्; 7) So corr.; die hss. °त्सद: प्रम्वोन्न:; 8) So corr.; die hss. वषट्कारश्च; 9) समर्धयति E; 10) वषट्कारश्च D; 11) म A pr. m.; 12) So corr.; die hss. इन्दो; 13) °श्नन्तोम्बुरो D; 14) एषा F.

कर्तुमनर्हन्मा[1] भक्षयेदिति । तद्येतेन प्रत्यभिमृशत्यायुरे-वास्मै तत्प्रतिरत[2] । आप्यायस्व सं ते पयांसीति द्वाभ्यां चमसानाप्याययत्यभिद्रूपाभ्यां । यद्यज्ञे ऽभिद्रूपं तत्समृद्धम् ॥ ६ ॥

प्राणा वा ऋतुयाज्ञास्तं यदृतुयाजैश्चरन्ति प्राणानेव तद्यजमाने दधति । षडृतुनेति[3] यजन्ति । प्राणमेव तद्यज-माने दधति । चत्वार ऋतुभिरिति[4] यजत्यंपानमेव तद्यज-माने दधति । द्विर्ऋतुनेत्युपरिष्टाद्यानमेव तद्यजमाने दधति । स[5] चासु संभृतस्त्रेधा विकृतः प्राणो ऽपाणो व्यान इति । ततो ऽन्यत्र[6] गुणितस्तथा ह यजमानः सर्वमायुरेत्य-स्मिंल्लोक आधीत्यापोत्यमृतत्वमन्वितं स्वर्गे लोके । ते वा एते प्राणा एव यदृतुयाज्ञास्तस्मादनवानत्तो[7] यजन्ति । प्राणानां सत्तत्यै । सत्तत्ता इव[8] ह्येमे प्राणा । अथो ऋतवो वा ऋतुयाज्ञाः । संस्थानुवषट्कारो । यो ऽत्रानुवषट्कुर्यादसंस्थि-तानृतून्संस्थापयेद्यस्तं तत्र ब्रूयादसंस्थितानृतून्समतिष्ठिप-दुःषमं[9] भविष्यतीति शश्वत्तथा स्यात् । ॥ ७ ॥

तदाहुर्यद्धोता यज्ञद्धोता यज्ञदिति मैत्रावरुणो वोत्रे

---

1) So corr.; die hss. प्रत्यविहर्तुर्मनरिहन्मा; 2) °रथ D; 3) षडृतूनेव D; 4) इति fehlt in den hss.; 5) सा D; 6) ऽन्यत A pr. m.; 7) °नवानं ततो E; 8) एव D; 9) So corr. nach Ait. Br. II 29. 7; die hss. °न्समतिस्तियो दुःस्वमं; D समतिष्टिपाहुःस्वमं.

प्रेष्यत्यथ कस्माद्धोतृभ्यः सद्यो होत्राशंसिभ्यो होता यन्नद्धोता यन्नदिति प्रेष्यतीति ' वाग्वै होता वाक्सर्व ऋत्विजो ' वाग्यन्नद्धाग्यन्नदित्यंथो[1] सर्वे वा एते सप्त होतारो ऽपि वा[2] ऋचाभ्युदितं सप्त होतार ऋतुथा[3] यन्नक्तीत्यंथ य[4] उपरिष्टाद्बादशर्चञ्जामितायै[4] ' ते वै द्वादश भवन्ति ' द्वदश[5] वै[6] मासाः संवत्सरः ' संवत्सरः प्रजापतिः ' प्रजापतिर्यज्ञः ' स यो ऽत्र भक्षयेद्यस्तं तत्र ब्रूयाद्शान्तो भक्षो ऽनानुवषट्कृत आत्मानमन्तरगान्न[7] जीविष्यतीति तथा कृ स्याद्यो वै भक्षयेत्प्राणो भक्षः प्राण आत्मानमन्तरगादिति तथैव[8] भवति ' लिम्पेदिवैवावज्रिघ्रेदत्र[9] च[10] द्विदेवत्येषु[11] चेति ' तदु तत्र शासनं[12] वेदयन्ते ' ऽथ यदभू व्यभिचरतो[13] नान्योन्यमनुप्रपद्येते[14] अध्वर्यू तस्मादृतुर्ऋतुं[15] नानुप्रपद्यते[16] ॥ ८ ॥

प्रजापतिर्वै यत्प्रजा असृजत ता वै ताः प्ता असृजत ' ता हिंकारेनैवाभ्यजिघ्रत्ताः[17] प्रजा अश्वमारंस्तद्ध्यते[4]

---

1) वाग्यत्ता° A pr. m. und F; °यन्नदित्यथो D; 2) व D; वा E; 3) ? ?; 4) Korrupt; 5) द्वदर्श A; 6) ह वे D; 7) °न्तरंगान् D; 8) A, E und F fügen ह ein; 9) So corr.; die hss. लिम्पेदितेवावज्रि°; °घ्रेत्रत्र A, D und F; °घ्रेतत्र E; 10) So corr.; die hss. तद्; 11) धिदेवतेषु A, D und F; 12) शा: सनं E; 13) °चरितो D; 14) °प्रपाद्यते D; 15) °दृतुर्ऋतुर् A, D und E; 16) °द्येते A, E und F; °द्यत D; 17) °जिघ्रंस्ता: D.

वा एतद्यज्ञो यद्ध्वींषि पच्यन्ते यत्सोमः सूयते[1] यत्य-
शुरालभ्यते ' ह्किंकारेण वा एतत्प्रजापतिर्हृतमभिनिग्रति[2]
यज्ञस्याकृततायै[3] यज्ञस्याप्त्यै यज्ञस्य वीर्यवत्तायाः[4] इति '
तस्माद्ध[5] ह्किंक्रियते ' तस्माद्ध य[6] एव पिता पुत्राणां
सूर्नाति स[7] श्रेष्ठो भवति[8] ' प्रजापतिर्हि तमभिनिग्रति '
यच्छकुनिराण्डमध्यास्ते[9] यन्न[10] सूयते[11] तद्धि सापि[12]
ह्किंकृणोत्यथो खल्वाहुर्मह्र्षिर्वा[13] एतद्यज्ञस्याग्रे[14] गे-
यमपश्यत्तदेतद्यज्ञस्याग्रे[15] गेयं यद्ध्किारस्तं देवाश्च ऋषय-
श्चाब्रुवन्वसिष्ठो[16] ऽयमस्तु यो नो यज्ञस्याग्रे गेयमद्गागि-
ति[17] ' तदेतद्यज्ञस्याग्रे[18] गेयं यद्ध्किारस्तंतो वै स देवानां
श्रेष्ठो ऽभवद्येन वै श्रेष्ठस्तेन वसिष्ठस्तंस्माद्यस्मिन्वासि-
ष्ठो ब्राह्मणः[19] स्यात्तं[19] दक्षिणाया[20] नान्तरीयात्तंथा
ह्यस्य प्रीतो ह्किारो भवत्यंथ[21] देवाश्च ह वा ऋषयश्च
यदूकसामे अपश्यंस्ते ह स्मैते अपश्यंस्तें यत्रैते अपश्यंस्तत

---

1) अूयते D; 2) So corr.; die hss. °र्हितमभि; statt अभिनिग्रति ist ein Impf. oder Perf. zu erwarten; 3) °हतायै F; 4) So corr.; die hss. °त्रया; 5) तस्मा D; 6) ? ? vielleicht यन्; 7) Fehlt in F; 8) भवन्ति F; 9) °मध्य आस्ते A pr. m.; D und E; 10) यन्: A pr. m.; 11) अूयते D; 12) ? D स्यापि; 13) °हर्षेर्वा E; 14) य तयज्ञ D; 15) गयमप° D; 16) ऋषयश्चाब्रु° E; 17) गेयमस्याद्रागिति F; 18) तयदे-तय° A pr. m. und F; 19) ब्राह्मणास्यातं F; 20) दक्षिणाया A, D und F; 21) °त्यथा D.

एवैनं सर्व[1] दोहमदुहंस्तै वा एते दुग्धे यातयामे ये ऋक्सामे ' ते हिंकारेणैवाप्यायेते ' हिंकारेण वा ऋक्सामे आपीनि यजमानाय दोहं दुहाते ' तस्माद्धु हिंकृत्याध्वर्यवः सोममभिषुण्वन्ति ' हिंकृत्योद्गातारः साम्ना स्तुवन्ति ' हिंकृत्योक्थश[2] ऋचार्विड्यं कुर्वन्ति ' हिंकृत्यार्वाणो ब्रह्मत्वं कुर्वन्ति ' तस्माद्धु हिंक्रियते ' प्रजापतिर्हि तमभिजिघ्रत्यंथो[3] खल्वाहुरेको वै प्रजापतेर्व्रतं बिभर्ति गौरिव ' तदुभये पशव उपजीवन्ति ये च ग्राम्या ये[4] चारण्या इति ' ॥ १ ॥

देवविशः कल्पयितव्या इत्याहुरुद्गन्दुद्गन्दसि प्रतिष्ठाप्यमिति ' शंसावोमित्याह्वयते प्रातःसवने त्र्यक्षरेण ' शंसावो दैवेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण[5] ' तदष्टाक्षरं[6] संपद्यते ' ऽष्टाक्षरा वै गायत्री ' गायत्रीमेवैतत्पुरस्तात्प्रातःसवने ऽचीकॢपतामुक्थं वाचीत्याह[7] शस्त्वा चतुरक्षरमोमुक्थशा इत्यध्वर्युः प्रतिगृणाति चतुरक्षरं ' तदष्टाक्षरं संपद्यते ' ऽष्टाक्षरा वै गायत्री[8] ' गायत्रीमिवैतदुभयतः प्रातःसवने ऽचीकॢपतामंध्वर्यो शंसावोमित्या-

---

1) सर्व D; 2) So corr.; die hss. °शस; 3) तमभिप्रित्यथो E; 4) य D; 5) So corr.; die hss. °क्षरं; 6) Fehlt in F; 7) वाचीत्याह E; 8) Fehlt in A, E und F.

क्षयते माध्यंदिने षडक्षरेण शंसावो दैवेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण[1] तदेकादशाक्षरं[2] संपद्यत एकादशाक्षरा[3] वै त्रिष्टुत्त्रिष्टुभमेवैतत्पुरस्तान्माध्यंदिने[4] ऽचीकॢपतामुक्थं वाचीन्द्रायेत्याह शस्त्वा षडक्षरमोमुक्थशा यजेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरं तदेकादशाक्षरं संपद्यत एकादशाक्षरा वै त्रिष्टुत्त्रिष्टुभमेवैतदुभयतो माध्यंदिने ऽचीकॢपतामध्वर्यो शंशंसावोमित्याह क्षयते तृतीयसवने सप्ताक्षरेण शंसावो दैवेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरं तद्द्वादशाक्षरं संपद्यते द्वादशाक्षरा वै जगती[5] जगतीमेवैतत्पुरस्तात्तृतीयसवने ऽचीकॢपतामुक्थं[6] वाचीन्द्राय देवेभ्य इत्याह शस्त्वा नवाक्षरमोमुक्थशा[7] इत्यध्वर्युः प्रतिगृणाति त्र्यक्षरं तद्द्वादशाक्षरं संपद्यते द्वादशाक्षरा[8] वै जगती जगतीमेवैतदुभयतस्तृतीयसवने ऽचीकॢपतामित्येतद्वै तच्छन्दश्छन्दसि प्रतिष्ठापयति कल्पयत्येव देवविशो य एवं वेद तदप्येषाभ्यनूक्ता यद्गायत्रे अधि गायत्रमाहितमिति ॥ १० ॥

अथैतन्नाना छन्दांस्यक्षरेण गर्ता इवाथैते स्थविष्ठ[9]

---

1) So corr.; die hss. °क्षरं; 2) °क्षरां A pr. m.; 3) °शाक्षर D; 4) °त्पुरस्तन्मा° E; 5) Fehlt in D; 6) ऽचीकॢपामुक्थं E; 7) ?, ओमुक्थशा ist viersilbig; Kauṣ. Br. XIV 3 hat उक्थशा; 8) °क्षरां E; 9) अविष्ठे A pr. m., D, E und F.

बलिष्ठे नान्तरे[1] देवते[2]' ताभ्यां प्रतिपद्यते' तद्ऋतस्क-न्दं रोहस्य रूपं स्वर्ग्यं[3]' तदनवानं[4] संक्रामेद्मृतं वै प्रणवो[5]' ऽमृतेनैव तन्मृत्युं तरति' तद्यथा मत्स्येन[6] वा वंशेन[7] वा गर्तं[8] संक्रामेद्वं तत्प्रणवेनोपसंतनोति[9]' ब्रह्म ह वै प्रणवो' ब्रह्मणैवास्मै तद्ब्रह्मोपसंतनोति' शुद्धः[10] प्रणवः स्यात्प्रजाकामानां' मकारान्तः प्रतिष्ठाका-मानां' मकारान्तः प्रणवः स्यादिति ह्येक आहुः' शुद्ध इति त्वेव स्थितो' मीमांसितः प्रणवो[11]' ऽथात इह शुद्ध इह पूर्ण इति' शुद्धः प्रणवः स्याच्छ्लानुवचनयोर्मध्य[12] इति ह स्माह कौषीतकिस्तथा संहितं भवति' मका-रान्तो ऽवसानार्थि[13]' प्रतिष्ठा वा अवसानं' प्रतिष्ठित्या एवाथोभयोः कामयोरात्या' एतौ वै छन्दःप्रवाहावव्वरं छन्दः परं[14] छन्दो ऽतिप्रवक्तस्तस्यायुर्न[15] क्षिनास्ति' छन्दसां छन्दो ऽतिप्रोठं[16] स्यात्तत्रैव[17] यं द्विष्यात्तं मनसा प्रैव विध्येच्छन्दसां कृत्तत्रे[18] द्रवति वा[19] सं[19] वा शी-

---

1) ? नान्तर् D; नान्तरेण E; vielleicht अनार्ते; 2) So corr. nach K. Br.; die hss. lesen वते; 3) So corr. die hss. स्वर्व; 4) So corr.; die hss. तदनुवानं; 5) प्राणवो D und E; 6) So corr. nach Kauś. Br. XI 4; die hss. lesen मन्त्रेण; 7) वंसेन D und E; 8) गर्भं E; 9) प्रणवनो° D; प्रणवैनो° E; 10) शुद्धः A; 11) प्राणवो E; 12) स्याच्छास्त्रानु° E; 13) °नार्थं E; 14) पर् D; 15) °स्तस्त्वायुर्न E; 16) ऽतिप्रोठं A; 17) Die hss. °यतैव; 18) So corr.; die hss. क्रन्दत्रे; E क्रन्दत्रै; 19) So corr.; die hss. वाचं.

र्यत इति ' त्रिः प्रथमां त्रिरुत्तमामन्वाह ' यज्ञस्यैव तद्व-
र्हिसो[1] नक्यति ' स्थेम्ने[2] बलायाविस्रंसाय ' यद्यपि ह्रन्दः
प्रातःसवने युज्येतार्धर्चश एव[3] तस्य शंस्यं[4] गायत्र्या
द्रुपेणांथो[5] प्रातःसवनद्रुपेणेति ' न त्रिष्टुब्जागत्यावेतस्मि-
न्स्थाने ऽर्धर्चशस्ये[6] यत्किंचिच्छन्दः प्रातःसवने युज्येतां[7]
पच्छ एवैनयोः शस्यमिति[8] सा स्थितिः ' ॥ ११ ॥

अथात एकाहस्य प्रातःसवनं ' प्रजापतिं[9] ह वै यज्ञं
तन्वानं बर्हिष्यवमान एव मृत्युर्मृत्युपाशेन[10] प्रत्युपा-
क्रामत ' स अग्नेय्या गायत्र्याऽयं प्रत्यपद्यत ' मृत्युर्वाव[11]
तं[12] पश्यन्प्रजापतिं[13] पर्यक्रामत्तं[14] सामाज्येष्ठसीदत्स[15]
वायव्या प्रउगं प्रत्यपद्यत ' मृत्युर्वाव तं[16] पश्यन्प्रजाप-
तिं[17] पर्यक्रामत्तं माध्यंदिने पवमाने ऽसीदत्स ऐन्द्र्या[18]
त्रिष्टुभा[19] मरुत्वतीयं प्रत्यपद्यत ' मृत्युर्वाव तं[16] पश्यन्प्र-
जापतिं[20] पर्यक्रामत्स तेनैव द्रविणो पूर्वो निष्केवल्यस्य
स्तोत्रियमासीदत्तमस्तृणोत्तस्माद्व य एव पूर्वमासीदति

---

1) Korrupt; Ait. Br. तद्बर्से; 2) स्थेन्ने D; 3) एवं A sec. m.; 4) शंस्यां E; 5) द्रुपेणार्थो E; 6) °शस्य D; 7) युज्यतां F; 8) शंस्य-मिति A pr. m.; ??; 9) °पति E; 10) मृत्युं मृत्यु° A, E und F; 11) °र्वावा E; 12) दं A pr. m.; D und E; दे F; 13) पश्यत्प्रजा° E; 14) पर्यक्रमत्तं D; 15) ?? vielleicht सामाज्येष्वसीदत्स; 16) दं A pr. m. und D; 17) पस्यत्प्र° E; 18) ऐन्द्रा D; 19) तयुभा E; 20) पस्यत्प्र° E.

स तत्स्तृणुते विद्वान्मृत्युरनवकाशमपाद्रवदशंसदितरो निष्केवल्यं ' तस्मादिकमेवोक्थं[1] क्रोता मरुत्वतीयेन[2] प्रतिपद्यते निष्केवल्यमेवात्र हि प्रज्ञापतिं[3] मृत्युर्व्यज्ञक्रात् ' ॥ १२ ॥

मित्रावरुणावब्रवीद्युवं न इमं[4] यज्ञस्याङ्गमनुसमाक्रतं[5] मैत्रावरुणीयां ' नयेत्यब्रूतां ' तौ सयुजौ सबलौ भूत्वा प्रासह्या[6] मृत्युमत्यैतां[7] ' तौ क्यस्यैतद्यज्ञस्याङ्गमनुसमाक्रतां मैत्रावरुणीयां ' तस्मान्मैत्रावरुणः प्रातःसवने मैत्रावरुणानि शंसति ' तौ क्यस्यैतद्यज्ञस्याङ्गमनुसमाक्रतां ' यद्वेव मैत्रावरुणानि शंसति प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत क्व्यैरुत वामुषसो बुधि[8] साकं सूर्यस्य रश्मिभिरित्यृचाभ्यनूक्तमा नो मित्रावरुणा नो गन्तं[9] रिशादसेति[10] मैत्रावरुणस्य स्तोत्रियानुरूपौ ' प्र वो मित्राय गायतेत्युक्थमुखं[11] ' प्र मित्रयोर्वरुणयोरिति पर्यास ' आ यातं मित्रावरुणेति यजत्यैते एव तद्देवते यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ति[12] ' नाप्याययन्ति ' न क्यनाराशंसाः सीदन्ति ' ॥ १३ ॥

---

1) तस्मादेका° D; 2) मसचतीयेन D; 3) प्रज्ञापति F; 4) इम E; 5) So corr.; die hss. °रतां; 6) प्रसह्य D; 7) मृत्यम° E; 8) बुधिः E; 9) गन्त D; 10) रिशादासोति A pr. m.; 11) °त्युक्तमुखं E; 12) प्रत्यवा° D.

इन्द्रमब्रवीत्वं न इमं[1] यज्ञस्याङ्गमनुसमाहर[2] ब्राह्मणाच्छंसीयां ' केन सहेति[3] ' सूर्येनेति ' तथेत्यब्रूतां ' तौ सयुजौ सबलौ भूत्वा[4] प्रासहा मृत्युमत्यैतां ' तौ व्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां[5] ब्राह्मणाच्छंसीयां ' तस्माद्ब्राह्मणाच्छंसी प्रातःसवन ऐन्द्राणि सूर्यन्यङ्गानि शंसति ' तौ व्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां[5] ' यद्वैवैन्द्राणि सूर्यन्यङ्गानि शंसतीन्द्र पिब प्रतिकामं सुतस्य[6] प्रातःसावस्तव हि पूर्वपीतिरित्यृचाभ्यनूक्तमा[7] याहि सुषुमा हि त आ नो याहि सुतावत[8] इति ब्राह्मणाच्छंसिन स्तोत्रियानुरूपावंयमु त्वा विचर्षणा इत्युक्थमुखमुद्वदमिथुतामघमिति[9] पर्यास ' इन्द्र क्रतुविदमिति यज्ञत्यैते एव तद्देवते यथाभागं प्रीणाति[10] ' वषट्कृत्यानुवषट्करोति ' प्रत्येवामिमृशन्ति[11] ' नाप्याययन्ति ' न व्यनाशंसाः सीदन्ति ' ॥ १४ ॥

इन्द्राग्नी अब्रवीद्युवं न इमं यज्ञस्याङ्गमनुसमाहरतमच्छावाकीयां[12] ' तथेत्यब्रूतां ' तौ[13] सयुजौ[14] सबलौ[15] भूत्वा प्रासहा मृत्युमत्यैतां ' तौ[16] व्यस्यैतद्यज्ञस्याङ्गमनुस-

---

1) इम D; 2) So corr.; die hss. °समाहरन्; 3) सहीति E; 4) सभूत्वा A und F; 5) °समहारतां D; 6) सूतस्य A; 7) °नूक्तामा F; 8) सुतवत A pr. m.; 9) °तामध्यमिति E; 10) प्रीणाते D; 11) °मृशन्त D; 12) So corr.; die hss. °समाहरताम°; 13) तो D und F; 14) सयुजो D; 15) सबलो D; 16) तो D.

माक्रतामच्छावाकीयां[1] 'तस्माद्च्छावाकः[2] प्रातःसवन ऐन्द्राग्नानि शंसति' तौ[3] क्वस्यैतद्यज्ञस्याङ्गमनुसमाक्रतां[4]' यद्वैवैन्द्राग्नानि[5] शंसति प्रातर्यावभिरागतं देवेभिर्दैन्यावसू इन्द्राग्नी सोमपीतय इत्यृचाभ्यनूक्तमिंन्द्राग्नी आगतं' तोषा वृत्रक्रणा क्रुव इत्यच्छावाकस्य स्तोत्रियानुरूपाविंन्द्राग्नी अपसस्परीत्युक्थमुखमिंन्द्राग्नी[6] उपक्वय[7] इति पर्यास' इन्द्राग्नी आगतमिति यजत्यैंते एव तद्देवते यथाभागं प्रीणाति' वषट्कृत्यानुवषट्करोति' प्रत्येवाभिमृशन्ति[8]' नाप्याययन्ति' न क्वनाराशंसाः सीदन्ति' ॥ १५ ॥

अथ शंसावोमिति स्तोत्रियायानुरूपायोक्थमुखाय[9] परिधानीयाया[10] इति चतुश्चतुराक्वयन्ते[11]' चसस्रो वै दिशो[12]' दिक्षु तत्प्रतितिष्ठत्यंथो[13] चतुष्पादः पशवः' पशूनामाप्त्या' अथो चतुष्पर्वाणो[14] हि प्रातःसवने क्रोत्रकास्तस्माच्चतुः सर्वे गायत्राणि शंसन्ति[15]' गायत्रं हि प्रातःसवनं' सर्वे समवतीभिः परिदधति' तद्यत्समवतीभिः

---

1) So corr.; die hss. °समहारताम°; 2) °च्छवाकः E; 3) तो D; 4) °समहारतां D; 5) यद्वद्वैवैन्द्रा° D; यद्वैवैन्द्रा° E; 6) °न्द्राग्नीं E; 7) उपह्वय E; 8) °मृशते E; 9) स्तोत्रियानु° F; 10) परीधा° E; 11) °रह्वयन्ते E; 12) Fehlt in D; 13) So corr.; die hss. तत्प्रतिष्ठ°; 14) °र्वाणे D und E; 15) शंसति D.

परिदधत्यंक्तो[1] वै पर्यासो ऽक्त उदकीं ऽक्तेनैवाक्तं[2] परिदधति[3] । सर्वं मद्धतीभिर्यजन्ति[4] । तद्यन्मद्धतीभिर्यजन्ति[5] सर्वं सुतवतीभिः[6] पीतवतीभिरभिद्रूपाभिर्यजन्ति । यद्यज्ञे ऽभिद्रूपं तत्समृद्धं । सर्वं ऽनुवषट्कुर्वन्ति । स्विष्टकृत्वानुवषट्कारो[7] । नेत्स्विष्टकृतमन्तरयामेत्ययं वै लोकः प्रातःसवनं । तस्य पञ्च दिशःपञ्चोक्थानि प्रातःसवनस्य । स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोत्येताः पञ्च दिश आप्नोति । ॥ १६ ॥

घ्नन्ति[8] वा एतत्सोमं यदभिषुण्वन्ति । यज्ञं वा एतद्घ्नन्ति यद्दक्षिणा नीयन्ते । यज्ञं वा एतद्दक्षयन्ति[9] । तद्दक्षिणानां दक्षिणात्वं । स्वर्गो वै लोको माध्यंदिनं[10] सवनं । यन्माध्यंदिने सवने दक्षिणा नीयन्ते स्वर्गस्य लोकस्य समष्ट्यै । बर्हु देयं । सेतुं वा एतद्यजमानः संस्कुरुते । स्वर्गस्य लोकस्याक्रान्त्यै प्रज्ञाक्रान्त्यै[11] । द्वाभ्यां गार्हपत्ये जुहोत्यध्वर्युरस्याक्रान्तिनाक्रामयत्यग्नेय्याग्नीध्रीये[12] । ऽक्तरिक्तं तेन । यन्माध्यंदिने सवने दक्षिणा नीयन्ते स्वर्ग[13] एतेन लोकं ।

---

1) परिदधात्यन्तो A pr. m.; 2) °वान्त D; 3) °दधाति A pr. m.; 4) मद्धितो° F; 5) तद्यन्मध्वतो° D; 6) सूतव° A sec. m.; 7) °कृत्वा अनु° A, E und F; 8) घन्ति E; 9) So corr.; die hss. एता:सन्न क्षियन्ति; 10) मध्यंदिनं D; 11) Fehlt in D; ? vielleicht प्रत्याक्रान्त्यै; 12) °क्रमयत्या° A, E und F; °ग्नेध्रीयेत्य F; 13) स्वर्गा F.

हिरण्यं[1] हस्ते भवत्यंथ नयति ' सत्यं वै हिरण्यं ' सत्येनैवैनं तन्नयत्यंग्रेण गार्हपत्यं ञ्घनेन सदो ऽन्तराग्नीध्रीयं च सदश्च ' ता उदीचीरन्तराग्नीध्रीयं च सदश्च चावत्तं चोत्सृजत्यैंतेन ह स्म वा अङ्गिरसः स्वर्गं लोकमायंस्तां वा एताः पन्थानमभिवहन्ति ' ॥ १७ ॥

अग्नीधि[2] ऽग्रे ददाति ' यज्ञमुखं वा अग्नीध्यंज्ञमुखेनैव तद्यज्ञमुखं समर्धयति ' ब्रह्मणे ददाति ' प्राजापत्यो[3] वै ब्रह्मा ' प्रजापतिमेव तया[4] प्रीणात्यृत्विग्भ्यो ददाति ' होत्रा एव तया प्रीणाति ' सदस्येभ्यो ददाति ' सोमपीथं[5] तया निष्क्रीणीति ' न हि तस्मा अर्हति सोमपीथं[6] तया निष्क्रीणीयाद्यां[7] शुश्रुवुष[8] आर्षियाय[9] ददाति देवलोके तयाधीति ' यामशुश्रुवुषे[10] ऽनार्षियाय ददाति मनुष्यलोके तयाधीति ' यामप्रसृताय[11] ददाति वनस्पतयस्तया प्रयन्ते[12] ' यां[13] याचमानाय ददाति भ्रातृव्यं तया जिन्वीति[14] ' यां भीषा त्रं तया ब्रह्मातीयाद्यां[15] प्रतिनुदते सा

---

1) हिरण्य D; 2) So corr.; आग्नध्रे A, D, E und F; अग्नीध्रे A sec. m.; 3) प्रजापत्यो A pr. m. und D; 4) So corr.; die hss. तेन; 5) So corr.; die hss. °पीथस्; 6) °पीथस् A, D und E; 7) याद्या D; 8) So corr.; शुश्रूषव A, D und F; शुश्रूषवेन् E; 9) आर्षयय E; 10) So corr.; die hss. °शुश्रूषवे; 11) न प्रसृत्याय D; 12) प्रयते D; 13) Fehlt in D; 14) ? ? 15) ब्रह्मानी° A sec. m., D und F.

व्याघ्री दक्षिणा' यस्तां पुनः प्रतिगृह्णीयाद्याघ्येनं[1] भूत्वा प्रवृणीयादन्यया सह प्रतिगृह्णीयादथ हैनं न प्रवृणाति' ॥ १८ ॥

यद्गां ददाति वैश्वदेवी वै गौर्विश्वेषामेव तद्देवानां तेन प्रियं धामोपैति' यदजं[2] ददात्याग्नेयो वा अजो' ऽग्नेरेव तेन प्रियं धामोपैति' यदविं ददात्याव्यं तेनावरुन्धे[3]' यत्कृतान्नं ददाति मांसं[4] तेन निष्क्रीणीति' यदनो वा रथो वा ददाति[5] शरीरं तेन' यद्वासो[6] ददाति बृहस्पतिं तेन' यद्धिरण्यं ददात्यायुस्तेन वर्षीयः[7] कुरुते' यदश्वं ददाति सौर्यो वा अश्वः' सूर्यस्यैव तेन प्रियं धामोपैत्यथो तः प्रतिहर्त्रे देयं' रौद्रो वै प्रतिहर्ता' रुद्रमेव तन्निरवदयति[8]' यन्मध्यतः प्रतिहर्त्रे दद्यान्मध्यतो रुद्रमन्ववयजेत्स्वर्भानुर्वा[9] आसुरः[10] सूर्यं तमसाविध्यत्तं दत्रिरपनुनोद[11]' तद्दत्रिरन्वपश्यद्यं दात्रियाय[12] हिरण्यं ददाति तम एव तेनापहते' ज्योतिरुपरिष्टाद्धारयति[13]' स्वर्गस्य लोकस्य समष्ट्यै' ॥ १९ ॥

---

1) So corr.; die hss. °द्व्याघ्रीक्षेनं; 2) यदज A pr. m.; 3) तेनाप° A pr. m.; E und F; 4) मांस E; 5) Fehlt in den hss.; 6) यद्वासो D; 7) वर्षय: D; 8) °न्निरवज्ञेयन्ति A pr. m.; 9) रुद्रमन्वयजत्स्व° F; 10) So corr.; die hss. आसुरि:; 11) °त्रेरपनुनोद् E; 12) °त्रेयया D; 13) °द्व्दारयति D.

अथात एकाक्स्यैव माध्यंदिनमूंक्ष[1] वा इदमग्रे साम चास्तां[2]' सैव नामर्गासीद्मो[3] नाम साम 'सा वा[4] ऋक्सामोपावदन्मिथुनं[5] संभवाव प्रजात्या[6] इति 'नेत्यब्रवीत्साम 'ज्यायान्वा अतो मम महिमेति 'ते द्वे भूत्वोपावदतां 'ते न प्रति[7] चन[7] समवदत 'तास्तिस्रो भूत्वोपावदन्यंत्तिस्रो भूत्वोपावदंस्तत्तिसृभिः समभवय्यंत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति 'तिसृभिरुद्गायन्ति 'तिसृभिर्हि साम[8] संमितं भवति 'तस्माद्विकस्य बह्वो ज्ञाया भवन्ति 'न[9] ह्येकस्या बह्वः सह पतयो 'यद्वै[10] तत्सा[10] चामश्च समवदतां तत्सामाभवत्तत्साम्नः[11] सामत्वं 'सामन्भवति 'श्रेष्ठतां गच्छति 'यो वै भवति स सामन्भवत्यं-सामन्य इति ह निन्दते 'ते वै पञ्चान्यद्भूत्वा पञ्चान्यद्भूत्वाकल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा चर्गुद्गीथश्च[12] मध्यमा च प्रतीहारश्चोत्तमा च निधनं च वषट्कारश्च 'ते यत्पञ्चान्यद्भूत्वा पञ्चान्यद्भूत्वाकल्पेतां तस्मादाङ्कः पाङ्क्तो यज्ञः 'पाङ्क्ताः[13] पशव इति 'यद्वै विराजं दक्षिनीमभिसं-

---

1) माध्यंदिन सवनमूक्च D; 2) यास्तां E; वास्तां A und D; 3) नामार्ग्रासीद्मो A pr. m., E und F; 4) Fehlt in D; 5) ऋक्सामोपावि° D; 6) प्रजापत्या A pr. m. und D; प्राजापत्या E; 7) So corr.; die hss. प्रतिवचनं; 8) सम D; 9) नै E; 10) यद्वैतत्सा A; 11) तत्समा° D; 12) So corr. nach Ait. Br., die hss. चोद्गीथश्च; 13) Fehlt in D.

पच्येतां[1] तस्मादाङुर्विराजि[2] यज्ञो दशिन्यां[3] प्रतिष्ठित इति ' यदु वृक्त्या[4] प्रतिपच्यते बार्क्तो वा एष य[4] एष[4] तपति ' तदेनं स्वेन रूपेण समर्धयति ' द्वे तिस्रः करोति पुनरादायं ' प्रजात्यै[5] वूपं ' द्वाविवाग्ने भवतस्तंत[6] उपप्रजायेते ' ॥ २० ॥

आत्मा वै स्तोत्रियः ' प्रजा अनुवूपः ' पत्नी धाय्या[7] ' पशवः[8] प्रगाथो ' गृहाः सूक्तं ' यदन्तरात्मंस्तन्निवित्प्रतिष्ठा[9] परिधानीयान्नं याज्या ' सो ऽस्मिंश्च लोके भवत्यमुष्मिंश्च[10] प्रजया च पशुभिश्च गृहेषु भवति य एवं वेद ' ॥ २१ ॥

स्तोत्रियं शंसत्यात्मा वै स्तोत्रियः ' स मध्यमया वाचा शंस्तव्य[11] ' आत्मानमेवास्य[12] तत्कल्पयत्यनुवूपं[13] शंसति ' प्रजा वा अनुवूपस्तस्मात्प्रतिवूपमनुवूपं कुर्वन्ति ' प्रतिवूपो ह्येवास्य प्रजायामाजायते नाप्रतिवूपस्तस्मात्प्रतिवूपमनुवूपं कुर्वन्ति ' स उच्चैस्तरामिव शंस्तव्यः[14] ' प्रजामेवास्य तच्छे-

---

1) दृश्नी° A, D und E; °पचते याता A pr. m. und F; °पचे यातां A sec. m. und E; 2) So corr.; die hss. °विरज्ञो; 3) दृश्न्यां A, E und F; 4) Fehlt in F; 5) प्रजापत्यौ A pr. m.; 6) भवति तत A pr. m.; तत fehlt in D; 7) धाया E; 8) वयवः D; 9) °त्प्रतिष्टां D; A pr. m. fügt वै ein; 10) भवति interpolation; 11) संस्तव्यं A pr. m.; 12) °वास्या A pr. m.; 13) यत्कल्प° D; 14) शंस्तव्या E.

यस्मीं करोति ' धाय्यां शंसति ' पत्नी वै धाय्या ' सा नीचैस्तरामिव शंस्तव्यांप्रतिवादिनी[1] क्वैवास्य गृहेषु पत्नी भवति यत्रैवं विद्वान्नीचैस्तरां धाय्यां शंसति ' प्रगाथं शंसति ' पशवो वै प्रगाथः ' सः स्वरवत्या वाचा शंस्तव्यः[2] ' पशवो[3] वै[3] प्रगाथः[3] ' पशवः स्वरः ' पशूनामाप्त्यै ' सूक्तं शंसति[4] ' गृहा वै सूक्तं ' प्रतिवीतं ' तत्प्रतिवीततमया[5] वाचा शंस्तव्यं[6] ' स यद्यपि कृ द्वरात्यशूंल्लभते[7] गृहानेवैनानाऽभिगमिषति[8] ' गृहा हि पशूनां प्रतिष्ठा ' निविदं शंसति[4] ' यदन्तरात्मंस्तन्निविर्त्तदेवास्य[9] तत्कल्पयति ' परिधानीयां शंसति ' प्रतिष्ठा वै परिधानीया[10] ' प्रतिष्ठायामेवैनं[11] ततः प्रतिष्ठापयति ' याज्यया यज्ञत्यन्नं वै याज्यान्नाद्यमेवास्य तत्कल्पयति ' मूलं वा एतद्यज्ञस्य यद्धाय्याश्च याज्याश्च ' तद्यदन्या अन्या धाय्याश्च याज्याश्च कुर्युरुन्मूलमेव तद्यज्ञं कुर्युस्तस्मात्ताः समान्य एव स्युः ॥ २२ ॥

तदाहुः किंदेवत्यो यज्ञ इत्यैन्द्र इति ब्रूयादैन्द्रे वाव

---

1) °दिना A sec. m.; °दिनि A pr. m.; 2) शंस्तव्या A pr. man. und E; 3) Fehlt in A; 4) शंसन्ति E; 5) तत्प्रतिवीतं तमया A sec. m. und F; 6) शंस्तव्यः A sec. m. und F; 7) °लुभन्ते D; 8) °मिषाति A pr. m.; 9) °न्नदुदेवास्य A, D und F; 10) °नीयां A sec. m.; 11) So corr. nach Kauṣ. Br. XV 4; die hss. प्रतिष्ठाया एवैनं.

यज्ञे सति यथाभागमन्या देवता अन्वायंस्ताः[1] प्रातःसवने मरुत्वतीये तृतीयसवने चाथ हैतत्केवलमेवेन्द्रस्य[2] यद्ऊर्ध्वं मरुत्वतीयात्तंस्मात्सर्वे निष्केवल्यानि शंसन्ति[3] । यदेव निष्केवल्यानि तत्स्वर्गस्य लोकस्य[4] रूपं । यद्वेव निष्केवल्यान्येकं ह वा अग्रे सवनमासीत्प्रातःसवनमेवाथ हैतं[5] प्रजापतिरिन्द्राय ज्येष्ठाय पुत्रायैतत्सवनं निर्मिमीत[6] यन्माध्यंदिनं सवनं[7] । तस्मान्माध्यंदिने सवने सर्वे निष्केवल्यानि शंसन्ति[8] । यदेव निष्केवल्यानि तत्स्वर्गस्य लोकस्य रूपं । यद्वेव[5] निष्केवल्यानि या ह वै देवताः प्रातःसवने होता शंसति ताः शस्त्वा होत्राशंसिनो ऽनुशंसन्ति[9] मैत्रावरुणं[7] तृचं[7] प्रउगे[7] होता[7] शंसति[7] । तदुभयं[7] मैत्रावरुणं[7] मैत्रावरुणो ऽनुशंसत्यैन्द्रं[10] तृचं प्रउगे होता शंसति । तदुभयमैन्द्रमैन्द्रं[11] ब्राह्मणाच्छंस्यनुशंसत्यैन्द्राग्नं[12] तृचं प्रउगे होता शंसति । तदुभयमैन्द्राग्नमैन्द्राग्नमच्छावाको ऽनुशंसत्यथ हैतत्केवलमेवेन्द्रस्य यद्ऊर्ध्वं मरुत्वतीयात्तंस्मात्सर्वे[13] निष्केवल्यानि

---

1) ?; vielleicht अन्वायत्ताः; न्ववायंस्ताः A, E und F; 2) हैतत्केवल्यमे° E; 3) शंसति D und E; 4) रूपस्य F; 5) Korrupt; 6) So corr.; die hss. निरमिमत; 7) Fehlt in D; 8) शंसति D; 9) °सति D und E; 10) °त्यैन्द्रं F; °त्यैन्द्राग्नं A pr. man.; 11) ऐन्द्रं fehlt in E; 12) ब्रह्मणा° E; 13) °त्सर्व D.

शंसन्ति[1] 'यदेव निष्केवल्यानि तत्स्वर्गस्य लोकस्य रूपं' यद्वेव[2] निष्केवल्यानि यददेवीरसृष्ट माया[3] अथाभवत्केवलः सोमो अस्येत्यृचाभ्यनूक्तं 'देवान्ह यज्ञं तन्वाना-नसुररक्षांस्यजिघांसंस्ते[4] ऽब्रुवन्वामदेवं वं न इमं यज्ञं दक्षिणतो गोपायेति' मध्यतो वसिष्ठमुत्तरतो[5] भरद्वाजं' सर्वाननु विश्वामित्रं' तस्मान्मैत्रावरुणो वामदेवान्न प्रच्यवते[6] वसिष्ठाद्ब्राह्मणाच्छंसी[7] भरद्वाजाद्च्छावाकः सर्वे विश्वामित्रादेत एवास्मै तदृषयो ऽक्षरन्नमगा[8] अप्रमत्ता यज्ञं रक्षन्ति[9] य एवं वेद य एवं वेद' ॥ २३ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे तृतीयः प्रपाठकः ॥

ओं कया नश्चित्र आ[10] भुवत्कया वं न[11] ऊत्येति[11] मैत्रावरुणस्य स्तोत्रियानुरूपौ ' कस्तामिन्द्र त्वावसुमिति बार्हतः प्रगाथस्तस्योपरिष्टाद्ब्राह्मणं[12] ' सद्यो ह जातो वृषभः कनीन इत्युक्थमुखमेवा त्वामिन्द्र वज्रिन्नेत्रेति[13] पर्यास ' ऽशन्नु षु णः सुमना ऽपाक इति यज्ञत्येतामिव

---

1) शंसति D; 2) यदेव D; 3) यदेवददेवी° E; 4) So corr.; die hss. तन्वाना असुर°; 5) वशिष्ठ° D; 6) प्रव्यथते E; 7) वशिष्ठा° D; 8) ?? °नामगा A sec. m, D und F; 9) रक्षति D; 10) अ D; 11) नोत्यति D; 12) °दब्राह्मण E; 13) वक्षिन्नति D.

तद्देवतां यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्त ' नाप्याययन्ति ' न क्यनाराशंसाः सीदन्ति '॥१॥

तं वो दस्ममृतीषहं तवा यामि सुवीर्यमिति ब्राह्मणाच्छंसिन[1] स्तोत्रियानुरूपावुंड त्ये मधुमत्तमा गिर इति बार्हतः प्रगाथः ' पशवो वै प्रगाथः ' पशवः स्वरः ' पशूनामाप्त्या ' अतो[2] मध्यं वै सर्वेषां छन्दसां बृहती ' मध्यं माध्यंदिनं[3] सवनानां ' तन्मध्येनैव मध्यं समर्धयतीन्द्रः[4] पूर्भिदातिरद्दासमर्कैरित्युक्थमुखमुंड[5] ब्रह्माणैरत श्रवस्येति पर्यास ' एवेदिन्द्रं वृषणं वज्रबाहुमिति परिदधाति[6] ' वसिष्ठासो[7] अभ्यर्चन्त्यर्कैरित्यंन्नं वा अर्को ' ऽन्नाद्यमेवास्मै तत्परिदधाति[8] ' स न स्तुतो वीरवद्धातु गोमदिति ' प्रजां चैवास्मै तत्पशूंश्चाशास्ते ' यूयं पात स्वस्तिभिः सदा न इति स्वस्तिमती ऋपसमृद्धा[9] ' एतद्वै[9] यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति ' स्वस्ति तस्य यज्ञस्य पारमश्नुते य एवं वेद यश्चैवंविद्वान्ब्राह्मणाच्छंस्येतया परिदधात्यृंज्रिषी[10] वज्री[11] वृषभस्तुराषाडिति यजत्येतामेव[12] तद्देवतां यथाभागं प्रीणाति '

---

1) ब्रह्मणा° D; 2) ?, अथो ?, अन्तो A sec. m., D und E; 3) मध्यंदिनं D; 4) °यन्तोन्द्रः A; 5) पूर्भिदत्प्रिदूदा° E; 6) परिदध्यति D; 7) वग्निष्टासो D; 8) °दध्यति D; 9) °मृढावृ A und F; man erwartet °मृढैतद्वै; 10) परिदध्य° D; 11) वज्रीं A pr. m.; fehlt in F; 12) यजत्येषा° E.

वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[1] नाप्याययन्ति ' न क्वनाराशंसाः सीदन्ति ' ॥ २ ॥

तरोभिर्वो[2] विदद्वसुं तरणिरित्सिषासतीत्यच्छावाकस्य स्तोत्रियानुरूपावुदिन्वस्य[3] रिच्यत इति बार्हतः प्रगाथस्तांस्योक्तं ब्राह्मणं ' भूय इद्वावृधे वीर्यायेत्युक्थमुखमिमामू षु प्रभृतिं[4] सातये धा इति पर्यासस्तस्य दशमीमुद्धरति ' घोरस्य[5] वा आङ्गिरसस्यैतदार्षं[6] नेष्यन्नं निर्दहेच्छस्यमानं ' पिबा वर्धस्व[7] तव घा[8] सुतास[9] इति यजत्यैतामेव तद्देवतां[10] यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ति[11] ' नाप्याययन्ति ' न क्वनाराशंसाः सीदन्ति ' ॥ ३ ॥

अथाध्वर्यो[12] शंसावोमिति स्तोत्रियायानुरूपाय[13] प्रगायायोक्थमुखाय परिधानीयाया[14] इति पञ्च कृत्व[15] आह्वयन्ते ' पञ्चपदा पङ्क्तिः ' पाङ्क्तो यज्ञः ' सर्व ऐन्द्राणि त्रैष्टुभानि शंसन्त्यैन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनं ' सर्वे सम-

---

1) °मृशन्ति A pr. m. und F; °मृशन्त D; 2) तरोभिर्वा D; 3) So corr.; die hss. °वुदिन्वस्य; 4) प्रभृति D; 5) A pr. m. fügt ह ein; 6) °तदार्षे E; °तदार्ष F; 7) वर्धस्व स्व A pr. m.; 8) धा E; 9) सुता A pr. m.; 10) तद्देवेती E; 11) प्रत्यवाभि° D; 12) °ध्वर्यो A; 13) स्तोत्रियानुर° A sec. m. und F; 14) °नीयायां E; 15) कृत्वा A sec. m., D und F.

वतीभिः परिद्धति[1] । तच्चत्समवतीभिः परिद्धत्यक्तो वै पर्यासो ऽक्त उद्कीं । ऽक्तेनैवाक्तं परिद्धति । सर्वे मद्भतीभिर्यजन्ति । तच्चन्मद्भतीभिर्यजन्ति सर्वे सुतवतीभिः[2] पीतवतीभिरभिद्रूपाभिर्यजन्ति यच्चज्ञे[3] ऽभिद्रूपं तत्समृद्धं । सर्वे ऽनुवषट्कुर्वन्ति । स्विष्टकृत्वानुवषट्कारो[4] । नेत्स्विष्टकृत अन्तरयामेत्यंन्तरिक्षलोको माध्यंदिनं[5] सवनं । तस्य पञ्च दिशः । पञ्चोक्थानि माध्यंदिनस्य सवनस्य । स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोत्येताः पञ्च दिश आप्नोति ॥ ४ ॥

अथ यदौपासनं[6] तृतीयसवन[7] उपास्यक्ते पितृनेव तेन प्रीणात्युंपांशु पात्नीवतस्याग्नीध्रो यजति । रेतो वै पात्नीवत । उपांश्विव वै रेतः सिच्यते । तन्नानुवषट्करोति[8] नेद्रेतः सिक्तं संस्थापयानीत्यंसंस्थितमिव[9] वै रेतः सिक्तं समृद्धं । संस्था वा एषा यदनुवषट्कारस्तांस्मान्नानुवषट्करोति[10] । नेष्टुरुपस्थे धिष्ण्यान्ते वासीनो भक्षयति[11] । पत्नीभाजनं[12] वै नेष्टाग्नीत्यत्नीषु[13] रेतो धत्ते[14] । रेतसः सिक्ताः

---

1) °दधाति A pr. m.; 2) सूतव° A sec. m.; 3) तयज्ञे F; 4) स्विष्टकृत्वा अन° E; 5) माध्यांदिनं A; 6) यदौपसानं D; 7) °सवनं E; 8) °षट्कारोति D und E; 9) So corr.; die hss. संस्थापयामी°; 10) °ट्कारात्तस्मान्नानु° F; 11) भक्षयन्ति D und E; 12) °भाजन F; 13) नेष्टाग्नीन्य° E und F; 14) धत्तं D.

प्रजाः प्रजायन्ते ' प्रजानां प्रजननाय ' प्रजावान्प्रजनयिष्णुर्भवति[1] ' प्रजात्यै ' प्रजायते प्रजया पशुभिर्य एवं वेद ' ॥ ५ ॥

अथ शाकलाञ्जुह्वति ' तद्यथाह्निजीर्णायास्त्वचो निर्मुच्येतेषीका वा मुञ्जादेवं ह्येवैते सर्वस्मात्पाप्मनः संप्रमुच्यन्ते[2] ये शाकलाञ्जुह्वति[3] ' द्रोणकलशे धाना भवन्ति ' तासां हस्तैराद्धति[4] ' पशवो वै धानास्तो[5] आहवनीयस्य[5] भस्मान्ते निवपन्ति ' योनिर्वै पशूनामाहवनीयः ' स्व एवैनांस्तद्गोष्ठे निरुपक्रमे निदधत्यथ सव्यावृतो[6] ऽप्सु सोमानाप्याययन्ति ' तान्हान्तर्वेद्यां सादयन्ति[7] ' तद्धि सोमस्यायतनं ' चात्वालादपरेणाध्वर्युश्चमसानद्भिः पूरयित्वोदीचः प्रणिधाय[8] हरितानि तृणानि व्यवदधाति[9] ' यदा वा आपश्चौषधयश्च संगच्छन्ते[10] ऽथ कृत्स्नः सोमः संपद्यते ' ता वैष्णव्यर्चा[11] निनयन्ति ' यज्ञो वै विष्णुर्यज्ञ[12] एवैनमन्ततः प्रतिष्ठापयत्यथ यद्भक्षः प्रतिनिधिं कुर्वन्ति मानुषेनैवैनं[13] तद्भक्षेण दैवं भक्षमन्तर्दधति ' ॥ ६ ॥

---

1) प्रजावान् fehlt in D; प्रजयिष्णु° D; 2) प्रमुच्यन्त इति D; संप्रमुच्यन्त इति A; °मुच्यते E; °मुच्यते इति F; 3) शाकलं जुहूति E; 4) °दधाति A, D und F; 5) धानास्ताश्चाहव° E; 6) सव्यावृते A pr. m.; सव्यावृततो E; 7) सादयति D und E; 8) प्रणीधाय A pr. m.; 9) °दधति F; 10) स गच्छन्ते F; 11) वैष्णुव्यर्चा A und E; 12) °र्यज्ञम् D, E und F; 13) मनुषे° A pr. m.; मानुषेनवैन E.

पूतिर्वा एषो ऽमुष्मिंल्लोके ऽध्वर्यु[1] च यजमानं चाभिवहति[2] । तद्यदेनं दध्नानभिजुहोत्यावभृथमुपहरेयुर्यथा कुणपं वात्येवमेवैनं तत्करोत्यथ यदेनं दध्नाभिजुहोत्यावभृथमुपहरन्ति[3] सर्वमेवैनं सयोनिं संतनुते । समृद्धिं[4] संभरत्यभूद्वः[5] सविता वन्द्यो नु[6] न इति जुहोति । सर्वमवैनं सपर्वाणां संभरति[7] । तिसृभिस्त्रिवृद्धि[8] यज्ञो[8] । द्रप्सवतीभिरभिजुहोति । सर्वमेवैनं सर्वाङ्गं संभरति[9] । सौमीभिरभिजुहोति । सर्वमेवैनं सात्मानं[10] संभरति[9] । पञ्चभिरभिजुहोति । पाङ्क्तो यज्ञो । यज्ञमेवावरुन्द्धे । पाङ्क्तः पुरुषः । पुरुषमेवाप्नोति । पाङ्क्ताः पशवः । पशुष्वेव प्रतितिष्ठति[11] । प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद । ॥ ७ ॥

अग्निर्वाव यम[12] इयं[13] यमी[14] । कुसीदं वा एतद्यमस्य यजमान[15] आदत्ते यदोषधीभिर्वेदिं स्तृणाति । तां यदनुपोष्य प्रयायाद्यातयेरन्नेनममुष्मिंल्लोके[16] । यमे यत्कुसीदमपमित्यमप्रतीत्तमिति[17] वेदिमुपोषतीह्येव[18] सन्यमं कुसीदं

---

1) ऽध्वर्यु E; 2) °वहन्ति E; 3) So corr.; die hss. दध्नानभि°; °हरति E; 4) समृद्धि E; 5) संभरत्य° E und D; 6) नू F; 7) संभरन्ति A, D und F; 8) So corr.; die hss. °स्त्रिवृद्धिर्यज्ञो; 9) °रन्ति A, D und F; 10) So corr.; die hss. स आत्मानं; 11) °तिष्ठन्ति F; 12) यम् A; 13) Fehlt in F; 14) यमीं F; 15) यजमानस्य A pr. m.; 16) प्रयायातेरन्ने° F; alle hss. °न्नेनमेमुष्मिंल्लोके; 17) So B. Ind.; die hss. य कुसीद्°; °तीतमिति D, E und F; 18) So corr.; °षोषन्तीह्येव A pr. m.; D und F; वेदिमुपोषधीह्येव A sec. m.; वेदिमुपोषधीदेव E.

निरवदायानृणो भूत्वा स्वर्गं लोकमेति' विश्वलोप वि-श्वदावस्य वासञ्जुहोमीत्याह होतादा[1]' यजमानस्यापरा-भावाय' यदु मिश्रमिव चरत्यञ्जलिना सक्तून्प्रदाव्ये जुहु-यादेष ह वा अग्निर्वैश्वानरो यत्प्रदाव्यः' स्वस्यामेवैनं तच्योन्यां सादयति' ॥ ८ ॥

अङ्कां विधान्यामेकाष्टकायामपूपं[2] चतुःशरावं पक्त्वा प्रातरेतेन कल्पमुपोषेद्यदि दह्यति पुण्यसमं भवति' यदि न दह्यति पापसमं भवत्येतेन ह स्म वा अङ्गिरसः पुरा विज्ञानेन दीर्घसत्त्रमुपयन्ति[3]' यो ह वा उपद्रष्टारमुपश्रो-तारमनुख्यातारमेव विद्वान्यजते सममुष्मिंल्लोक इष्टापूर्तेन गच्छते' ऽग्निर्वा उपद्रष्टा' वायुर्वा उपश्रोतादित्यो[4] वा अनुख्याता' तान्य[5] एवं[5] विद्वान्यजते सममुष्मिंल्लोक इष्टापूर्तेन गच्छते' ऽयं नो नभसस्पतिरित्याहाग्निर्वै नभ-सस्पतिरग्निमेव तदाह्वैतं नो गोपायेति[6]' स त्वं नो नभ-सस्पतिरित्याह[7]' वायुर्वै नभसस्पतिर्वायुमेव तदाह्वैतं नो गोपायेति[8]' देव संस्पानेत्याहादित्यो[9] वै देवः संस्पान' आदित्यमेव तदाह्वैतं नो गोपायेत्ययं ते योनिरित्यरण्यो-

---

1) ? ? korrupt; 2) विधायान्यामेका° D; 3) दिर्घ° D; 4) उपश्रोता आदि° A sec. m. und D; 5) तान्येवं D; 6) गोपयेति A, D und E; 7) नभसं पति° E; 8) गोपायति D; 9) सस्पाने° F.

रग्निं[1] समारोपयेत्तंदाकुर्यदरण्योः समाहृतो नश्येदुदस्या-
ग्निः[2] सीदित्पुनराधेयः स्यादिति' या ते अग्ने[3] यज्ञिया
तनूस्तया मे क्यारोह[4] तया मे क्याविशायं[5] ते यो-
निरित्यात्मन्नग्नीन्समारोपयेदेष[6] ह वा अग्नेर्योनिः[7]'
स्वस्यामेवैनं[8] तच्योन्यां सादयति' ॥ १ ॥

यो ह वा अग्निष्टोमं[9] साङ्गं[10] वेदाग्निष्टोमस्य साङ्गस्य
सायुज्यं सलोकतामश्नुते य एवं[11] वेद' यो ह वा एष
तपत्येषो ऽग्निष्टोम एष साङ्गस्तं सहैवाङ्गा संस्थापयेयुः'
साङ्गो वै नामैष' तेनासंवरमाणाश्चरेयुर्यद्ध वा इदं पूर्व-
योः सवनयोरसंवरमाणाश्चरन्ति तस्माद्धिदं[12] प्राच्यो ग्रा-
मता बकुलाविष्टा' अथ यद्धिदं[13] तृतीयसवने संवरमा-
णाश्चरन्ति तस्माद्धिदं[14] प्रत्यञ्चि[14] दीर्घारण्यानि भवन्ति'
यथैव प्रातःसवन एवं माध्यंदिने[15] सवन[16] एवं तृतीय-
सवन' एवमु ह यजमानो ऽप्रमायुको भवति' तेनासंवर-
माणाश्चरेयुर्यदा वा एष प्रातरुदेत्यथ मन्द्रतमं तपति'

---

1) °योरग्नीन् A pr. m. und D; 2) °दस्याग्निं D und F; °दस्याग्नी A pr. m.; 3) अग्नेः A, D und F; अग्नि E; 4) त्वारोह A; 5) क्षाविशा अयं D; 6) °ग्नीत्समारो° E; °ग्निंसमारो° A sec. m. F; 7) अग्निर्योनिः A, E und F; 8) स्वदयामेवैनं E; 9) °ष्टोम F; 10) साङ् F; 11) एव E; 12) So corr.; तस्माद्वेद् तं A, E und F; तस्माद्वेदत्तं A sec. m. und D; 13) So corr.; die hss. यद्वेदं; 14) So corr.; die hss. प्रत्यञ्चेद्; 15) So corr.; die hss. °दिनं; 16) सवनं D.

तस्मान्मन्द्रतमया वाचा प्रातःसवने शंसेद्यथ यदाभ्येत्यथ बलीयस्तपति ' तस्माद्बलीयस्या वाचा माध्यंदिने सवने शंसेद्यो यदाभितरामित्यथ बलिष्ठतमं[1] तपति ' तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेदेवं[2] शंसेद्यदि वाच ईशीत[3] ' वाग्घि शस्त्रं ' यया तु[4] वचोत्तरिण्योत्तरिण्यो-त्संहेत[5] समापनाय[6] तया[7] प्रतिपद्येतैतत्सुशस्ततरमिव भवति ' स वा एष न कदाचनास्तमयति नोद्यति ' तद्यदेनं[8] पश्चादस्तमयतीति[9] मन्यन्ते ऽह्न एव तदन्तं[10] गत्वाथात्मानं विपर्यस्यते ' ऽह्नेवाधस्तात्कृणुते रात्रीं परस्तात्स वा एष न कदाचनास्तमयति नोद्यति ' तद्यदेनं पुरस्तादुद्यतीति मन्यन्ते रात्रेरेव[11] तदन्तं गत्वाथात्मानं विपर्यस्यते ' रात्रिमेवाधस्तात्कृणुते ऽह्नः परस्तात्स वा एष न कदाचनास्तमयति नोद्यति[12] ' न ह[13] वै कदाचन[14] निम्रुचत्येतस्य[15] ह सायुज्यं सलोकतामश्नुते य एवं वेद '

॥ १० ॥

---

1) बलीष्टतमं D; 2) Fehlt in A und D; 3) So corr.; ईश्नन्त A pr. m., D, E und F; ईश्नत A sec. m.; 4) नु A, D und F; 5) So corr.; die hss. °त्सहेदा; वाचोत्तरण्योत्तरण्या° E und D; 6) समापना F; 7) तवा E; 8) तद्यदेन A pr. m. und F; 9) पश्चादस्मन° A; 10) तदन्तं D; 11) रात्रिरेव D und E; 12) नोदेति E; 13) है A sec. m.; 14) कदाचनं A pr. m. und E; 15) So corr.; die hss. निम्रोचत्येतत्स; ed. B. Ind. निम्लोचत्येतत्स.

अथात एकाहस्यैव तृतीयसवनं ' देवासुरा वा एषु लोकेषु समयतत्त ' ते[1] देवा असुरानभ्यजयंस्तें जिता अहोरात्रयोः संधिं समभ्यवागुः[2] ' स हेन्द्र[3] उवाचेमे वा[4] असुरा[4] अहोरात्रयोः संधिं[5] समभ्यवागुः ' कश्चाहं चेमानसुरानभ्युत्थास्यामहा इत्यंहं चेत्यग्निरब्रवीदंहं चेति वरुणो ' ऽहं चेति[6] बृहस्पतिरंहं चेति विष्णुस्तानभ्युत्थायाहोरात्रयोः[7] संधेर्निर्जघुर्यदभ्युत्थायाहोरात्रयोः संधेर्निर्जघुस्तस्माडुत्था[8] ' अभ्युत्थाय[9] ह वै द्विषन्तं भ्रातृव्यं[10] निर्हन्ति य एवं वेद ' सो ऽग्निरश्वो भूत्वा प्रथमः प्राजिगाय[11] ' यदग्निरश्वो भूत्वा प्रथमः प्राजिगाय[12] तस्मादाग्नेयीभिरुक्थानि प्रणायन्ति ' यदग्निरश्वो भूत्वा प्रथमः प्राजिगाय[11] तस्मात्साकमश्वं[13] ' यत्यञ्च देवता अभ्युत्तस्थुस्तस्मात्यञ्च[14] देवता उक्थे[15] शस्यन्ते[16] ' या वाकसो ऽग्निर्यः प्राणः स वरुणो ' यन्मनः स इन्द्रो ' यच्चक्षुः स बृहस्पतिर्यच्छ्रोत्रं स विष्णुरेंते ह वा एतान्यञ्चभिः प्राणैः समीर्युदस्थापयंस्तंस्माडु[17] एवैताः पञ्च देवता[18] उक्थे शस्यन्ते ' ॥ ११ ॥

---

1) ता A pr. m.; 2) ? ?; vielleicht समभ्यवेयुः 3) हेन्द्रं E und F; 4) वासुरा E; 5) संधि D; 6) Fehlt in F; 7) °भ्युत्थाया अहो° D; 8) ? ? E °दुह्या; vielleicht °दुक्था? 9) अभ्युह्याय E; 10) भ्रातृव्य A und F; 11) प्रजीगाय E; 12) प्रजगाय D; प्रजीगाय E; 13) °कामञ्चं E; 14) अभ्यतस्थु° E; 15) उक्थ D; 16) शस्यते A pr. m.; 17) So corr.; die hss. समीर्योत्थाप°; 18) देवतां A sec. m. und D.

प्रजापतिर्ह्वै तेभ्यः पञ्चभ्यः प्राणेभ्यो ऽन्यान्देवान्ससृजे[1] यद्व चेदं[2] किं च पाङ्क्तं तत्सृष्ट्वा व्याऽवलयत्ते[3] ह्रोचुर्देवा[4] ह्लानो ऽयं पितामयो[5] ऽभूः[5]' पुनरिमं समीर्यीत्यापयामेति[6]' स ह सत्वमाप्यायाभ्युपतिष्ठते[7]' यदि ह वा अपि निर्णिक्तस्यैव कुलस्य संध्युक्षेण[8] यजते सत्वं[9] हैवाप्यायाभ्युपतिष्ठते[10]' यो वै प्रजापतिः स यज्ञः' स एतैरेव पञ्चभिः प्राणैः समीर्यीत्थापितो' ये ह वा एनं पञ्चभिः प्राणैः समीर्यीत्थापयंस्ता ऽ एवैताः पञ्च देवता[11] उक्थे शस्यन्ते' ॥ १२ ॥

तदाङ्कुर्यद्धयोर्देवतयो[12] स्तुवत इन्द्राग्न्योरित्यथ कस्माद्भूयिष्ठो[13] देवता उक्थे शस्यत इत्यंन्तो वा आग्निमारुतमन्तरुक्थान्यन्त[14] आश्विनं[15]' कनीयसीषु देवतासु स्तुवते[16] तिष्ठित्यंथ[17] कस्माद्भूयिष्ठो[18] देवता उक्थे श-

---

1) ऽन्यान् fehlt in E; °वान्सृजे F; 2) So ed. B. Ind.; die hss. वेदं; 3) ? ? vielleicht व्यहलन्त; D व्यालयते; F व्याहलयन्त; 4) °र्देवान् A und F; 5) ? ? vielleicht पितामहो ऽभूत्; 6) °यामीति A, E und F; 7) ? ? vielleicht °ध्युपातिष्ठत; F °भुपगम्यति; 8) Corrupt; संध्युक्षेणं A und F; सध्युक्षेण D; 9) So ed. B. Ind.; die hss. सत्वं; 10) °तिष्ठन्ते A pr. m.; 11) देव E; 12) So corr.; die hss. तदाहुर्यद्वयो° E; 13) °यिष्ठा ? ?; 14) अग्निमा° D; ? ? vielleicht °तमन्त उक्थान्यन्त; 15) अश्विनं D; 16) So corr.; स्तुवन्ते A pr. m. und E; ष्तुवन्ते A sec. m. und D; स्तवते E; 17) ? ? vielleicht ऽन्तेष्वित्यथ; 18) ? ? °ष्ठा.

स्यन्त इति ' द्वे द्वे उक्थमुखे[1] भवतस्तांय्यद्धे[2] द्वे ' ॥ १३ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणास्योक्थं भवत्यैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन[3] उक्थं भवत्यैन्द्राविष्णावमच्छावाकस्योक्थं भवति द्वे संशस्यंस्त[4] ऐन्द्रं च वारुणं[5] चैकमैद्रावारुणं[6] भवति[7] ' द्वे संशस्यंस्त ऐन्द्रं च बार्हस्पत्यं चैकमैन्द्राबार्हस्पत्यं भवति ' द्वे संशस्यंस्त ऐन्द्रं च वैष्णावं चैकमैन्द्राविष्णावं भवति ' द्वे द्वे उक्थमुखे भवतस्तांय्यद्धे द्वे ' ॥ १४ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणास्योक्थं भवतीन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मध्वं[8] धृतव्रताविति यृचाभ्यनूक्तं ' मद्वद्धि तृतीयसवनमैक्षू[9] षु ब्रवाणि त[10] आग्निरगामि[10] भारत इति मैत्रावरुणास्य[11] स्तोत्रियानुरूपौ ' चर्षणीधृतं मघवानमुक्थ्यमित्युक्थमुखं[12] ' तस्योपरिष्टाद्ब्राह्मणमंस्तभ्नाद्यामसुरो[13] विश्ववेदा[14] इति वारुणं सांशंसिकमंहं चेति वरुणो[15] ऽब्रवीद्देवतयोः संशं-

---

1) उक्थे मुखे D; 2) So corr.; die hss. °स्तयद्धे; 3) ब्राह्माच्छंसिन A, D und F; 4) ?? viell. संप्रस्तव्ये; संप्रस्यं D; प्रंसयं E; 5) वरुणं D; 6) °वरुणं D; 7) भवन्ति D; 8) मधं A sec. m.; मध्यं A pr. m.; 9) °सवनं मक्षं D; °मेक्षु F; 10) ताग्निरगामि A pr. m.; 11) °रुणास्या A pr. m.; 12) मघवानमुक्थ्यमि° A; °मुक्षामि E; 13) So corr.; die hss. °भ्नाद्यामसुरो; 14) विश्वे देवा E; 15) वरुणो E.

सायानतिशंसायेन्द्रावरुणा[1] युवमध्वराय न इति पर्यास ऐन्द्रावरुणे ' ऐन्द्रावरुणमस्यैतन्नित्यमुक्थं ' तदेतत्स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति ' द्वन्द्वं वा एता देवता भूत्वा व्यजायन्त ' विजित्या एवाऽयो द्वन्द्वस्यैव[2] मिथुनस्य प्रजात्यै ' सैकपादिनी[3] भवत्येकपादिन्या[4] क्रोता परिदधाति ' यत्र क्रोतुक्रैत्रिकाणां[5] युञ्जन्ति तत्समृद्धं ' तद्धि खल्वावां राजानावध्वरे[6] ववृत्यामित्येवमेव केवलपर्यासं कुर्यात्केवलसूक्तं ' केवलसूक्तमेवोत्तरयोर्भवतीन्द्रावरुणा मधुमत्तमस्येति यजत्येते[7] एव तद्देवते यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[8] नाप्याययन्ति ' न क्वनाराशंसाः सीदन्ति ' ॥ १५ ॥

अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं[9] भवतीन्द्रश्च सोमं पिबतं बृहस्पते ऽस्मिन्यज्ञे मन्दसाना[10] वृषणवसू इत्यृचाभ्यनूक्तं ' मद्धि तृतीयसवनं ' वयमु त्वामपूर्व्य यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन[11] स्तोत्रियानुष्टुपौ ' प्र मंहिष्ठाय बृहते बृहद्रय[12] इत्युक्थमुखमै-

---

1) संशंसायानिति° D; 2) द्वन्द्वं स्यैव D; 3) ?? viell. °तिनी; 4) ?? viell. °तिन्या; D भवत्यैक°; 5) °त्रकाणा F; 6) राज्ञानानध्वरे A; राज्ञानामध्वरे E; राज्ञानामध्वर D; 7) यजत्येत A pr. m.; E und F; 8) प्रत्यवाभि° D; 9) उक्थां A pr. m.; 10) मन्दसामाना E; 11) ब्रह्मणाच्छंसिन D; 12) बृहद्रय F.

न्द्राऽऽगतं[1] ' ऽऽगताः पशवः ' पशूनामाप्त्यै ' ऽऽगतमु वै तृतीयसवनं ' तृतीयसवनस्य रूपमुद्प्रुतो[2] न वयो रक्षमाणा इति बार्हस्पत्यं सांशंसिकमंकं[3] चेति बृहस्पतिरब्रवीद्दैवतयोः संशंसायानतिशंसायाच्छा[4] म इन्द्रं मतयः स्वर्विद[5] इति पर्यास ऐन्द्राबार्हस्पत्य[6] ' ऐन्द्राबार्हस्पत्यमस्यैतन्नित्यमुक्थं[7] ' तदेतत्स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति ' द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त[8] ' विजित्या एवाथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै[9] ' बृहस्पतिर्नः परिपातु पश्चादित्यैन्द्राबार्हस्पत्या परिदधातीन्द्राबृहस्पत्योरिव यज्ञं प्रतिष्ठापयत्युतोत्तरस्माद्धराद्घायोरिन्द्रः[10] पुरस्ताद्उत मध्यतो नः सखा सख्भ्यो[11] वरिवः[12] कृणोत्विति ' सर्वाभ्य एव दिग्भ्य आशिषमाशास्ते[13] नार्वी[14] ' यं कामं कामयते सो ऽस्मै कामः समृध्यते य एवं वेद यश्चैवंविद्वान्ब्राह्मणाच्छंसेतस्या[15] परिदधाति ' बृहस्पते युवमिन्द्रश्च वस्व[16] इति यजत्येते[17] एव तद्देवते

---

1) °मैद्रं ऽऽगतं D und E; 2) रूपमुद्तो D; 3) °सिकामहं F; 4) संशंसायानिति° D; 5) स्वर्वि E; 6) °बार्हस्पत्यं A und F; 7) °त्यमुक्थ D; 8) °वन्ति A pr. m.; 9) प्रजापत्यै A pr. m.; 10) प्रतिष्ठापयत्यथोत्त° F; प्रतिष्ठापयत्युतोत्तरस्वा° D; °राद्धायोरिन्द्रः E; 11) सखिभि A; 12) वरीयः A; 13) °माशस्ते D; 14) ? ? D नार्त्वि; 15) याश्चैवं° D; 16) वस्यु D; 17) यजत्येत A und F.

यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ति[1] नाप्याययन्ति[2] ' न क्वनाराशंसाः सीदन्ति[3] ' ॥ १६ ॥

अथ यदैन्द्राविष्णावमच्छावाकस्योक्तं भवतीन्द्राविष्णू मदपती[4] मदानामा सोमं यातं द्रविणो दधानेत्यृचाभ्यनूक्तं ' मद्धि तृतीयसवनमंधा[5] ह्यिन्द्र गिर्वण इयं त इन्द्र गिर्वण इत्यच्छावाकस्य स्तोत्रियानुरूपावृतुर्जनित्री[6] तस्या अपस्परीत्युक्थमुखं[7] ' तस्योक्तं ब्राह्मणं ' नू मतीं दयते सनिष्यन्निति वैष्णवं सांशंसिकंमंक्तं[8] चेति विष्णुरब्रवीद्देवतयोः संशंसायानतिशंसाय[9] ' सं वां कर्मणा समिषा ह्यिनोमीति पर्यास ऐन्द्राविष्णाव[10] ' ऐन्द्राविष्णावमस्यैतन्नित्यमुखं ' तदेतत्स्वस्मिन्नायतने[11] स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति[12] ' द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त ' विजित्या एवाथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या ' उभा जिग्ययुर्न पराजयेथे इत्यैन्द्राविष्णाव्यर्चा परिदधातीन्द्राविष्णोरिव[13] यज्ञं प्रतिष्ठापयतीन्द्राविष्णू पिबतं मध्वो अस्येति यजत्यैंते[14] एव तद्देवते यथाभागं प्रीणाति '

---

1) प्रत्यवाभि° D; 2) नाथाय° D und E; 3) सीदति E; 4) मदयती E; 5) So corr.; °मधाम A, E und F; °मध्यम D; 6) °तुर्नीनेत्री E; 7) अपपस्परी° A pr. m.; अपसस्परी° D; अपमस्परी° E; 8) °कमिहं D; 9) शंशंसायानिति° D; शंशंसा° E; 10) °वैष्णावं A sec. m. und E; 11) °यतेन D; 12) °पयन्ति A pr. m.; 13) परिदधान्तो° A; 14) यजत्येत A und F.

वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[1] ' नाप्याययन्ति[2] ' न क्वनाराशंसाः सीदन्ति ' ॥ १७ ॥

अथाध्वर्यो शंशंसावोमिति[3] स्तोत्रियायानुरूपायोक्थ-मुखाय[4] परिधानीयाया[5] इति चतुश्चतुराक्वयन्ते ' चतस्रो वै दिशो[6] ' दिक्षु तत्प्रतितिष्ठन्ते ' ऽथो चतुष्पादः[7] पशवः ' पशूनामाप्त्या ' अथो चतुष्पर्वाणो हि तृतीयसवने स्तोत्र-कास्तस्माच्चतुः ' सर्वे त्रैष्टुभं जागतानि[8] शंसन्ति[9] ' जागतं हि तृतीयसवनमथ क्षैतत्त्रैष्टुभान्यप्रतिभूतमिव[10] हि प्रा-तःसवने मरुत्वतीये तृतीयसवने च स्तोत्रकाणां शस्त्रं ' धीतरसं[11] वा एतत्सवनं यत्तृतीयसवनमथ क्षैतद्धीत-रसं[12] शुक्रियं स्तन्दो यत्त्रिष्टुबयातयाम[13] ' सवनस्यैव तत्सरसतायै[14] ' सर्वे समवतीभिः परिदधति ' तद्यत्समव-तीभिः परिदधत्यन्तो वै पर्यासो ऽन्त उदर्को ऽन्तः सजा-त्या[15] उ[15] ह[15] वा[15] अवैनायान्तेनैवान्तं[15] परिदधति ' सर्वे मद्वतीभिर्यजन्ति ' तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवती-भिः[16] पीतवतीभिरभिद्रूपाभिर्यजन्ति[17] ' यद्यज्ञे[18] ऽभिद्रूपं '

---

1) प्रत्यवाभि° D; 2) नाथायायन्ति D; 3) शंशावोमिति A; 4) स्तोत्रिया-नुरू° A und F; 5) परिदधा° A und F; 6) Fehlt in D; 7) चतुष्पदः F; 8) त्रगतानि D; 9) शंसति D; 10) ? ? °भूतामिव E; 11) धितरसं A pr. m.; वीतरसं A sec. m. und E; वितरसं D; 12) °धितरसं A pr. m.; 13) So corr.; die hss. यत्त्रिष्टुभाया°; 14) So corr.; die hss. तत्सरस्वतायै; 15) Korrupt; 16) सूतव° A sec. m.; 17) अभिः fehlt in D; 18) विद्यतज्ञे A pr. m.; यदि F.

तत्समृद्धं ' सर्वे ज्नुवषट्कुर्वन्ति ' स्विष्टकृत्वानुवषट्कारो [1] ' नेत्स्विष्टकृत अन्तरयामित्यंसौ [2] वै लोकस्तृतीयसवनं ' तस्य पञ्च दिशः ' पञ्चोक्थानि तृतीयसवनस्य ' स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोति ' तद्यदेषां लोकानां रूपं या मात्रा तेन रूपेण तया मात्रयेमांल्लोकानृध्नोतीमांल्लोकान्नृध्नोतीति [3] ' ॥ १८ ॥

तदाहुः किं षोडशिनः षोडशित्वं [4] ' षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरहरादत्ते [5] ' द्वे [6] वा अहरे अतिरिच्येते षोडशिनो ज्नुष्टुभमभिसंपन्नस्य ' वाचो वा एतौ स्तनौ ' सत्यानृते वाव ते ' अवत्येनं [7] सत्यं नैनमनृतं [8] हिनस्ति य एवं वेद य [9] एवं [9] वेद [9] ' ॥ १९ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे चतुर्थः प्रपाठकः ॥

ओमकुर्वै देवा आश्रयन्त [10] रात्रीमसुरास्ते [11] समावद्वीर्या एवासन्नो व्यावर्तन्त ' सो ज्ब्रवीदिन्द्रः कश्चाहं चेमा-

---

1) Bibl. Ind. स्विष्टकृत्वा अनु°; 2) die hss. °ष्टवतमन्त°; 3) So corr.; die hss. मात्रावे°; 4) षोडशीत्वं A pr. m.; 5) षोडशीभि° E; 6) So corr.; die hss. ते; 7) So corr.; die hss. अवत्यैनं; 8) नैतमनृतं A sec. m. und D; 9) Fehlt in E und F; 10) आश्राम्यन्त E; 11) रात्रीस° E.

नसुरात्रात्रीमन्ववैष्यामह[1] इति 'स देवेषु न[2] प्रत्यविन्ददं बिभयू रात्रेस्तमसो मृत्योस्तम इव[3] हि रात्रिर्मृत्युर्वै तमस्तस्माद्वाप्येतर्हि भूयानिव नक्तं स यावन्मात्रमिवापक्रम्य[4] बिभेति' तं वै छन्दांस्येवान्ववायंस्तं यच्छन्दांस्येवान्ववायंस्तस्मादिन्द्रश्च[5] छन्दांसि च रात्रिं वक्ति' न निविच्छस्यते न पुरोरुङ्न[6] धाय्या नान्या देवता' इन्द्रश्च[7] क्येव छन्दांसि च रात्रिं वक्ति' तान्वै पर्यायैः पर्यायमनुदत्त' यत्पर्यायैः पर्यायमनुदत्त तस्मात्पर्यायास्तं त्पर्यायाणां पर्यायत्वं' तान्वै प्रथमैरेव पर्यायैः पूर्वरात्रादनुदत्त मध्यमैर्मध्यरात्रादुत्तमैरपररात्रादपि शर्वर्या अपिस्मसीत्यब्रुवंस्तं यदपि शर्वर्या अपिस्मसीत्यब्रुवंस्तदपिशर्वराणामपिशर्वरत्वं' शर्वराणि खलु वै वा अस्यैतानि छन्दांसीति ह स्माहैतानि ह वा इन्द्रं रात्र्यास्तमसो मृत्योरभिपत्यावारयंस्तं दपिशर्वराणामपिशर्वरत्वम्' ॥ १ ॥

प्रथमेषु पर्यायेषु स्तुवते प्रथमान्येव पदानि पुनरादद्दते' यदेवैषां मनोरथा आसंस्तदेवैषां तेनाददते[8]' मध्यमेषु पर्यायेषु स्तुवते मध्यमान्येव पदानि पुनरादद्दते' यदेवैषा-

---

1) °न्ववैष्याम्यहा A sec. m. die hss. °महा; 2) नः D; 3) स व D;
4) So corr.; die hss. °प्रक्रम्य; 5) So corr.; die hss. °दिन्द्रस्य;
6) पुरोरुङ् A pr. m.; D, E und F; 7) So corr.; die hss. इन्द्रस्य;
8) तेनाद्धाते A pr. m. und E.

मश्वा गाव आसंस्तदेवैषां तेनाददत ' उत्तमेषु पर्यायेषु स्तुवत[1] उत्तमान्येव पदानि पुनराददते ' यदेवैषां वासो हिरण्यं[2] मणिरध्यात्ममासीत्तदेवैषां[3] तेनाददत ' आ द्विषतो वसु दत्ते निरेवैनमेभ्यः[4] सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद ' ॥ २ ॥

पवमानवदृक्रित्याङ्कुर्न रात्रिः पवमानवती ' कथमुभे पवमानवती भवतः ' केन ते समावद्वाजौ भवत[5] इति ' यदेवेन्द्राय मद्वने सुतमिदं वसो सुतमन्ध इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति[6] च तेन[7] रात्रिः पवमानवती ' तेनोभे पवमानवती भवतस्तेन ते समावद्वाजौ भवतः ' पञ्चदशस्तोत्रमृक्रित्याङ्कुर्न रात्रिः पञ्चदशस्तोत्रा ' कथमुभे पञ्चदशस्तोत्रे भवतः ' केन ते समावद्वाजौ भवत इति ' द्वादश स्तोत्राण्यपिशर्वराणि ' तिसृभिर्देवताभिः संधिना रायंतरेणाश्विनाय स्तुवते ' तेन[7] रात्रिः पञ्चदशस्तोत्रा[8] ' तेनोभे पञ्चदशस्तोत्रे भवतस्तेन ते समावद्वाजौ भवतः ' परिमितं स्तुवन्त्यपरिमितमनुशंसन्ति ' परिमितं भूतमपरिमितं भव्यमपरिमितान्येवावरुन्ध्यादित्यतिशंसति[9]

---

1) स्तुवन्ते A und F; 2) हिरण्य A sec. m. und D; 3) °मासीत तदेवैषां D; 4) निरेवैनामेभ्यः A pr. m.; 5) भावत E; 6) शंसति D; 7) तेना D; 8) °स्तोत्रां F; 9) °तिशंसन्ति A und F.

स्तोममिति वै प्रजास्यात्मानमिति पशवस्तंय्यदेवास्यात्मानं तदेवास्यैतेनाप्याययत्यंयो[1] द्वयं वा इदं सर्वं स्नेक्श्चैव तेजश्चांय[2] तदक्तोरात्राभ्यामाप्तं[3] 'स्नेक्तेजसोरात्यै' गायत्रान्स्तोत्रियानुरूपाञ्छंसन्ति[4] 'तेजो वै गायत्री 'तमः पाप्मा रात्रिस्तेन तेजसा तमः पाप्मानं तरन्ति 'पुनरादायं[5] शंसत्यैवं[6] हि सामगा स्तुवते 'यथा स्तुतमनुशस्तं[7] भवति' न हि तत्स्तुतं[8] यन्नानुशस्तं 'तदाहुरथ कस्मादुत्तमात्प्रतीहारादाक्रय साम्ना शस्त्रमुपसंतन्वन्तीति[9]' ॥ ३ ॥

पुरुषो वै यज्ञस्तंस्य शिर एव क्विर्धानं[10]' मुखमाक्वनीय' उदरं सदो' ञ्नमुक्थानि[11]' बाहू[12] मार्जालीयश्चाग्नीध्रीयश्च[13]' या इमा देवतास्ते ञ्तःसदसं[14] धिष्ण्याः' प्रतिष्ठे गार्हपत्यव्रतश्रपणावित्यधापरं[15]' तस्य मन एव ब्रह्मा' प्राण उद्गातांपानः प्रस्तोता' व्यानः प्रतिक्र्ता' वाग्घोता' चक्षुरध्वर्युः' प्रजातिः[16] सदस्यो' ञ्ङानि क्षोत्राशंसिन' आत्मा यजमानस्तंय्यदध्वर्युः स्तोत्रमुपाकरोति

---

1) ? ? °वयत्यथो ?; 2) So corr.; die hss. तत्तेजश्च°; 3) So corr.; die hss. °ध्यामाप्यं; 4) Die hss. यायत्रीं; A, D und F स्तोत्रियानुरूपं; °सते D und E; 5) पुनरादाय A pr. m. und F; 6) शंसति D; 7) शांस्तं E; शंस्तं F; 8) त स्तुतं D; तत स्तुतं E; 9) °तन्वतीति D; °तन्वीति F; 10) हविर्धान F; 11) So corr. nach K. Br. XVII 7, Z. 6; die hss. ञ्नतक्थानि; 12) बहू D; 13) मार्ज्जालीयश्चा A, E und F; 14) ञ्नसदसं D; 15) °व्रतलपणा° A, E und F; 16) So corr. nach K. Br. XVII 7, Z. 9; die hss. प्रजापतिः.

सोमः पवत इति चक्षुरेव तत्प्राणैः संदधात्यथ[1] यत्प्रस्तोता ब्रह्माणमामन्त्रयते ब्रह्मन्स्तोष्यामः प्रशास्तरिति मनो ऽग्रणीर्भवत्येतेषां[2] प्राणानां मनसा हि[3] प्रसूता[4] स्तोमिन स्तुयामिति' प्राणानेव तन्मनसा संदधात्यथ[5] यद्ब्रह्मा स्तुतेत्युच्चैरनुजानाति मनो वै ब्रह्मा' मन एव तत्प्राणैः संदधात्यथ यत्प्रस्तोता प्रस्तौत्यपानमेव तत्प्राणैः संदधात्यथ यत्प्रतिहर्ता प्रतिहरति व्यानमेव तदपानैः संदधात्यथ यदुद्गातोद्गायति समानमेव तत्प्राणैः संदधात्यथ यद्धोता साम्ना शस्त्रमुपसंतनोति वाग्वै होता वाचमेव तत्प्राणैः संदधात्यथ[5] यत्सदस्यो ब्रह्माणमुपासीदति प्रजातिर्वै[6] सदस्यः प्रजातिमेवाप्नोत्यथ[7] यद्धोत्राशंसिनः सामसंततिं[8] कुर्वन्त्यङ्गानि वै होत्राशंसिनो ऽङ्गान्येवास्य तत्प्राणैः संदधात्यथ यद्यजमानः स्तोत्रमुपासीदत्यात्मा वै यजमान आत्मानमेवास्य तत्कल्पयति' तस्मान्नैनं बहिर्वेद्यभ्याश्रावयेन्नाभ्युदियान्नाभ्यस्तमियान्नाधिषवणे[9] प्रतपेन्नैत्प्राणेभ्य आत्मानमन्तरगादिति[10]' ॥ ४ ॥

---

1) °संदध° D; 2) गुणी° A sec. m.; गृणी° A pr. m.; 3) ?? om. ?; 4) प्रसृता D; 5) संदध्यत्यथ D; 6) So corr.; die hss. प्रजापतिर्वै; 7) So corr.; die hss. प्रजापतिमेवा°; 8) So corr.; die hss. सामं संतति; A pr. m. सामं संतंनी; 9) So corr.; A pr. m. und D बर्हिवे°; A sec. m., E und F बर्हिर्वे°; 10) °मन्तरगादिति A pr. m.

प्रथमेषु पर्यायेषु स्तुवते प्रथमेषु पदेषु निनर्दयन्ति[1] प्रथमरात्रादेव तदसुरान्निर्घ्नन्ति[2] ' मध्यमेषु पर्यायेषु स्तुवते मध्यमेषु पदेषु[3] निनर्दयन्ति ' मध्यमरात्रादेव तदसुरान्निर्घ्नन्त्युत्तमेषु[4] पर्यायेषु स्तुवत उत्तमेषु पदेषु निनर्दयन्त्युत्तमरात्रादेव तदसुरान्निर्घ्नन्ति[4] ' तद्यथाभ्यागारं[5] पुनः पुनः[3] पाप्मानं निर्हरन्त्येवमेवैतत्स्तोत्रियानुरूपाभ्यामहोरात्राभ्यामेव तदसुरान्निर्घ्नन्ति[6] ' गायत्रीं[7] शंसन्ति[8] ' तेजो वै[9] ब्रह्मवर्चसं गायत्री ' तेज एवास्मै तद्ब्रह्मवर्चसं यजमाने दधति ' गायत्रीः[10] शस्त्वा जगतीः[11] शंसन्ति[12] ' ब्रह्म क्षत्रं वै जगती ' ब्रह्मणैवास्मै तद्ब्रह्मवर्चसं यजमाने दधति ' व्याद्धयन्ते गायत्रीश्च जगतीश्चान्तरेण ' छन्दांस्येव तन्नानावीर्याणि कुर्वन्ति ' जगतीः शस्त्वा त्रिष्टुभः शंसन्ति ' पशवो वै जगती ' पशूनेव तत्त्रिष्टुब्भिः[13] परिदधति ' बलं वै वीर्यं त्रिष्टुब्बलमेव[14] तद्वीर्यं जनयतः प्रतिष्ठापयत्यन्धस्वत्यो मद्वत्यः[15] सुतवत्यः पीतवत्यस्त्रिष्टुभो याज्याः समृद्धाः सु-

---

1) °यति D; 2) Die hss. °न्निरघन्ति; 3) Fehlt in D; 4) So corr.; die hss. °न्निरघ्न°; 5) So corr.; die hss. °ःयाधारात्; 6) Die hss. °न्निरघ्नन्ति; 7) गायत्रो: ??; 8) शंसति D; 9) Fehlt in A sec. m. und E; 10) गयत्रीं A pr. m. und F; 11) जगतीं A, D und F; 12) शंसति D; 13) So corr.; die hss. तत्त्रिष्टुभ; 14) Korrupt, man erwartet वल एव E und F; 15) मद्वन्त्य: E.

लक्षणा[1] 'एतद्वै रात्रीव्रूपं 'जागृयाद्रात्रिं[2] 'यावदु ह वै न वा स्तुवते न वा शस्यते[3] तावदीश्वरा[4] असुरा रक्षांसि च यज्ञमन्ववनयन्ति 'तस्मादाहवनीयं समिद्धमाग्नीध्रीयं[5] गार्हपत्यं धिष्ण्यान्समुञ्चलयतेति[6] भाषेरन्ञ्चलयेरन्प्रंकाशमिवैव[7] तत्स्यादारेभन्तः[7] शयीरंस्तान्ह[7] तः[8] श्रेष्ठो[8] वा[8] इति[8] पाप्मा[8] नाभिवृकणोति[8] 'ते तमः पाप्मानमपाघ्नते 'ते तमः पाप्मानमपाघ्नते' ॥ ५ ॥

विश्वरूपं वै त्वाष्ट्रमिन्द्रो[9] ऽहन्स[10] त्वष्टा हतपुत्रो ऽभिचरणीयमपेन्द्रं सोममाहरत्तंस्येन्द्रो यज्ञवेशसं[11] कृत्वा[11] प्रासहा सोममपिबत्स विघ्रङ्व्यार्हत्तंस्मात्सोमो[12] नानुपक्षतेन[13] [न[13]] पातव्यः 'सोमपीथो ऽस्य व्यर्धुको[14] भवति 'तस्य मुखात्प्रणेभ्यः श्रीर्यशांस्यूर्ध्वान्युदक्रामंस्तानि[15] पशून्प्राविशंस्तंस्मात्पशवो यशो 'यशो ह भवति य एवं वेद 'ततो ऽस्मा एतदश्विनौ च सरस्वती च यज्ञं

---

1) सुलक्षा A sec. m.; D, E und F; 2) जागृयादू° E; 3) शस्यन्ते F; 4) A und F fügen वा ein; 5) समृद्धमाग्नीध्रियं D; 6) So corr. die hss. धिष्ण्यं समु°; °समुद्धलयतेति D; °समुञ्चलयेति E; 7) So corr.; die hss. भावयेर्°; die hss. श्रमिव वै तस्यादरेभिन्नं सुवीरंस्तान्ह; 8) Korrupt; 9) त्वष्ट्र° A und F; 10) die hss. ऽहंस; 11) So corr.; die जक्षिरे स संस्कृत्वा; 12) So corr.; die hss. विष्टद्व्यर्ईत्र°; 13) Doppelte negation!; नानुपक्षूयतेन A; 14) द्वढि° A pr. m.; दृढि° A scc. m.; वृढि° D, E und F; 15) °न्यदक्रामन्नानि A und D.

समभरत्सौत्रामणिं भैषज्याय ' तयेन्द्रमभ्यषिञ्चंस्तातो[1] वै स[2] देवानां श्रेष्ठो[3] ऽभवच्छ्रेष्ठः स्वानां चान्येषां च भवति य एवं वेद यश्चैवं विद्वांत्सौत्रामण्याभिषिच्यते ' ॥ ६ ॥

अथ साम गायति ब्रह्मा ' क्षत्रं वै साम ' क्षत्रेणैवैनं तदभिषिञ्चत्यथो साम्राज्यं[4] वै साम ' साम्राज्येनैवैनं तत्साम्राज्यं गमयत्यथो सर्वेषां वा एष वेदानां[5] रसो यत्साम ' सर्वेषामेव तद्वेदानां रसेनाभिषिञ्चति ' बृहत्यां[6] गायति[7] ' बृहत्यां वा असावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठितस्तपत्यैन्द्र्यां बृहत्यां गायत्यैन्द्रो वा एष यज्ञक्रतुर्यत्सौत्रामणिरिन्द्रायतन[8] एष एतर्हि यो यजते ' स्व एवैनं तदायतने प्रीणात्यथ कस्मात्संशानानि[9] नामैतैर्वै सामभिर्दिवा इन्द्रमिन्द्रियेण वीर्येण[3] समश्यंस्तथैवैतद्यज्ञमाना[10] एतैरेव सामभिरिन्द्रियेणैव वीर्येन संश्यन्ति ' संश्रवसे[11] विश्रवसे सत्यश्रवसे श्रवस इति सामानि भवन्त्येंघ्वेवैनं लोकेषु प्रतिष्ठापयति ' चतुर्निधनं भवति ' चतस्रो वै दिशो ' दिक्षु तत्प्रतितिष्ठति ' ऽथो चतुष्पादः पशवः ' पशूनामाप्त्यै ' तदाङ्कुर्यादेतत्साम गीयते ऽथ खल्वेतस्य

---

1) तयन्द्र° F; 2) Fehlt in D und F; 3) Fehlt in D; 4) सामराज्यं E; 5) देवानां D; 6) बृहत्या E; 7) गयन्ति A pr. m.; 8) So corr.; die hss. °ैरिन्द्रायतन; 9) °त्संश्यानानि A, E und F; 10) °ज्ञमान E; 11) संश्रावासे A pr. m.

साम्न[1] ऽक्थं[1] का प्रतिष्ठा ' त्रया[2] देवा एकादशेत्या-ऽकुरैतद्वा एतस्य साम्न[1] ऽक्थमेषा[1] प्रतिष्ठा ' त्रयस्त्रिंशं[3] ग्रहं गृह्णाति ' साम्नः प्रतिष्ठायै प्रतिष्ठायै[4] ' ॥ ७ ॥

प्रजापतिरकामयत वाजमाप्नुयां[5] स्वर्गं लोकमिति[6] ' स एतं वाजपेयमपश्यद्वाजपेयो वा[7] एष य एष तपति ' वाजमेतेन यजमानः स्वर्गं[8] लोकमाप्नोति ' शुक्रवत्यो[9] ऽज्योतिष्मत्यः प्रातःसवने भवन्ति ' तेजो[10] ब्रह्मवर्चसं ताभिराप्नोति ' वाजवत्यो माध्यंदिने सवने[4] ' स्वर्गस्य लोकस्य समष्ट्या ' अन्नवत्यो गणावत्यः पशुमत्यस्तृतीयसवने भवन्ति ' भूमानं ताभिराप्नोति ' सर्वः सप्तदशो भवति[11] ' प्रजापतिर्वै सप्तदशः ' प्रजापतिमेवाप्नोति[12] ' हिरण्यस्रज ऋत्विजो भवन्ति ' महस[13] एव तद्रूपं क्रियत ' एष मे ऽमुष्मिंल्लोके प्रकाशो[14] ऽसदिति ' ज्योतिर्वै हिरण्यं[15] ' ज्योतिषैवैनमत्तर्दधत्यांसिं[16] धावन्ति ' यजमानमुज्ञापयन्ति[17] ' नाकं[18] रोहति समहसे[19] रोहति[20] विश्वमहसे

---

1) So corr.; die hss. साम्नमुक्थं; 2) त्रयो A pr. m.; 3) त्रयस्त्रिंश E; 4) Fehlt in D; 5) So corr.; die hss. °पयात्; 6) So corr.; die hss. लोकमेति; 7) Fehlt in F; 8) स्वर्गे E; 9) °वत्यौ E; 10) Von तेजो bis भूमा° fehlt in F; 11) So corr.; die hss. भवन्ति; 12) प्राजाप° D; 13) महत्स A sec. m.; महत्य F; 14) प्रशाको F; 15) हिरण्य D; 16) °दधात्यांसिं F; 17) °पवति D; 18) So corr. नाके A, E und F; नाक D; 19) Fehlt in E und F; P. Br. सहसे; 20) Fehlt in E und F.

रोहति सर्वमहसे रोहति ' मनुष्यलोकादेवैनमन्तर्दधति ' देवस्य सवितुः सवे[1] स्वर्गं लोकं वर्षिष्ठं नाकं रोहेय-मिति[2] ब्रह्मा रथचक्रं सर्पति[3] ' सवितृप्रसूत एवैनं तत्सर्पत्यंथो[4] प्रजापतिर्वै ब्रह्मा ' प्रजापतिमेवैनं वज्रादधि-प्रसुवति[5] ' नाकस्योज्जित्यै ' वाजिनां संतत्यै ' वाजिसामा-भिगायति ' वाजिमान्भवति ' वाजो वै स्वर्गो[6] लोकः ' स्वर्गमिव तल्लोकं रोहति[7] ' विष्णोः शिपिविष्टवतीषु बृहदुक्तमं भवति ' स्वर्गमिव तल्लोकं दृढ्वा ब्रध्नस्य विष्टपमतिक्रामत्यतिक्रामति ' ॥ ८ ॥

अथातो ऽस्तोर्यामा ' प्रजापतिर्वै यत्प्रजा असृजत ता वै तान्ता[8] असृजत ' ताः सृष्टाः पराच्य एवासन्नोपावर्तन्त[9] ' ता एकेन स्तोमेनोपागृह्णात्तां अत्यरिच्यन्त[10] ' ता द्वाभ्यां ' ताः सर्वैस्तांस्मात्सर्वस्तोमस्तां एकेन पृष्ठेनोपागृह्णात्तां अत्यरिच्यन्त ' ता द्वाभ्यां ' ताः सर्वैस्तांस्मात्सर्वपृष्ठस्तां[11] अतिरिक्तोक्थे वारवन्तीयेनावारयंस्तांस्मादेषो[12]

---

1) So corr.; सवं A, D und F; सर्वे E; 2) रुहेयमिति A pr. m.; रोहमिति F; 3) समर्पयति A sec. m. und E; 4) तत्समर्पयत्यथो A, E und F; 5) °सूवति A pr. m.; E und F; °श्रुवति D; 6) D fügt वै ein; 7) Von रोहति bis दृढ्वा fehlt in F; 8) ताता F; 9) °न्नोव्यावर्तन्त D; 10) अतिरिच्यन्त D; 11) So corr.; die hss. °र्वस्पृढस्ता; 12) ? wschl. °वारयत्तस्मादेषो.

ऽतिरिक्तोक्थवान्भवति[1] ' तस्माद्धारवन्तीयं ' ता यद्दात्वा-यच्छ्दतो[2] वा ग्रस्तोर्यामांथो[3] प्रजा वा[4] ग्रस्तुरित्याहुः[4] ' प्रजानां यमन[5] इति[6] ह्येवैतदुक्तं[7] ता[8] बर्हिः[8] प्रजा-श्चायिरंस्तार्हि[8] ह्येतेन यजते ' स एषो ऽष्टापृष्ठो भवति ' तद्यथान्यस्मिन्यज्ञे विश्वजितः[9] पृष्ठमनु[10] संचरं भवति कथमेतदेवमत्रेति[11] ' पितेष[8] यज्ञानां ' तद्यथा श्रेष्ठिनि[12] संवशेयुरपि विद्विषाणा एवमेवैतच्छ्रेष्ठिनो वशेयान्नमन्न-स्यानुचर्याय[13] ह्नमन्ते ' ॥ ६ ॥

तद्यथैवादो ऽङ्क उक्थानामाग्नेयं[14] प्रथमं भवत्येवमे-वैतदत्राप्याग्नेयं प्रथमं भवत्यैन्द्रे वाव तत्रोत्तरे[15] ' ऐन्द्रे वा एते ' ऐन्द्राविष्णावमच्छावाकस्योक्थं[16] भवति ' चतु-राच्छावान्यतिरिक्तोक्थानि[17] भवन्ति ' पशवो वा उक्थानि ' चतुष्टया वै पशवो ' ऽयो चतुष्पादः पशवः ' पशूनामाप्त्यै ' त एते स्तोत्रियानुरूपास्तृचा अर्धर्चशस्याः[18] ' प्रतिष्ठा वा अर्धर्चः[19] ' प्रतिष्ठित्या एवा'थैतेषामेवाग्निनानां सूक्तानां

---

1) °वन्ति E; 2) So corr.; die hss. यदाप्ना°; 3) So corr.; die hss. °र्यामा अथो; 4) So corr.; वापुरिति A; वापुरिति E; वापुरिति F; 5) यज्ञामन F; 6) इती A und E; 7) °तदुक्त A und F; 8) ??; 9) द्विश्रुति E; 10) पृष्ट्यमनु E; 11) °वमित्रेति D; 12) श्रेष्ठनि D; 13) ?? संशेयान्न° D; 14) उक्थांनाग्नेयं D; 15) तत्रोत्तर A und F; 16) °स्योक्तं D; 17) °क्तोक्तानि D; 18) °र्चशस्य E; 19) So corr.; die hss. वार्धर्चः.

द्वे द्वे समाहावमेकैकमहरहः शंसत्यश्विनौ[1] वै देवानां भिषजौ । तस्मादाश्विनानि सूक्तानि शंसति[2] । तदश्विभ्यां प्रदुरिदं भिषज्यतमिति । क्षैत्रपत्याः[3] परिधानीया भवन्ति । यत्र ह तस्तत्प्रजा[4] अशनायन्तीः पिपासन्तीः[5] संरुद्धा स्थिता आसंस्ता दीना एताभिर्यथाक्षेत्रं[6] पायया चकार तर्पयां चकारेत्थो इयं वै क्षेत्रं पृथिव्यस्यामदीनायामस्ततः प्रतिष्ठास्यामह इति । त्रिष्टुभो याज्या भवन्ति[7] । यत्र ह तस्तत्प्रजा[4] अशनायन्तीः पिपासन्तीः[8] संरुद्धा स्थिता बभूवुस्ता ह्यैवैना एताभिर्यथौकसं व्यवसाययां[9] चकार । तस्मादिता याज्या भवन्ति तस्मादिता[10] याज्या[10] भवन्ति[10] ॥ १० ॥

अथतो ऽनैकाह्निकं । यस्तोत्रियमन्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवने । ऽहीनमेव तत्संतन्वन्त्यंहीनस्य संतत्यै । तद्यथा ह वा एकाहः सुत[11] एवमहीनः सुतस्तंद्यथैकाहस्य सुतस्य सवनानि संतिष्ठमानानि यन्त्येवमहीनस्य[12] सुतस्याहानि संतिष्ठमानानि यन्ति । तद्यच्छस्तो-

---

1) प्रंसत्वा° F; 2) प्रंसन्ति A und F; 3) So corr.; die hss. क्षेत्रवत्यः; 4) ??; 5) पिब्रासन्ती A, D und F; पिवासन्तीः E; 6) °क्षत्रं D; 7) भवति F; 8) So corr.; die hss. पिब्रा°; 9) व्यवसायां D; 10) Fehlt in A sec. m., D und F; 11) स्तुत A sec. m., D und F; 12) यत्येव° D.

त्रियमश्वस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवने ऽक्रेवं तदङ्को ऽनुरूपं कुर्वन्त्यपरेणैव[1] तदङ्कापरमक्रम्यारभन्ते[2] तत्तथा न माध्यंदिने सवने श्रीर्वै पृष्ठानि तानि तस्मिन्नेवावस्थितानि भवन्त्येतेनैव विधिना तृतीयसवने[3] न श्वस्तोत्रियमश्वस्तोत्रियस्यानुरूपं[4] कुर्वन्ति ॥ ११ ॥

अथात आरम्भणीया एव ऋजुनीती[5] नो वरुणा इति मैत्रावरुणस्य मित्रो नयतु विद्वानिति प्रणीता वा एष होत्रकाणां यन्मैत्रावरुणास्तस्मादेषा प्रणेत्रिमती[6] भवतीन्द्रं[7] वो विश्वतस्परीति ब्राह्मणाच्छंसिनो कवामके जनेभ्य इतीन्द्रमेवैतयाक्रक्रन्निर्द्धयन्ते न हैवैषां[8] विक्वे ऽन्य इन्द्रं[9] वृङ्क्ते यत्रैवं विद्वान्ब्राह्मणाच्छंस्येतामक्रक्तः शंसति यत्सोम आ सुते[10] नर[11] इत्यच्छावाकस्येन्द्राग्नी अजोकवुरितीन्द्राग्नी एवैतयाक्रक्रन्निर्द्धयन्ते[12] न हैवैषां[13] विक्वे ऽन्य[14] इन्द्राग्नी[14] वृङ्क्ते यत्रैवंविद्वानच्छावाक[15] एतामक्रक्तः[16] शंसति ता वा एताः स्वर्गस्य

---

1) कुर्वन्त्यवरेणेव D; 2) °रभते A sec. m.; 3) °सदने E; 4) श्वस्तोत्रियमश्वस्तोत्रि° F; 5) ऋतुनीति D; ऋतुनीती E; 6) प्रणेत्रीमती D; 7) भवन्तीन्द्रं D und E; 8) ह वैषां A pr. m.; 9) इन्द्राग्नीं E; 10) सते A sec. m., und D; 11) Fehlt in F; 12) °र्निर्द्धयन्ति D; 13) हैषां D; 14) ऽन्येन्द्राग्नी D; ऽन्य इन्द्राग्नीं E; 15) Die hss. °च्छावाकस्यैता°; 16) अक्तः nur einmal in E.

लोकस्य नावः संतारणयः 'स्वर्गमेवैताभिर्लोकमनुसंतरन्ति[1]' ॥ १२ ॥

अथातः परिधानीया एव 'ते स्याम देव वरुणेति मैत्रावरुणास्येषं स्वश्च[2] धीमहीत्यंयं[3] वै लोक इषमित्यसौ लोकः स्वरित्युभावेवैनौ तौ लोकावारभते 'व्यत्तरिक्षमतिरदिति ब्राह्मणाच्छंसिनो 'विवक्तृचं[4]' स्वर्गमेवैताभिर्लोकं विवृणोति 'मदे सोमस्य रोचनेन्द्रो यदभिनद्बलमिति[5]' सिषासवो[6] ह वा एते यद्दीक्षितास्तंस्मादेषा बलवती भवत्युद्गा आजद्भिरोभ्य आविष्कृवन्गुहा सतीः । अर्वाञ्चं नुनुदे बलमिति 'सनिमेतेभ्य एतयावरुन्द्ध' इन्द्रेण रोचना दिवो दृळ्हानि दंहितानि च । स्थिराणि न पराणुद इति 'स्वर्गमेवैतयाद्धरद्बलोकमवरुन्द्ध' आदंह स्वरस्वतीवतोरित्यच्छावाकस्येन्द्राग्न्योरवो वृण इत्येतद्ध वा इन्द्राग्न्योः प्रियं धामो यद्धागिति 'प्रियेणैवैनौ[7] तद्धाम्ना समर्धयति 'प्रियेणैव धाम्ना समृध्यते य एवं वेद' ॥ १३ ॥

उभय्यो[8] क्षोत्रकाणां परिधानीया भवत्यक्षीनपरि-

---

1) °संचरन्ति A, D und F; °संचरति E; 2) अस्व A, D und E; 3) °हित्ययं F; 4) विवृचं E; 5) °दूब्रलमिति A pr. m. und F; 6) सिषिसव्वो A pr. m.; 7) प्रियेणौनौ D; 8) उभयो A, D und E.

धानीयाश्चैकाह्निनस्य[1] ' तत ऐकाह्निकीभिरेव मैत्रावरुणाः परिदधाति ' तेनास्माल्लोकान्न प्रच्यवत ' आह्निनीकीभिरच्छावाकः ' स्वर्गस्य लोकस्याप्त्या ' उभयीभिर्ब्राह्मणाच्छंस्येवमसावुभौ[2] व्यन्वारभमाण एतीमं च[3] लोकममुं चाथो ऽह्नीनं चैकाहं चाथो[4] संवत्सरं चाग्निष्टोमं चाथो मैत्रावरुणं चाच्छावाकं चैवमसावुभौ व्यन्वारभमाण एत्यथ तत ऐकाह्निकीभिरेव तृतीयसवने होत्रकाः परिदधति[5] ' तेनास्माल्लोकान्न प्रच्यवत ' आह्निनीकीभिरच्छावाकः ' स्वर्गस्य लोकस्य समष्ट्यै ' कामं तद्धोता शंसेद्यद्धोत्रकाः[6] पूर्वेद्युः शंसेयुर्यद्धि होता तद्धोत्रकाः[6] ' प्राणो वै होताङ्गानि होत्रकाः ' समानो वा अयं प्राणो ऽङ्गान्यनुसंचरति ' तस्मात्तत्कामं होता शंसेद्यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्धि होता तद्धोत्रका ' आत्मा वै होताङ्गानि होत्रकाः ' समाना वा इमे ऽङ्गानामन्तास्तस्मात्तत्कामं[7] होता शंसेद्यद्धोत्रकाः पुर्वेद्युः शंसेयुर्यद्धि होता तद्धोत्रकाः ' सूक्तान्तेहोता परिदधात्यथ समान्य[8] एव होत्रकाणां परिधानीया भवन्ति ' ॥ १४ ॥

---

1) भवत्य° D und E; 2) उभायी° E; 3) व F; 4) वाथो D; 5) So corr.; die hss. °दधाति; 6) °त्रक: D; 7) ऽङ्गानामन्त्रास्त° D; 8) सामान्य A pr. m.; D und E.

यः श्वस्तोत्रियस्तमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातः-सवने ऽह्नीनमेव तत्संतन्वत्यंह्नीनस्य[1] संतत्यै त[2] एते ह्नोत्रकाः प्रातःसवने षडृस्तोत्रियं शस्त्वा[3] माध्यंदिने ऽह्नीनसूक्तानि शंसत्यां[4] सत्यो यातु मघवां ऋजीषीति सत्यवन्मैत्रावरुणो[5] ऽस्मा इदु प्र तवसे तुरायेति ब्राह्मणाच्छंसी शासदग्निर्दुहितुर्नत्यं गादित्याच्छावाकस्तंदाहुः कस्मादच्छावाको वह्निवदेतत्सूक्तमुभयत्र[6] शंसति स[7] परान्नु चैवाहःस्वर्वान्नु[8] चेति वीर्यवान्वा एष बह्वृचो यदच्छावाको वहति ह वै वह्निर्धुरो यासु युज्यते तस्मादच्छावाको वह्निवदेतत्सूक्तमुभयत्र[9] शंसति स[7] परान्नु चैवाहःस्वर्वान्नु[10] चेति तानि पञ्चस्वहःसु शस्यन्ते चतुर्विंश ऽभिन्निति विषुवति विश्वन्निति महाव्रते तान्येतान्यह्नीनसूक्तानीत्याचक्षते न ह्येषु किं चन ह्रीयते परांश्च ह वा एतान्यह्नान्यनभ्यावर्तीनि[11] भवन्ति तस्मादेतान्येतेष्वहःसु शस्यन्ते यदेतानि शंसन्ति[12] तत्स्वर्गस्य लोकस्य रूपं यद्वैतानि शंसन्तीन्द्रमेवैतैर्निर्ह्वयन्ते[13]

---

1) तत्संतन्वत्य° D; 2) Fehlt in D; 3) शंसा F; 4) शंसत्या° D und E; 5) सत्यवान्मै° A pr. m.; 6) °मुतयत्र D; °मुभयति F; 7) ? ?; 8) So corr.; चैवाहसर्वान्नु A, E und F; चैवाद: सर्वान्नु D; 9) वह्निवदेत्तत्सू° A; 10) So corr.; die hss. चैवाहसर्वान्नु; 11) So corr.; die hss. एतान्यहान्यभ्या°; 12) शंसति D; 13) शंसतो° A.

यद्यर्षभं वाशितायै ' ते वै देवाश्चर्षयश्चाब्रुवंत्समानेन यज्ञं संतन्वामहा इति ' तदेतद्यज्ञस्य समानमपश्यंत्समानान्प्रगाथांत्समानीः प्रतिपदः समानानि सूक्तान्यंोकःसारी वा इन्द्रो ' यत्र वा इन्द्रः पूर्वं[1] गच्छति[2] गच्छत्येव तत्रापरं ' यज्ञस्यैव सेन्द्रतायै ' ॥ १५ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे पञ्चमः प्रपाठकः ॥

ओं तान्वा एतान्संपातान्विश्वामित्रः प्रथममपश्यद्देवा वामिन्द्र वह्निन्नत्र यन्न इन्द्रो जुजुषे[3] यच्च वष्टि कया महामवृधत्कस्य[4] होतुरिति ' तान्विश्वामित्रेण दृष्टान्वामदेवो[5] ऽसृजत ' स होत्रां चक्रे विश्वामित्रो यान्वा[6] अहं[6] संपातानदर्शं तान्वामदेवो[7] ऽसृजत ' कानि न्वहं[8] हि[9] सूक्तानि संपातांस्तत्प्रतिमान्त्सृज्येयमिति[10] ' स एतानि सूक्तानि संपातांस्तत्प्रतिमानसृजत[11] ' सद्यो ह जातो वृषभः कनीन उदु ब्रह्माण्यैरत[12] अवस्यामि तष्टेव दीधया मनी-

---

1) पूर्वे F; 2) गच्छति fehlt in F; 3) जुषे D; 4) माहा° A pr. m.; 5) दृष्ट्वा° A sec. m. und E; 6) यान्वाहं A und F; यावान्वाहं D; 7) °दर्शेस्तान्वामदेवो E; 8) So corr.; die hss. त्वं; 9) Korrupt!; 10) °त्प्रतिमानसृज्तेतेयमिति E; °त्प्रतिमानसृज्तयमिति D; 11) °सृजते A pr. m.; 12) ब्रह्मणयै° D.

षामिति विश्वमित्र ' इन्द्रः पूर्भिदातिरद्दासमर्कैर्य[1] एक इद्व्यश्वर्षणीनां[2] यस्तिग्मशृङ्गो वृषभो न भीम इति वसिष्ठ ' इमामू षु प्रभृतिं सातये धा इच्छन्ति[3] त्वा सोम्यासः सखायः[4] शासद्वह्निर्दुहितुर्नित्यं[5] गादिति भरद्वाज ' एतैर्वै संपातैरित[6] ऋषय इमांल्लोकांत्समपतंस्तांय्यत्समपतंस्तस्मात्संपातास्तत्संपातानां संपातत्वं ' ततो वा एतांस्त्रीन्संपातान्मैत्रावरुणो विपर्यासमेकैकमकरद्रः[7] शंसत्येवा त्वामिन्द्र वज्रिन्नत्रेति प्रथमे ऽहनि ' यन्न इन्द्रो जुजुषे यच्च वष्टीति[8] द्वितीये ' कथा महामवृधत्कस्य होतुरिति तृतीये ' त्रीनेव संपातान्ब्राह्मणाच्छंसी विपर्यासमेकैकमकरद्रः शंसतीन्द्रः पूर्भिदातिरद्दासमर्कैरिति प्रथमे ऽहनि ' य एक इद्व्यश्वर्षणीनामिति द्वितीये[9] ' यस्तिग्मशृङ्गो वृषभो न भीम इति तृतीये ' त्रीनेव संपातानच्छावाको विपर्यासमेकैकमकरद्रः शंसतीमामू षु प्रभृतिं सातये धा इति प्रथमे ऽहनीच्छन्ति त्वा सोम्यासः सखाय इति द्वितीये ' शासद्वह्निर्दुहितुर्नित्यं गादिति तृतीये ' तानि वा एतानि नव त्रीणि चाकरद्रःशंस्यानि[10] '

---

1) पूर्भिदति° A pr. m.; 2) मुर्ऋषीनां E; 3) इच्छन्ते A; 4) खाय: E; 5) प्रसद्व° E; 6) संपतेरेत D; 7) °कमह: A sec. m.; 8) वष्टीति A pr. m.; 9) द्वे F; 10) वाहरद्रः° E.

तानि द्वादश भवन्ति । द्वादश ह वै मासाः संवत्सरः । संवत्सरः[1] प्रजापतिः । प्रजापतिर्यज्ञस्तात्संवत्सरं[2] प्रजापतिं यज्ञमाप्नोति[3] । तस्मिंत्संवत्सरे प्रजापतौ[4] यज्ञे ऽक्ष्रक्षः प्रतितिष्ठन्तो यन्ति । प्रतितिष्ठत[5] । इदं सर्वमनु प्रतितिष्ठति[6] । प्रतितिष्ठति[6] प्रजया पशुभिर्य एवं वेद । तान्यन्तरेणावापमावपेरन्न्यूङ्ङा[7] विराजश्चतुर्थे ऽक्षनि वैमदीश्च[8] पङ्क्तीः पञ्चमे पारुच्छेपीः[9] षष्ठे । ऽथ यान्यन्यानि महास्तोत्राण्यष्टर्चान्यावपेरन् ॥ १ ॥

को अद्य[10] नर्यो देवकाम इति मैत्रावरुणो[11] । वने न वा यो न्यधायि चाकन्निति ब्राह्मणाच्छंस्यो याज्यर्वाङुपवन्धुरेष्ठा[12] इत्यच्छावाक । एतानि वा आवपनान्येतैरेवावपनैर्देवाश्चर्षयश्च[13] स्वर्गं लोकमायंस्तथैवैतद्यजमाना एतैरेवावपनैः[14] स्वर्गं लोकं यन्ति । सद्यो ह जातो वृषभः कनीन[15] इति मैत्रावरुणः पुरस्तात्संपातानामक्रक्षः शंसति । तदेतत्सूक्तं स्वर्ग्यमेतेन[16] सूक्तेन

---

1) Fehlt in D; 2) °स्तं संवत्सरं D; 3) °प्नोति Sing. und Plur. durch einander gebraucht; Ait. Br. VI 19, 7; अप्नुवन्ति; 4) प्रजापतै A pr. m. und D; प्रजपति: E; 5) So corr.; die hss. प्रतिष्ठन्त; 6) °तष्ठन्ति D; 7) °न्यूङ्ङ A; 8) So corr.; die hss. वैपदीश्च; 9) So corr.; die hss. पारुच्छेपी:; 10) अयं E; 11) °णौ F; 12) °पबन्धुरेष्ठा D und F; 13) आववमानान्ये° E; °पनेदेवाश्च D; 14) °वपने: D; 15) वतीन E; 16) स्वर्गमे° A pr. m., D, E und F.

देवाश्चर्षयश्च स्वर्गं[1] लोकमायंस्तंयैवैतद्यज्ञमाना[2] एतेनैव सूक्तेन स्वर्गं[1] लोकं यन्ति' तदृषभवत्यशुमद्भवति' पशूनामाप्त्यै' तत्यच्चर्चं भवत्यंन्नं वै पङ्क्तिरंन्नाद्यस्यावरुद्ध्या[3]' अरिष्टैर्नः पथिभिः पारयन्तेति[4] स्वर्गताया[5] एवैतदध्वरङ्कः शंसत्युंदु ब्रह्माणैरत[6] श्रवस्येति[7] ब्राह्मणाच्छंसी' ब्रह्मणवदेतत्सूक्तं समृद्धमेंतेन सूक्तेन देवाश्चर्षयश्च स्वर्गं[8] लोकमायंस्तथैवैतद्यज्ञमाना एतेनैव सूक्तेन स्वर्गं[9] लोकं यन्ति' तदु वै षड्चं[10]' षड्वा ऋतव' ऋतूनामाप्त्यै' तदुपरिष्टात्संपातानामध्वरङ्कः शंसत्यंभि तष्टेव दीधया मनीषामित्यच्छावको[11] ऽध्वरङ्कः शंसत्यभिवदति[12] तत्यै[13] वूपमंभि प्रियाणि मर्मृशत्यराणीति' यान्येव पराणयङ्कानि तानि प्रियाणि' तान्येव तदभिमर्मृशन्तो यत्यभ्यारभमाणाः' परो वा अस्माल्लोकात्स्वर्गो[14] लोकः' स्वर्गमेव तल्लोकमभिमृशन्ति' कवींरिच्छामि[15] संदृशे[16] सुमेधा इति' ये ह वा अनेन पूर्वे प्रेतास्ते[17] वै कव-

---

1) स्वर्गो A, E und F; 2) °ज्ञमानां A pr. m.; 3) °वस्यवरुन्ध्या D; 4) पारयन्तिवति A pr. m. D, E und F; 5) स्वर्गाताया A und F; 6) °पयैरेत A pr. m. und F; 7) ध्रुवत्येति D; 8) स्वर्गो A und F; 9) स्वर्गो A; 10) षउर्च A und F; 11) °त्याच्छावाको A; 12) °भिवदभि A, D, E; 13) तपै A und D; 14) So corr.; °लोको स्वर्गो A pr. m.; °लोका: स्वर्गो A sec. m. D, E und F; 15) कावां° E; 16) संदृशे A; 17) So corr.; die hss. प्रीतास्ते .

यस्तानेव[1] तद्भ्यतिवदति ' यदु वै दशर्चं[2] दश वै प्राणाः ' प्रणानेव तदाप्नोति ' प्राणानां संतत्यै ' यदु वै दशर्चं ' दश वै पुरुषे प्राणा ' दश स्वर्गा[3] लोकाः ' प्राणांश्चैव तत्स्वर्गांश्च लोकानाप्नोति ' प्राणेषु चैवैतत्स्वर्गेषु च[4] लोकेषु प्रतितिष्ठन्तो[5] यन्ति ' यदु वै दशर्चं ' दशाक्षरा विराडियं वै स्वर्गस्य लोकस्य[6] प्रतिष्ठा ' तदेतदस्यां प्रतिष्ठायां प्रतिष्ठापयति[7] ' सकृदिन्द्रं निराह ' तेनैन्द्राद्रूपान्न प्रच्यवते ' तदुपरिष्टात्संपातानामह्रह्रः शंसति ' ॥ २ ॥

कस्तमिन्द्र त्रावसु कन्नव्यो अतसीनां कद्व न्वस्याकृतमिति[8] कद्वत्तः प्रगाथा अह्रह्रः शस्यन्ते ' को[9] वै प्रजापतिः ' प्रजापतेराप्त्यै ' यदेव कद्वत्तस्तात्स्वर्गस्य लोकस्य रूपं ' यद्वेव कद्वत्तो ' ऽन्यो अन्नं वै कमन्यो अन्नस्यावरुद्ध्यै[10] ' यद्वेव कद्वत्तो ' ऽन्यो सुखं वै कमन्यो सुखस्यावरुद्ध्यै ' यद्वेव कद्वत्तो ' ऽन्यो ऽह्रह्रर्वा एते शान्तान्यहीनसूक्तान्युपयुञ्जाना[11] यन्ति ' तानि कद्वद्भिः प्रगाथैः शमयन्ति ' तान्येभ्यः शान्तानि कं भवन्ति[12] ' तान्येताञ्छान्तानि[13] स्वर्ग[14]

---

1) So corr.; die hss. तान्येव; 2) द्दशर्चे E; 3) So corr.; die hss. स्वर्गो; 4) Fehlt in E; 5) °ष्ठन्ति D; 6) Fehlt in A, D und F; 7) °पयन्ति A pr. m.; 8) न्वास्याकृ° A pr. m. D und F; 9) So corr.; die hss. प्रंसत्येको; 10) अन्यस्या° D; 11) °पयुन्ना D; 12) भवति D und E; 13) ताञ्छातानि E; 14) स्वर्गा A, स्वर्ग D.

लोकमभिवदन्ति ' त्रिष्टुभः सूक्तप्रतिपदः[1] शंसेयुस्तां दैके पुरस्तात्प्रगाथानां[2] शंसन्ति धाय्या इति वदन्तस्तंदु तथा न कुर्यात्क्षत्रं वै होता विशो होत्राशंसिनः ' क्षत्रायैव[3] तद्विशं[4] प्रत्युद्यामिनीं कुर्युः ' पापवस्यसं[5] ' त्रिष्टुभो[6] वा[7] इमाः सूक्तप्रतिपद[8] इत्येवं विद्याद्यथा वै समुद्रं प्रतरेयुरेवं हैवैते प्लवन्ते[9] ये संवत्सरं द्वादशाहं वोपासते[10] ' तद्यथा सैरावतीं[11] नावं पारकामाः समारोहेयुरेवं हैवैतास्त्रिष्टुभः स्वर्गकामाः[12] समारोहन्ति ' न ह वा एतच्छन्दो गमयित्वा[13] स्वर्गं[14] लोकमुपावर्तन्ते[15] ' वीर्यवत्तमं[16] हि ' ताभ्यो न व्याह्वयीत[17] ' समानं हि छन्दो ' ऽथो नेड्धाय्याः[18] करवाणीति ' यदेनाः शंसन्ति[19] तत्स्वर्गस्य लोकस्य रूपं ' यद्धैवैना शंसन्तीन्द्रमेवैताभिर्निर्ह्वयन्ते[20] यथर्षभं[21] वाशितायै[22] ' ॥ ३ ॥

---

1) सूक्त : प्रति° A sec. m., E und F; 2) °गाथाना A sec. m. und F; 3) So corr.; die hss. क्षत्रस्यैव; 4) So corr.; die hss. तद्विषं; 5) So corr.; A und F पावमनस्यसं; D und E पावनस्यसं; 6) त्रिष्टुभौ F; 7) ?? मा D; vielleicht म?; 8) °तिपाद् D; 9) प्रप्लवयन्ते F; 10) वोपासन्ते A, D und E; 11) सैरावती D, E und F; 12) स्वर्गाकामा : A und F; 13) गामयित्वा D; 14) स्वर्गा A; 15) °वर्ताते A pr. m.; °वर्तन्ते D und E; 16) विर्यवन्तं मं D, E und F; 17) वो ह्वयीत A pr. m.; °वाह्वयीत E und F; 18) So corr.; die hss. न्ये धाय्याः; 19) शंसति D und E; 20) शंसतीन्द्र° E; 21) °षभे D; 22) So corr.; die hss. वासितायै.

अपेन्द्र प्राचो मघवन्नमित्रानिति मैत्रावरुणः पुरस्तात्संपातानामह्रस्वः शंसत्यपापाचो[1] अभिभूते[2] नुदस्वापोदीचो[3] अप शूराधराच[4] उरौ यथा तव शर्मन्मदेमित्यभयस्य ह्रूपमभयमिव[5] ह्यन्विच्छति[6]' ब्रह्मणा[7] ते[8] ब्रह्मयुजा[9] युनज्मीति ब्राह्मणाच्छंस्येतामह्रस्वः शंसति[10] युक्तवतीं' युक्त इव[11] ह्यहीनो' ऽहीनस्य ह्रूपमुरुं नो लोकमनुनेषीत्यच्छावाको ऽह्रस्वः शंसत्यनुनेषीत्येत इव[11] ह्यहीनो' ऽहीनस्य ह्रूपं' नेषीति सत्रायणाह्रूपमोकःसारी[12] ह्यैवैषामिन्द्रो भवति' यथा गौः प्रज्ञातं[13] गोष्ठं[14] यथर्षभो[15] वाशिताया[16] एवं[17] ह्यैवैषामिन्द्रो यज्ञमागच्छति[18]' न शुनंह्रुययाहीनस्य[19] परिदध्यात्क्षत्रियो[20] ह्य राष्ट्राच्च्यवते' यो ह्यैव परो भवति तमभिह्वयति[21]' ॥ ४ ॥

अथातो ऽहीनस्य[22] युक्तिश्च विमुक्तिश्च' व्यतरिक्तम-

---

1) °पायायो E; 2) अभिभूतं D; 3) °पोदेवो E; 4) शूरध° A pr. m. und D; 5) अभयम् fehlt in D; 6) So corr.; die hss. °च्छेति; 7) ब्राह्मणा D; 8) ते A; 9) ब्राह्मणयुजा D; 10) शंसन्ति A sec. m.; D, E und F; 11) इवा A pr. m., D, E und F; 12) So corr.; सौत्रायण° D; सत्रायण A, E und F; 13) प्रज्ञातं A, D und E; 14) गोष्ठ D; 15) So corr.; die hss. यथर्षभं; 16) So corr.; die hss. वासिताया; 17) एव A sec. m. und F; 18) °गच्छन्ति A pr. m., D, E und F; 19) ह्रुयया° A pr. m.; 20) परिदधात्त° D; परिदध्या क्षेत्रियो E; 21) तमपिह्रुयति E; 22) So corr.; die hss. ऽहीनश्च.

तिरदित्यहीनं[1] युङ्क्त[2]' एवेदिन्द्रमिति विमुञ्चति' नूनं सा त इत्यहीनं[3] युङ्क्त[4]' नू ष्टुत इति विमुञ्चत्येष ह[5] वा अहीनं तत्तुमर्हति य एनं योक्तं[6] च विमोक्तं च वेद' तस्य हैषैव युक्तिरेषा विमुक्तिस्तंयत्प्रथमे ऽहनि चतुर्विंश[7] एकाह्निकीभिः[8] परिदध्युः प्रथम एवाहनि यज्ञं संस्थापयेयुर्नाहीनकर्म कुर्युरथ यदहीनपरिधानीयाभिः[9] परिदध्युस्तयया युक्तो ऽविमुच्यमान[10] उत्कृत्येतैवं यजमाना उत्कृत्यैरन्नाहीनकर्म कुर्युरथ यदुभयीभिः परिदध्युस्तयया दीर्घाध्व उपविमोकं[11] यायात्तादृक्तत्समानीभिः[12] परिदध्युस्तदाङ्गरेकया द्वाभ्यां वा स्तोममतिशंसेद्दीर्घारण्यानि[13] भवन्ति' यत्र बह्वीभि स्तोमो ऽतिशस्यते ऽथो क्षिप्रं देवेभ्यो ऽन्नाद्यं संप्रयच्छामीत्यंपरिमिताभिरुत्तरयोः[14] सवनयोरंपरिमितो[15] वै स्वर्गो लोकः[16]' स्वर्गस्य[16] लोकस्य समष्ट्यै' तयायाभिक्षेषते[17] पिपासते क्षिप्रं प्रयच्छेत्तादृक्तत्समानीभिः परिदध्युः' संततो हैवै-

---

1) °रदीत्यहीनं A, D und F; 2) युक्त A pr. m., D und E; 3) °हीन E; 4) युक्ते A pr. m. und D; 5) Fehlt in D; 6) योक्त F; 7) °र्विंशति D; 8) एकाहीकिभिः F; 9) Die hss. यदहीनः परि°; 10) So corr.; die hss. °माना; 11) °मोकयं A sec. m.; 12) याड्यास्तादृ° A pr. m., E und F; याड्यास्तदृ° D; 13) °रण्यनि A pr. m.; 14) संप्रयच्छमीत्य° A und E; 15) सवनेयोर्° A pr. m.; 16) Fehlt in D; 17) यथाभिसहैते F.

षामारब्धो ऽविस्रस्तो यज्ञो भवति 'संततमृचा[1] वषट्कृत्यं' संतत्यै[2] 'संधीयते प्रजया पशुभिर्य एवं वेद' ॥ ५ ॥

तदाहुः कथं द्युक्थो[3] होतिकसूक्त एकोक्था होत्रा द्विसूक्ता[4] इत्यसौ वै होता यो ऽसौ तपति 'स वा एक एव 'तस्मादेकसूक्तः' स यद्विध्यातो द्वाविवाभवति 'तेज एव मण्डलं भा अपरं शुक्लमपरं कृष्णं 'तस्माद् द्युक्थो' रश्मयो वाव होत्रास्तें[5] वा एकैकं[6] 'तस्मादेकोक्थास्तांश्चदेकैकस्य[7] रश्मेर्द्वौ[8] द्वौ वर्णौ भवतस्तस्माद्विसूक्ताः[9] 'संवत्सरो वाव होता 'स वा एक एव 'तस्मादेकसूक्तस्तस्य[10] यद्बह्व्यान्यहानि भवन्ति शीतान्यन्यान्युष्णान्यन्यानि तस्माद् द्युक्थ[11] 'ऋतवो वाव होत्रास्तें वा एकैकं 'तस्मादेकोक्थास्तांश्चदेकैकस्यर्तौ[12] द्वौ[12] द्वौ मासौ भवतस्तस्माद्विसूक्ताः 'पुरुषो वाव होता 'स वा एक एव 'तस्मादेकसूक्तः' स यत्पुरुषो भवत्यन्यथैव प्रत्यङ्ङ्व-त्यन्यथा प्राङ्स्माद् द्युक्थो 'ऽङ्गानि वाव होत्रास्तानि वा एकैकं 'तस्मादेकोक्थास्तांश्चदेकैकमङ्गं द्युतिर्भवति तस्माद्

---

1) ततमृचा D; 2) तत्यै E; 3) द्यूयुक्तं F; 4) द्विसूत्रा F; 5) होत्रका D; 6) Hier endet E; 7) तस्मादेकाच्छस्त° D; 8) So corr.; die hss. रश्मे द्वौ; 9) भवन्तस्त° A pr. m.; °सूक्तः A pr. m. und D; 10) सूक्तस्य F; 11) °द्द्यूयुकथा F; 12) So die hss.; wschl. °स्तश्चदेकैकस्यर्तोर्द्वौ.

द्विसूक्तास्तंदाङ्कुर्यद् द्युक्थो ह्नोतैकसूक्त एकोक्था ह्नोत्रा द्विसूक्ताः कथं तत्समं भवति' यदेव द्विदेवत्याभिर्यजत्यथो[1] यद्द्विसूक्ता ह्नोत्रा इति ब्रूयात्तंदाङ्कुर्यदग्निष्टोम[2] एव सति यज्ञे द्वे ह्नोतुरुक्थे अतिरिच्येते कथं ततो ह्नोत्रा न व्यवच्छिद्यत इति' यदेव द्विदेवत्याभिर्यजत्यथो यद्द्विसूक्ता ह्नोत्रा इति ब्रूयात्तंदाङ्कुर्यदग्निष्टोम[2] एव[3] सति[3] यज्ञे सर्वा देवताः सर्वाणि छन्दांस्याप्नोयत्यथ कतमेन छन्दसायातयामान्युक्थानि प्रणयन्ति कया देवतयेति' गायत्रेण छन्दसाग्निना देवतयेति ब्रूयाद्देवान्ह यज्ञं तन्वानानसुररक्षांस्यभिचेरिरे[4] यज्ञपर्वणि[5] यज्ञमेषां ह्नविष्यामस्तृतीयसवनं[6] प्रति' तृतीयसवने ह यज्ञस्त्वरिष्टो[7] बलिष्ठः' प्रतनुमेषां[8] यज्ञं ह्नविष्याम[9] इति' ते वरुणं दक्षिणतो ऽयोजयन्मध्यतो[10] बृहस्पतिमुत्तरतो विष्णुं' ते ऽब्रुवन्नेकैकाः स्मो' नेदमुत्सक्षामह इति' स्तुतो द्वितीयो येनेदं सह[11] व्यश्नवामहा[11] इति' तानिन्द्रो ऽब्रवीत्सर्वे मद्द्वितीया स्येति' ते सर्व[12] इन्द्रद्वितीयास्तंस्मादिन्द्रा-[13]

---

1) °भियजत्यथो D; 2) °दाग्निष्टोम A sec. m. und F; 3) Fehlt in F; 4) So corr.; die hss. तन्वाना असुर°; 5) Fehlt in D; 6) ह्नविष्या° F; 7) ? ? vielleicht °ष्ठो; 8) ? ?; 9) ह्नविष्याम A pr. m. und F; 10) ऽयोजयान्म° A pr. m., D und E; 11) समश्नवा° D; 12) सर्व A pr. m.; 13) So corr.; die hss. इन्द्रं द्वि°.

वारुणमैन्द्राबार्हस्पत्यमैन्द्राविष्णावमनुशस्यते[1] । द्वितीयवत्तो ह वा एतेन स्वा भवन्ति । द्वितीयवत्तो मन्यन्ते[2] य[3] एवं[3] वेद[3] । ॥ ६ ॥

आग्नेयीषु मैत्रावरुणस्योक्थं प्रणायन्ति । वीर्यं वा अग्निर्वीर्यमेवास्मै[4] तत्प्रणयन्त्यैन्द्रावारुणमनुशस्यते[4] । वीर्यं वा इन्द्रः । क्षत्रं वरुणः । पशव उक्थानि । वीर्यमेव तत्क्षत्रेण चोभयतः पशून्परिगृह्णाति । स्थित्या । अनपक्रान्त्या । ऐन्द्रीषु ब्राह्मणाच्छंसिन उक्थं प्रणायन्ति । वीर्यं वा इन्द्रो । वीर्यमेवास्मै तत्प्रणयन्त्यैन्द्राबार्हस्पत्यमनुशस्यते[5] । वीर्यं वा इन्द्रो । ब्रह्म बृहस्पतिः । पशव उक्थानि । वीर्यमेव तद्ब्रह्मणा[6] चोभयतः पशून्परिगृह्णाति । स्थित्या । अनपक्रान्त्या । ऐन्द्रीघच्छावाकस्योक्थं[7] प्रणायन्ति । वीर्यं वा इन्द्रो । वीर्यमेवास्मै तत्प्रणयन्त्यैन्द्राविष्णावमनुशस्यते[8] । वीर्यं वा इन्द्रो । यज्ञो विष्णुः । पशव उक्थानि । वीर्यमेव तद्यज्ञेन चोभयतः पशून्परिगृह्य क्षत्रे[9] ऽन्ततः[9] प्रतिष्ठापयति । तस्माद्व क्षत्रियो[10] भुयिष्ठं हि[11] पशूना-

---

1) ऐन्द्रावारुणम् fehlt in F; 2) मन्यते F; 3) य एवं वेद ist gedankenlos zugefügt; 4) अग्निर्वीर्यमेव तद्ब्रह्मणा चोभयत: पशून्परिगृह्णाति F; 5) तस्मात्प्रणा° F; °नुशिष्यते D; 6) तद्ब्राह्मणा D; 7) °कस्योक्थ D; 8) तत्प्रणावत्यैन्द्रा° F; 9) क्षत्रन्तत: A pr. m., D und E; 10) ?? क्षत्रिया?; 11) Korrupt.

मीशते[1] 'याधिष्ठाता[2] प्रदाता यस्मै प्रत्ता वेदा अवरुद्धा-
स्तान्येतान्यैन्द्राणि ज्ञागतानि शंसत्यथो[3] एतैरेव सेन्द्रं
तृतीयसवनमेतैर्ज्ञागतं सवनं 'धराणि ह्र वा अस्यैतान्यु-
क्थानि भवन्ति यन्नाभानेदिष्ठो वालखिल्यो वृषाकपिरे-
वयामरुत्तंस्मात्तानि[4] सार्धमेवोपियुः 'सार्धमिदं रेतः सि-
क्तं[5] समृद्धमेकधा प्रजनयामिति 'ये ह्र वा एतानि ना-
नूपियुर्यथा रेतः सिक्तं[6] विलुम्पेत्कुमारं[7] वा ज्ञातमङ्गशो
विभज्नेत्तादृक्तत्तंस्मात्तानि[8] सार्धमेवोपियुः[9] 'सार्धमिदं रे-
तः सिक्तं समृद्धमेकधा प्रजनयामिति 'शिल्यानि शंसति
देवशिल्यान्येतेषां वै शिल्यानामनुकृतीह्र[10] शिल्यम-
धिगम्यते 'ह्रस्ती कंसो वासो हिरण्यमश्वतरीरथः शि-
ल्पं 'शिल्पं ह्रास्य समधिगम्यते य एवं वेद 'यदेव शि-
ल्पानि शंसति तत्स्वर्गस्य लोकस्य ह्रपं 'यद्धेव शिल्पा-
न्यात्मसंस्कृतिर्वै शिल्पान्यात्मानमेवास्य तत्संस्कुर्वन्ति '
॥ ७ ॥

नाभानेदिष्ठं शंसति 'रेतो वै नाभानेदिष्ठो 'रेत एव
वास्य तत्कल्पयति 'तद्रेतोमिश्रं भवति[11] 'ह्रमया[12] रेतः

---

1) °मिश्रन्ते F; 2) ?? यो ऽधि°; 3) शंसत्यथो D; 4) वृषाकपा-
यिरेव° D; 5) सिक्ता D; 6) सिक्त D; सिक्तुं F; 7) विलुम्पेत कु° F;
8) °त्तस्मात्तत्तानि D; 9) °वोपेयः D; 10) So corr.; die hss. °नुकृतिर्हि;
11) भवन्ति A und D; 12) क्षया D.

संज्ञग्मानो निषिञ्चदिति[1] ' रेतसः समृद्ध्या एव ' तं सनारशंसं[2] शंसति ' प्रजा वै नरो ' वाक्शंसः ' प्रजासु तद्वाचं[3] दधाति[4] ' तस्मादिमाः प्रजा वदत्यो ज्ञायन्ते ' तं केके पुरस्तात्प्रगाथानां शंसन्ति पुरस्तादायतना वागिति वदन्त ' उपरिष्टादेक उपरिष्टादायतना वागिति वदन्तो ' मध्य एव शंसेन्मध्यायतना[5] वा इयं वागुपरिष्टान्नेदीयसीव ' तं होता रेतोभूतं शस्त्वा मैत्रावरुणाय संप्रयच्छत्येतस्य[6] वं प्राणान्कल्पयेति[7] ' वालखिल्याः शंसति[8] ' प्राणा वै वालखिल्याः ' प्राणानेवास्य तत्कल्पयति ' ता[9] विकृताः[10] शंसति ' विकृता[10] वै प्राणाः ' प्राणेनापानो ' ऽपानेन व्यानः ' स पच्छः प्रथमे सूक्ते विकरत्यर्धर्चशो द्वितिय[11] ' ऋक्शः तृतीये ' स यत्प्रथमे सूक्ते विकरति वाचं[12] चैव तन्मनश्च विकरति ' यद्द्वितीये[13] चक्षुश्चैव तच्छ्रोत्रं च विकरति ' यत्तृतीये प्राणं चैव तदात्मानं च विकरति ' तदुपास्तो[14] विकरेत्कामो[14] ' नेतुर्वै[14] प्रगा-

---

1) ऽभिषि° D; 2) संनाराप्रांसं F; 3) तद्वाच A pr. m. und F; 4) दधामि D; 5) °न्मध्ययतना D; 6) संप्रयच्छेत्येतस्य D; 7) So corr.; die hss. °ल्पयति; 8) प्रांसन्ति F; 9) वा F; 10) विहिता: D; 11) द्वितीय A; 12) वाचां D; 13) °तीय A pr. m. und E; 14) Korrupt. Ait. Br. विहारे कामो नेतु वै D °न्येतुः वै.

याः कल्पन्ते[1] ' ऽतिमर्शमेव[2] विक्रेत्तंया वै प्रगाथाः कल्पन्ते[3] ' यदेवातिमर्शं तत्स्वर्गस्य लोकस्य रूपं ' यद्वेवातिमर्शमात्मा वै बृहती ' प्राणाः सतोबृहती ' स बृहतीमशंसीत्स आत्मांथ[4] सतोबृहतीं[5] ' ते प्राणा ' अथ बृहतीमंथ सतोबृहतीं ' तदात्मानं प्राणैः परिवृक्ष्नेति ' यद्वेवातिमर्शमात्मा वै बृहती ' प्रजाः सतोबृहती ' स बृहतीमशंसीत्स आत्मांथ सतोबृहतीं ' ते प्रजा ' अथ बृहतीमंथ सतोबृहतीं ' तदात्मानं प्रजया परिवृक्ष्नेति ' यद्वेवातिमर्शमात्मा वै बृहती[6] ' पशवः सतोबृहती ' स बृहतीमशंसीत्स आत्मांथ सतोबृहतीं ' ते पशवो ' ऽथ बृहतीमंथ सतोबृहतीं[7] ' तदात्मानं पशुभिः परिवृक्ष्नेति ' तस्य मैत्रावरुणाः प्राणान्कल्पयित्वा ब्राह्मणाच्छंसिने संप्रयच्छत्येतस्य त्वं प्रजनयेति ' सुकीर्तिं शंसति ' देवयोनिर्वै सुकीर्तिस्तांव्यज्ञियायां देवयोन्यां यजमानं प्रजनयति[8] ' वृषाकपिं शंसत्यात्मा वै वृषाकपिरात्मानमेवास्य तत्कल्पयति ' तं न्यूङ्खयत्यंन्नं[9] वै न्यूङ्खो ' ऽन्नाद्यमेवास्मै तत्सं-

---

1) So corr.; कल्पयन्ते A und F; कल्प्यन्त D; 2) So corr.; ऽतिमर्शं समेव A und F; ऽतिमर्श समेव D; 3) कल्प्यन्ते D; 4) आत्मा F; 5) °बृहती A sec. m. und F; 6) बृहतीं A; 7) °बृहती F; 8) प्रजनयेति A und F; 9) So corr.; तन्यूङ्ख इत्यन्नं A und D; तन्यूङ्खमित्यन्नं F.

प्रयच्छति यथा[1] कुमाराय जाताय स्तनं 'स पाङ्क्तो[2] भवति[2] 'पाङ्क्तो ह्ययं पुरुषः पञ्चधा विहितो 'लोमानि त्वगस्थि मज्जा मस्तिष्कं 'स यावानेव पुरुषस्तावन्तं यजमानं संस्कृत्याच्छावाकाय संप्रयच्छत्येतस्य वं प्रतिष्ठां कल्पयेत्येवयामरुतं[3] शंसति 'प्रतिष्ठा वा एवयामरुत्प्रतिष्ठाया मेवैनमन्ततः प्रतिष्ठापयति 'याज्यया यजत्यन्नं वै याज्यान्नाद्यमेवास्मै तत्संप्रयच्छति' ॥ ८ ॥

तानि वा एतानि सक्तचराणीत्याचक्षते यन्नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुत्तानि सक्त वा[4] शंसेत्सक्त[4] वा न शंसेद्यदेषामन्तरीयात्तद्यजमानस्यान्तरीयाद्यदि[5] नाभानेदिष्ठं[6] रेतो ऽस्यान्तरीयाद्यदि वालखिल्याः प्राणानस्यान्तरीयाद्यदि वृषाकपिमात्मानमस्यान्तरीयाद्येवयामरुतं प्रतिष्ठा वा एवयामरुत्प्रतिष्ठाया एवैनं तं श्रावयेद्दैव्याश्च मानुष्याश्च 'तानि सक्त वा शंसेत्सक्त वा न शंसेत्स क्त बुडिल आश्वितरास्युर्विश्वजितो[7] क्रोता सन्नीक्षां[8] चक्र एतेषां वा एषां[9] शिल्पानां विश्वजिति सांवत्सरिके द्वे क्रोतुरुक्थे माध्यंदिनमभिप्रच्यवेते 'क्रत्ता-

1) कथा F; 2) Fehlt in D; 3) कल्पयेत्य° D und F; 4) वांशेत्सह् D; 5) °तरीयाथदि A; 6) °नेदिष्ठो F; 7) ? ?; अश्वितरा° A pr. m.; wschl. आश्वितराश्विर्विश्वजितो; 8) So corr.; die hss. सं क्षीत्तां; 9) एषा F.

क्मित्यमेवयामरुतं शंसयानीति[1] ' तद्व[2] तथा शंसयां[3] चक्रे ' तद्व तथा शस्यमाने गोश्न आजगाम ' स क्रोवाच क्रोतः[4] कथा ते शस्त्रं विचक्रं[5] प्लवत इति ' किं क्यभूदित्येवयामरुदयमुत्तरतः शस्यत इति ' स क्रोवाचेन्द्रो वै माध्यंदिनः ' कथेन्द्रं माध्यंदिनान्निनीषसीति[6] ' नेन्द्रं माध्यंदिनान्निनीषामीति[7] स क्रोवाच ' क्रन्दस्त्विदममाध्यंदिनंसाचि[8] ' ज्ञागतं वातिज्ञागतं वा ' स ड मारुतो ' मेवं संमृष्टेति ' स क्रोवाचारमाच्छावाकेत्यंथास्मिन्ननुशासनमीषे ' स क्रोवाचेन्द्रमेष विष्णुन्यङ्गानि शंसत्यंथ त्वं क्रोतुरुपरिष्टाद्क्रौद्रिया धाय्यायाः पुरस्तान्मारुतस्य सूक्तस्याप्यस्यथा[9] इति ' तथेति ' तद्प्येतर्हि तथैव शस्यते ' यथा षष्ठे पृष्ठाक्नि[10] कल्पत एव यज्ञः कल्पते यजमानस्य प्रज्ञातिः[11] कथमत्राशस्त एव नाभानेदिष्ठो भवत्यथ वालखिल्याः शंसति ' रेतो वा अग्रे ज्य प्राणा ' एवं ब्राह्मणाच्छंस्यंशस्त एव नाभानेदिष्ठो भवत्यथ वृषाकपिं[12] शंसति ' रेतो वा

---

1) So corr.; प्रस्थवानीति A, D und F; 2) तद्वत् A, तडत् D; 3) So corr.; die hss. प्रस्थयां; 4) तम: F; 5) विचक F; 6) So corr. nach Ait. Br.; die hss. °दिनान्यनीकसीति; 7) So corr.; माध्यंदिनान्यनीषामीति A; °दिन्यं नीषामिति D; माध्यंदिनान्यकीकसीतिमिति F; 8) So corr.; die hss. °त्विदमु माध्यंदिनं साति; 9) So corr.; die hss. °प्यस्वधा A und F; °प्यस्वध्म D; 10) °हानि A pr. m. und F; 11) प्रजापति: A pr. m. und F; 12) वृषकपिं D.

अग्ने ऽथात्मा कथमत्र यजमानस्य प्रजातिः[1] कथं प्राणा अवरुद्धा भवन्तीति[2]' यजमानं वा एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति' स यथा गर्भो योन्यामन्तरेव प्राणानस्यान्तरियाद्यदि वृषाकपिमात्मानमस्यान्तरियाद्यद्येव[3] या संभवञ्चेते' न ह वै सकृदेवाग्रे सर्वं संभवत्येकैकं वा अङ्गं संभवतः[4] संभवति' सर्वाणि चेत्समाने ऽह्नि क्रियेरन्कल्पत एव यज्ञः कल्पते यजमानस्य प्रजातिरथ[5] हैवैवयामरुतं होता शंसेत्तंस्यास्य[6] प्रतिष्ठा' तस्यामेवैनमन्ततः[7] प्रतिस्थापयति प्रतिस्थापयति' ॥ १ ॥

देवक्षेत्रं[8] वै षष्ठमहर्देवक्षेत्रं[9] वा एत[10] आगच्छन्ति ये षष्ठमहरागच्छन्ति' न वै देवा अन्यो ऽन्यस्य गृहे वसन्ति[11] नर्तुर्ऋतोर्गृहे[12] वसतीत्याङ्कुस्तंयथायथमृत्विज ऋतुयाजान्यजन्त्यसंप्रदायं' तद्यदृतून्कल्पयन्ति[13] यथायथं जनिता[14]' तदाङ्कुर्नर्तुप्रैषैः[15] प्रेष्येयुर्नर्तुप्रैषैर्वषट्कुर्युर्वाग्वा[16]

---

1) प्रजापतिः A pr. m. und F; 2) भवतीति D; 3) °यादो व A sec. m. und D; °यादै व A pr. m.; 4) So corr.; die hss. संभवति; fehlt in ed. B. Ind.; 5) प्रजापतिरथ A pr. m. und D; 6) ? ? Ait. Br. °तथास्य; 7) So corr.; die hss. तस्या एवैनमन्तत; 8) देवक्षत्रं D und F; 9) °क्षत्रं D und F; 10) एव A pr. m.; 11) सन्ति D; 12) So corr.; नर्तुर्तो गृहे A; नर्तु ऋतो गृहे D; नर्तुर्तौ गृहे F; 13) °ल्पयति D und F; 14) Sic!; 15) So corr.; die hss. °प्रैषी; 16) So corr.; die hss. °प्रैषीर्व°.

ऋतुप्रैषा[1] ' आप्यते[2] वै वाक्षष्ठे ऽह्नीति[3] ' यदृतु-
प्रैषैः[4] प्रेष्येयुर्यदृतुप्रैषैर्वषट्कुर्युर्वाचमेव[5] तदाप्तां शान्ता-
मृक्तवतीं[6] वह्रावणीमृच्छेयुरच्युताय्यज्ञस्य[6] च्यवेरन्यज्ञा-
त्प्राणान्प्रजायाः[7] पशुभ्यो जिह्मा ईयुस्तस्मादृग्भ्य एव
प्रेषितव्यमृग्भ्यो ऽधि वषट्कृत्यं ' तन्न वाचमाप्तां शान्ता-
मृक्तवतीं[9] वह्रावणीमृच्छति[9] ' नाच्युताय्यज्ञस्य च्यवेर-
न्न[10] यज्ञात्प्राणान्प्रजायाः[11] पशुभ्यो जिह्मा यन्ति ' पारुच्छे-
पीरुपदधति[12] द्वयोः सवनयोः पुरस्तात्प्रस्थितयाज्यानां '
रोहितं[13] वै नामितच्छन्दो यत्पारुच्छेपमेतेन ह वा इन्द्रः
सप्त स्वर्गाल्लोकानारोहदारोहति[14] सप्त स्वर्गाल्लोकान्य[15]
एवं[16] वेद ' तदाहुर्यत्पञ्चपदा एव पञ्चमस्याङ्को दृपं षट्-
पदाः[17] षष्ठस्याथ कस्मात्सप्तपदाः[18] षष्ठे ऽह्नि शस्यन्त[19]
इति ' षड्भिरेव पदैः षष्ठमह्नवाप्नुवन्त्यवक्ष्येवैतदह्नर्यत्स-

---

